सारं हरिप्रेम मधु प्रपीय
तृणाय विश्वं खलु मन्यमानः ॥ ८४ ॥

विचारपत्रो नियमैकदण्डः
कृताद्वितीयाश्रुतिश्रृङ्गनादः ॥
रमे परात्मानमुपेत्य नित्यं
रिक्तो न पूर्णस्य सुखस्य लाभात् ॥ ८५ ॥

त्रिभिर्विशेषकम्

आ पातालाद् आ च वैरञ्च्यलोकान्
मिथ्या नानारूपमैश्वर्यमाहुः ॥
एको नित्यः सोऽयमीशो भ्रमन्ति
यस्य त्रासाद् वायुसूर्यादयोऽमी ॥ ८६ ॥

विना हरिं कोऽनुनयेत[1] सिद्धिं
जरामृतिव्याधिहरींस्त्वयुक्त्या ॥
ततः प्रपद्येत[2] तमेव धीरो[3]
न हारयेज्जन्म विलोभ्यमानः ॥ ८७ ॥

तमेव बुध्वा "ह्यतिमृत्युमेति"
शोकं तरत्यात्मविदित्यशङ्कम् ॥
वदन्ति चेद् वेदविदस्तदा न
मिथ्यात्वशङ्का क्वचिदास्तिकस्य ? ॥ ८८ ॥

राज्यं विहाय खलु मुण्डितवान् शिरस्त्वं
मोहं मुहुर्व्रजसि नो ममतां जहासि ॥

---

१. भुनयैति–क०
२. प्रपद्यन्त–क०
३. घोरो–क०

लुब्धोसि सिद्धिषु कुतो निजकार्यहानिं ?
वेतालमोदकनिभासु निभालयस्व[1] ॥ ८९ ॥

ततो गतो भर्तृहरिर्भूतवासिद्ध आगतः ॥
भूतवाः पूतवाचं तमित्युवाच विचक्षणः ॥ ९० ॥

आशा हि परमं दुःखं नैराश्यं परमं सुखम् ॥
भर्तुराशां परित्यज्य सुखं सुष्वाप पिङ्गला[2] ॥ ९१ ॥

आसानिबोधेन विधूतपाप्मा
ब्रह्माहमानन्द इति भ्रमस्ते ॥
दुराशया पुद्गलपातमात्रो[3]
मोक्षः सुखं वैषयिकोऽत्र नान्यत् ॥ ९२ ॥

प्रत्यक्षसिद्धानि सुखानि हित्वा
किं श्रद्धास्यध्वनि दुर्विगाहे ? ॥
न ब्रह्मणो मूकगुडोपमाना-
त्कश्चित्परावृत्य सुखं जगाद ॥ ९३ ॥

शरीरदार्ढ्याय विधाय योगं
भोगं विदध्याद् विषयैर्विचित्रैः ॥
दुःखाकरैर्हा ? नियमैरनेकै-
र्देहस्य शोषो[4] नरको च नान्यः ॥ ९४ ॥

भूतवाख्येन सिद्धेन नानको गदितस्तथा ॥
आचष्ट नष्टसन्देहः स्पष्टमद्वैतशासने ॥ ९५ ॥

---

१. स्वम्–क०
२. सुवाप–क०
३. पुद्दुग्गल–क०
४. शोषे–क०
५. गेरक्ष–क०

चल बालक ? गोरक्षं रक्ष ? दक्ष निजं वपुः ।।
योगस्य कलया कालादालापैरफलैरलम् ।। ९६ ।।

श्रद्धाविश्वासआशापरिणतिसुखदाश्चेन्न लोकप्रवृत्तिः ।।
कर्मण्येष्यत्फले भोः ? क्वचिदपि न भवेदैहिकामुष्मिकाख्ये ? ।।

सेवन्ते भूपमर्थं गुरुमपि विविधायोगसिद्धीः प्रबोधम् ।।
वाञ्छन्तः पुत्रपौत्रद्रविणगदहति स्वर्गकामाः सुरांश्च ।। ९७ ।।

सुराङ्गसन्धानसमुद्भवो मदो
रथाङ्गसंयोगसमुद्भवा गतिः ।।
यथा तथा भूतवितानजाचिति-
स्ततः क आत्मा पृथगप्युदीक्षितः ? ।। ९८ ।।

भूतानि चत्वारि मृतिश्च मोक्षः
कामस्तथार्थः पुरुषार्थ उक्तः ।।
प्रत्यक्षमेकं विदितं प्रमाणं
लोकायतं तन्त्रमिति प्रसिद्धम् ।। ९९ ।।

मोहाय देवद्विषतामतानी-
द्वाचस्पतिस्तत्तु कुतोऽवलोक्य[1] ? ।।
मां [2]मोहयस्यङ्ग ? नहीन्द्रियार्थै-
रलोभितास्तत्र यतो रमन्ते ।।१००।।

त्रिभिर्विशेषकम्

रुन्दन्तु देशान्तरसङ्गताय
विन्दन्तु नाथं गुरुणोच्यमानम् ।।

---

१. वलम्ब्य–क०
२. मोहस्य–क०

अमन्यमाना अनुमानशब्दौ
लोकेषु लोकायतिका विमूढाः ॥१०१॥

नेतासि गोरक्षसमीपमेतं
योगे न कायस्य दृढ़ीक्रियायै ॥
एतावदेवाध्यगमत्सयोग–
फलं यदा किं नु तदास्य सञ्ज्ञात् ? ॥१०२॥

आयुः परार्द्धद्वितयं यदीयं
चराचरं यः सृजति स्वशक्त्या ॥
परैति चेत् सोऽपि तदा किमन्ये
जालस्थमीनास्तरलीभवन्ति ॥१०३॥

मन्त्रान् साधय सावधानमनसा षट्कर्मसिद्धिप्रदान्[१]
सेवस्वातिरसायनानि भिषजां मुख्यैः प्रयुक्तानि च ॥
औत्सुक्यादजरामरत्वजनकानभ्यस्य योगाश्चिरं
जन्यं हन्त! वपुर्विनक्ष्यति सखे? काले किलातर्कितम् ॥ १०४॥

दृष्टी गुरुस्ते प्रथितस्वसिद्धि–
र्गोरक्षनामा धृतशिष्यसङ्घः ॥
योगीश्वरस्य प्रथितं गतोऽपि
प्रवृत्तिमार्गान्न विरज्यते यः ॥१०५॥

स नानकवचः श्रुत्वा भूतवा निर्गतस्ततः ॥
लहुरीयाः समायातः सचैनमिदमभ्यधात् ॥१०६॥

[1]हट्टस्थितिं किमजहाः ? किमु वा वणिज्यां ?
भक्ताधिकारमपि किं यवनेश्वरस्य ? ॥

1 हठयोगः ।
१. प्रदा–क०
२. विद्रूत्यते–क०

गार्हस्थ्यमुज्झितवता भवता किमर्थं ?
शून्ये वने विहरणव्यसनं धृतं नु ! ॥१०७॥

रुद्धप्राणमनोभिरिन्द्रियगणं निर्जित्य चित्तं चिरं
मैत्र्याद्यैः परिकर्मदुष्करतपः पूतैः सहस्रं समाः ॥
ध्यातो योगवरैर्नयो हि सुलभो बाल ? त्वया नूतनं
वैराग्यं वहता स किं ? स्वधिगमस्तस्माद् वृथा मां भ्रम ॥१०८॥

अनेकजन्मसंसिद्धस्ततो याति पराङ्गतिम् ॥
नह्ययं वासनाबन्धस्तोकेनैव विभिद्यते ॥१०९॥

नानको ज्ञानगम्भीरा गिरो भक्तिरसालसः ॥
लहुरीयाभिधं सिद्धं मोदयन्नवदन्मृदुः ॥११०॥

हट्टस्थितिर्वानपरः कृतिर्वा
गृहस्थता वाप्यवधूतता वा ॥
वस्तुन्यबुद्धे न फलाय किञ्चिद्
बुद्धे[1] विशेषस्तु न तत्र तत्र ॥१११॥

वेषस्तथापि प्रतिकार्यमन्यः
स्वभावतो भूमिपतेर्यथैव ॥
अन्यः सभायामपरोऽवरोध
आयोधनेन्यो मृगयासु चान्यः[2] ॥११२॥

स्वस्याभिमानमवधूय हि साधनाना-
मेकं तमेव भगवन्तमहं प्रपन्नः ॥
मामुद्दधार कृपया स भवापहारात्
दान्तं नितान्तमिव दन्तिनमन्तकान्तः ॥११३॥

---

१. इद्धे—क०
२. सुवान्यः—क०

तस्यैवाहं ममैवासौ स [1]एवाहमिति त्रिधा ॥
[2]प्रपत्तिस्तां हरौ कृत्वा तेन गुप्तो न शोचति ॥११४॥

मायेयमानायसमागुणाढ्या
विस्तारिता ये नतमेव गच्छन् ॥
[3]जीवो विमुच्येत यथैव मीनः
कैवर्तमन्या न गतिः[4] कथञ्चित् ? ॥११५॥

यो भक्तियोगेन सुसेवते मां
पुण्यात्पराद्व्यभिचारभाजा ॥
स ब्रह्मभूयाय गुणानतीत्य
प्रकल्पते वागियमीश्वरस्य ॥११६॥

विज्ञाय यः परमकारुणिकं परेश-
मात्मानमर्पयति ते[5]ऽहमिति[6] प्रवीणः ॥
मन्त्रानमुष्य बहुजन्मकृतान्विमृष्य[7]
सर्वाभयं स दिशति व्रतमेतदस्य ॥११७॥

स्त्रीशूद्रवैश्यपतितानपि यः पुनीते
भक्त्यार्पितैः[8] सपदि तुष्यति पत्रपुष्पैः ॥
नापेक्षते किमपि साधनमाप्तकामः
प्रेम्णैव भक्तिजनितेन सुलभ्यते सः ॥११८॥

---

1. भक्तिस्त्रिधा—(१) तस्यैवाहम् (२) ममैवासौ (३) स एवाहम् ।
१. स इवा—क०
२. प्रपतिस्तां—क०
३. नीवो—क०
४. गति—क०
५. हेत—क०
६. न्—क०
७. विमृश्य—क०
८. भत्क्यायितैः—क०

तावद्भयं विषयसङ्गकृतं च दैन्यं
शोकः स्वलोकविरहेण महांश्च लोभः ॥
तावन्ममाहमिति रूढमतिर्जनो यं
यावन्नयाति चरणं शरणं मुरारेः ॥११९॥

गोविन्दपादसरसीरुहरागरिक्ता
मुक्ताः कथञ्चिदपि ये स्वधिया भवन्ति ॥
किञ्चित्पदं समधिगम्य ततः पतन्ति
भक्तास्तु विघ्नमवधूय हरिं श्रयन्ति ॥१२०॥

लहुरीयास्ततोऽगच्छद् गोरक्षः पृच्छति स्म तम् ॥
यथार्थमूचे स च तं स न कुत्रापि सज्जते ? ॥१२१॥

गोपीचन्द्रस्ततोवादीत्पूज्यो नानकतापसः ॥
गोरक्षोऽब्रूत जानामि मानध्वंसोस्तु योगिनाम् ॥१२२॥

गुरो ? गच्छामि वीक्षिष्ये कीदृशो मुण्डमातृकः ? ॥
इति ब्रुवंस्ततोगच्छत्कङ्करः सङ्गरप्रियः ॥१२३॥

ऊचे स तं नानकबाल ? वग्धि
किं नाम ते ? केन विनैव तैलम् ? ॥
दीपो ज्वलेत् जीवति केन बालो ?
विना पयः पानमतीव पुष्टः ॥१२४॥

शरः कथं कार्मुकमन्तरेण ?
चलेत्कथं याति पुरं विषादः ? ॥
तालीं विना तालकमुद्घटेत ?
कथं ततो नानकः ? एनमाख्यत् ॥१२५॥

[1]ओङ्कारवाच्योऽस्मि न नामरूपयो–
ममाभिमानो गुरुणा सह त्वया ॥
[2]लोकैषणामात्रपरेण धावता–
धिगर्जितं ! किं नु? यतो यतिर्भवान् ? ॥१२६॥

उद्घारिते हृदयतामरसे स्वयुक्त्या
स्नेहं विना ज्वलति दीपक आत्मबोधः ॥
जीवः समाधिविधया परमं प्रपन्नः
पुष्टो विनैव विषयाभिधदुग्धपानात् ॥१२७॥

चेतः शरं क्षिपति भोः ? परमात्मलक्ष्ये
जीवो विनैव धनुषाभिनिवेशदार्ढ्यात् ॥
पादं विनैव सहसा गुरुवेदवाक्यै–
रात्मा प्रयाति नगरं परतत्त्वरूपम् ॥१२८॥

तालीं विनैवोद्घटते[1] हृदयग्रन्थितालकम्[2] ॥
छिद्यन्ते संशयाः कर्म क्षीयते तदनुग्रहात् ॥१२९॥

---

1. प्रश्नाः ? उत्तराणि ।
   क. किं नाम ? ओंकारः ।
   ख. केन तैलं विना दीपो ज्वलति ? आत्मबोधेन ।
   ग. केन बालो जीवति ? समाधिविधया ।
   घ. कथं कार्मुकमन्तरेण शरः चलति ? अभिनिवेशदार्ढ्यात् ।
   ङ. विपादः कथं याति ? गुरुवेदवाक्यैः ।
   च. तथा हृदयग्रन्थितालकन्तालीं विनैवोद्घरते ।
2. लोकैषणामात्रपरेण धावता त्वया धिगर्जितम् ! लोकैषणा, वित्तैषणा पुत्रैषणेति त्रिधा भवतीच्छा लोकस्य ।

१. वोद्घवते–क०
२. ग्रंणि–ख०

[३]गते ऋंगणनाथेऽथ लज्जिते मर्दनोऽवदत् ॥
ईश्वरोऽसि पुरः स्थातुं प्रतिवादी न ते क्षमः ॥१३०॥

नानकोऽवददीशेन गुरुर्मे दर्शितस्तथा ॥
यथा न कश्चित्पुरतः प्रत्यवस्थातुमीश्वरः ॥१३१॥

त्वत्तोपि मतिमांन् कश्चिद् ? गुरुस्ते कश्च ? कीदृशः ? ॥
[1]इति प्रश्नत्रये तस्य पुनरूचेऽथ नानकः ॥१३२॥

उच्चावचं पुरुषरत्नमियं प्रसूते
सृष्टिः खनिः सुविपुला जगदीश्वरस्य ॥
के के बभूवुरिह ? पुण्य कृतो न सन्तः
के के पुनर्न भवितार ? उदारचित्ताः ॥१३३॥

कबीरो रविदासश्च जातौ भागवतौ परम् ॥
बटालमण्डले भावी हंदालो जडियालजः ॥१३४॥

वरुणोऽरुणः कनकरोमशरीरो
यतिरूपधृन्मम समीपमुपेतः ॥
अगमं तदिङ्गितमवेत्य तटिन्या–
मनयत् स मां स्वभुवनं दयमानः ॥१३५॥

उपदिदेश च दैशिकसत्तमः
परमतत्वमसौ श्रुतिसम्मतम् ॥
अपजगाम नमस्तदनुग्रहात्
समुदियाय महो महदद्भुतम् ! ॥१३६॥

---

1. त्रयः प्रश्नाः मर्दनस्य ।
(१) अस्ति कश्चिद् गुरुः ?
(२) स कः ?
(३) कीदृशः ?

३. कङ्गर–ख०

दिनत्रयेण त्रैलोक्यं यादृशं यद्विनिर्मितम् ॥
यद् ब्रह्म त्रिगुणातीतं तदप्यवगतं मया ॥१३७॥

प्रचेतसश्चतुर्णां नः कृपा प्राचीनपुण्यजा ॥
यया मे योगवैराग्यज्ञानानामुदयः कृतः ॥१३८॥

तुष्टस्ततो मर्दन आबभाषे
प्रयाहि मेरुं महनीयकीर्ते ! ॥
सोऽब्रूत सिद्धेष्वधुना विचारः
सञ्जायते कश्चिदिहाभ्युपैति[T] ? १३९॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
भर्तृहर्यादिजयो नामैकादशः प्रस्तावः ॥

T. प्रस्तावेऽस्मिन् यतिवर्यस्य गोरक्षं तस्य शिष्यांश्च प्रति कथङ्कारं विजयः सञ्जात इत्यस्य चर्चा कृतास्ति। अथचावसाने वर्षितं केन कथं वा कृतो ज्ञानानामुदयो योगिवर्येण ?॥

द्वादशः प्रस्तावः

वाणी करोतु करुणां मयि यत्प्रसादान्
मूकत्वमेति सदसि प्रतिपादिवर्गः[१] ॥
धाराः स्फुरन्ति वचसां धृतशास्त्रमारात्
हारा इवोज्ज्वलयशः प्रसरा लसन्ति ॥ १ ॥

शिष्यानुवाच गोरक्षः कोऽधुना तं जिगीषति[२] ॥
ततः सङ्करनाथेन गृहीता [1]जयवीटिका ॥ २ ॥

आगत्य स जगादेदमादेशो मुण्डमातृक[३] ? ॥
अवाचि स्मयमानेऽस्मिन् ब्रूषे किं नेति ? चाब्रवीद् ॥ ३ ॥

योगीन्द्रो निजगाद तं तव गुरोर्माता मता मुण्डिता
यस्त्वां मुण्डितवान्मतिं न च ददौ कर्णौ वृथाऽपाटयत् ॥
हस्तेभ्रिस्तव मुद्रिका श्रवणयोर्दत्ता कुलाद् भ्रंशित-
स्त्वं मूर्खातन ? यो न कोपि विनयो योगेषु लब्धस्त्वया ? ॥४॥

[2]तेनापृच्छयत नानकः कथय भोः ? कामः कथं निर्जितः ?
क्रोधोहङ्कृतिलोभमोहममता मायाव्यतीताः कथम् ? ॥

---

1. जयवीटिका = नानकं जेतुं वीटिका गृहीता तेन ।
2. आस्तिकरीत्या प्रश्नानकरोत्सङ्करः ।
   (१) कामः कथं निर्जितः ? शमदमोदयात् ।
   (२) क्रोधादयः कथं व्यतीताः ? क्षमासन्तोषविवेकैः ।
   (३) केन कालो वञ्चितः ? अनश्वरेणात्मना ।
   (४) कथमवधूतो जातः ? त्रिगुणात्ययेन ।

१. प्रतिपादि–क०
२. धुनातः–क०
३. मुण्डमातृकः–क०

कालः केन च वञ्चितस्त्वमधुना ? जातोवधूतः कथं ?
हं हो ! पेषणकारिणीसुत[1] ? कुतो ज्ञानेन गर्वायसे ? ॥ ५ ॥

आचख्यौ[2] स शमोदमः स्मर जये क्रोधक्षये च क्षमा-
ऽहङ्कारे स्वलघुत्वभावनविधिर्लोभोऽपमर्दे पटुः ॥
सन्तोषो दृढमोहमर्दनकरः शास्त्रैर्विवेकः श्रितो
मन्मायाममताविनाशमकरोदीशो गुरुश्चार्चितः ॥ ६ ॥

आत्मा प्रतीतः खलु वेदवाक्यै-
रनश्वरस्तेन हतश्च कालः ॥
जातोऽवधूतस्त्रिगुणात्ययेन
पानीयहारीतनयोऽसि मूढ ? ॥ ७ ॥

सङ्गरस्तदनु नास्तिकरीत्या
मोहनाय यमिनो कृतवादम् ॥
ब्रूहि पण्डित ? क ईश्वर ? आत्मा-
[3]भ्रान्तिकल्पित उरीक्रियते रे ? ॥ ८ ॥

दृष्टः केनचिदीश्वरः ? क्वचिदपि ग्रन्थैः शठग्रन्थितै- ?
र्भ्रान्तिं मा व्रज नापि बोधयति तं सृष्टिः पितृभ्यां कृता ॥
स्वेदोत्था इव शाखिनो विपिनजाः केचिद्भवेति स्वतः ?
सर्वे तु प्रभवन्ति नैव विविधो वस्तुस्वभावो यतः ॥ ९ ॥

यः पर्वतान्निपतति क्षतमृत्युदाता
नान्योऽस्य किं तु नियतं[4] पतनक्रियैव ? ॥

१. कारिणि–क०
२. आचक्षौ–क०
३. भ्रान्त–क०
४. नियते–क०

सा च क्रिया झटिति कालविलम्बतो वा
दत्ते फलं न च तदर्थमुपेत्य ईशः[१] ॥ १० ॥

तं नानकोऽब्रूत कृताट्टहासो
विलासमेदं वचसां वितन्वन्[२] ॥
चार्वाकशिष्यः किमु ! सङ्गर ? त्वं
स्पर्शे स चैलं जलमाविशेते ॥ ११ ॥

स्वभावः स्वस्वरूपं वा ततो वान्यो[४] विलक्षणः ॥
आद्ये कारणकार्यत्वमेकस्यायाति बाधितम् ॥ १२ ॥

अन्त्येनेके प्रतिव्यक्तिस्वभावश्चेद् विलक्षणः ॥
कार्यानुमेयाः प्रत्यक्षं[५] गतं गौरवमस्ति ते ॥ १३ ॥

एकः स्वभावः सर्वेषां जनकश्चेत्स ईश्वरः ॥
अस्माभिरुच्यते नानासामग्र्याचित्रकार्यकृत् ॥ १४ ॥

अचेतनं चेतनसम्प्रयुक्तं
प्रवर्तते स्पन्दनवत् समग्रम्[६] ॥
धर्मोऽप्यधर्मो यदधिष्ठितोऽस्य
फलप्रदो विद्धि तमीश्वरं त्वम्[७] ॥ १५ ॥

आरूढेषु [८]नगं नरेषु बहुषु भ्रश्यन्ति केचित्ततो ?
मृत्युं तेषु च केऽपि यान्ति न परैर्वैचित्र्यमेतद्यतः[९] ॥

---

१. ईशाः–क०
२. वितन्यन्–ख०
३. संगरं–क०
४. नान्यो–क०
५. प्रत्यक्ष्यं–क०
६. समंगु–क०
७. त्वया–क०
८. नागं–क०
९. वैचित्र्यद्यतः–क०

धर्माधर्मविदा तदस्य जगतः कर्मानुसारात्फलं
केनेशेन विना प्रदीपत इदं जीवेन वा कर्मणा ? ॥ १६ ॥

क्षोभमुपेतः स्वोक्तिनिरासात्
सङ्करनाथस्तं पुनरूचे[1] ॥ १७ ॥

[1]इशोस्तु वा त्वं[2] कथमस्य संसृतौ ?
स्थितोऽसि केनास्य[3] पदं प्रयासि च ? ॥
न वार्यसे केन तदास्पदं ? व्रजं-
स्तदीयतामाशु च केन लम्भितः ? ॥ १८ ॥

भक्तौ ज्ञाने च वैराग्ये योगे च परिनिष्ठितः ॥
सङ्करेणेति संपृष्टः पुनराचष्ट नानकः ॥ १९ ॥

स्थितोऽहं संसारे स्वकृतफलभोगेष्वविकलो
गुरूणां वात्सल्यादभयपदमीशस्य[4] गमितः ॥
निरुद्धः[5] प्रत्यूहैर्न खलु जगदीशस्य कृपया
सतां सङ्गान्मामप्यगणयदसौ[6] स्वे परिकरे ॥ २० ॥

सङ्करो निरगमन्मणिशैलं
नानकः समगमत्समुदीक्ष्य[7] ॥

---

1. क + ख इत्युभयत्र प्रथमं द्वितीयं च चरणं नास्ति । अतः श्लोकार्धएवायमनु । पलब्धत्वात् ।

१. ईषो—क०

२. स्तुता—क०

३. आस्पदं—क०

४. सीशस्य—क०

५. निरुद्धा—क०

६. ष्यगणय—क०

७. त्सुमुदीक्ष्य—क०

धर्माधर्मविदा तदस्य जगतः कर्मानुसारात्फलं
केनेशेन विना प्रदीपत इदं जीवेन वा कर्मणा ?॥ १६ ॥

क्षोभमुपेतः स्वोक्तिनिरासात्
सङ्गरनाथस्तं पुनरूचे[1] ॥ १७ ॥

[1]इशोस्तु वा त्वं[2] कथमस्य संसृतौ ?
स्थितोऽसि केनास्य[3] पदं प्रयासि च ? ॥
न वार्यसे केन तदास्पदं ? व्रजं-
स्तदीयतामाशु च केन लम्भितः ?॥ १८ ॥

भक्तौ ज्ञाने च वैराग्ये योगे च परिनिष्ठितः ॥
सङ्गरेणेति संपृष्टः पुनराचष्ट नानकः ॥ १९ ॥

स्थितोऽहं संसारे स्वकृतफलभोगेष्वविकलो
गुरूणां वात्सल्यादभयपदमीशस्य[4] गमितः ॥
निरुद्धः[5] प्रत्यूहैर्न खलु जगदीशस्य कृपया
सतां सङ्गान्मामप्यगणयदसौ[6] स्वे परिकरे ॥ २० ॥

सङ्गरो निरगमन्मणिशैलं
नानकः समगमत्समुदीक्ष्य[7] ॥

---

1. क + ख इत्युभयत्र प्रथमं द्वितीयं च चरणं नास्ति। अतः श्लोकार्धएवायमनु। पलब्धत्वात्।

१. ईशो—क०

२. स्तुता—क०

३. आस्पदं—क०

४. सीशस्य—क०

५. निरुद्धा—क०

६. ध्यगणय—क०

७. त्सुमुदीक्ष्य—क०

मर्दनोऽवददहो ! किरणानां
खिन्नता[1] मणिगणस्य महात्मन् ? ॥ २१ ॥

नानकोऽब्रूत शैलोऽयं महामणिगणोज्वलः ॥
मणीनां किरणैर्धात्रा चित्रकर्म विनिर्मितम् ॥ २२ ॥

सुमेरुं व्रज योगीन्द्र[2] ? मर्दनेनेति कीर्तितः ॥
उवाच वाचं मधुरां[3] मा त्वरस्वेति नानकः ॥ २३ ॥

अथ मङ्गलनाथमुक्तवान्
गुरुरेतस्य गभीरचेतसम् ॥
व्रज नानकमानयेस्तथा
मम शिष्यो भविता यथा ध्रुवम् ॥ २४ ॥

ततोऽवदन्मङ्गलनाथनामा
परीक्षितो योगिवरैः स धीरः[4] ॥
योगीश्वरः सोऽपि भवानपीत्थं
कथं चिकीर्षस्यमुमङ्ग ? शिष्यम् ॥ २५ ॥

जिज्ञासुरल्पबोधो यः स शिष्यो विदुषो भवेत् ॥
समबोधस्तु सौहार्दमिच्छया कुरुते परम् ॥ २६ ॥

समप्रतिष्ठेषु परस्परं न तौ
भवन्ति सौरस्यमनोहरा गिरः ॥
गुणाननेकान्ध्रुवमुत्तरोत्तरं
सतामजर्य वितनोति सङ्गतम् ॥ २७ ॥

---

१. स्विन्नता—क०
२. योगीन्द्रं—क०
३. मधुरं—क०
४. स घोरः—क०

अथ होवाच गोरक्षो गोपीचन्द्रो भवानपि ॥
यथार्थं नानकं वेत्थः परेहङ्कारमोहिताः ॥ २८ ॥

पुच्छनाथस्तु तुष्णीक उदास्ते चर्पटस्त्विह ॥
[1]परेऽकिंचित्कराः सिद्धास्त्वं प्रयाहि यदीच्छसि ॥ २९ ॥

गोरक्षेणेति गदितो जगाम विनयान्वितः ॥
योगी मङ्गलनाथाख्यः सौजन्यगुणभूषितः ॥ ३० ॥

आदेशपूर्वमिदमाह स आगत स्म
योगीश ? नानक ? कृतार्थयता त्वयेह ॥
योगीश्वरानुपगतं तदितः प्रियं नः
स्रुते सुखं सुजनसङ्गतिरङ्ग? भूयः ॥ ३१ ॥

चरणौ स्प्रष्टुकामस्य तस्य हस्तौ स वारयन् ॥
स्वयं पस्पर्श चरणौ मङ्गलाख्यस्य योगिनः ॥ ३२ ॥

आदेश ओंकार कृतः सुयोगिन् ?
नायाहि भो मङ्गलनाथ ? सिद्ध ? ॥
इत्युक्तवान्नानकयोगिराज-
स्तं मङ्गलः प्रीतियुतो बभाषे ॥ ३३ ॥

[2]क्रमागतस्तापसमौलिरत्न ?
मनोरथं स्वे हृदये निधाय[3] ॥
त्वद्दर्शनायेति तदुत्तरे स
गोरक्षशिष्यः पुनराचचक्षे ॥ ३४ ॥

---

१. परो–क०
२. क्रमगतः–क०
३. विधाय–क०

योगीश्वराणां महदेव भाग्यं[१]
दद्यौ भवान् दर्शनमद्भुतं यत् ॥
आगच्छ गोरक्षगुरोः समीपं
[२]परस्परालापसुखानि सन्तु ॥ ३५ ॥

आगच्छामि शनैरहं व्रज पुरस्त्वं प्रोक्तवान्नानक-
स्तेनोक्तं भवतामिहै वरुचिरं भोज्यं मया नीयते ॥
तृप्तिर्मे तव दर्शनेन सुमते ? भोज्यस्य नैवार्थना
कोऽर्थः साधुसमागमाधिक इति ? प्रोक्तो गतो मङ्गलः ॥ ३६ ॥

जगाद मर्दनो योगी पूर्णो मङ्गलनामकः ॥
रिक्ताः परे समायान्ति [1]वितण्डावादपण्डिताः ॥ ३७ ॥

ऊचे यतिः सत्वरजस्तमोभि-
भिन्नस्वभावाः पुरुषा भवन्ति ॥
यदीदृशा[३] मर्दन ? सर्व एव
शून्यैव [४]शक्तिर्जगदीशितुः स्यात् ॥ ३८ ॥

मर्दनोऽब्रूत [५]गोरक्षशिष्योभूत्कथमीदृशः ? ॥
तदेतदबला देवी सबलो बलिरुच्यते ॥ ३९ ॥

ऊचेगुरुर्गुरुरयं खलु शिष्य एष
नामुं विभागमधिकृत्य हरेः प्रसादः ॥

---

1. वितण्डा = वादजल्पाभ्यामितरो विवादः ।

१. भाम्यं–क०

२. परस्वरा–०क

३. यदीदृणा–क०

४. सृष्टि–ख०

५. गोपक्षे–क०

य: श्रीपतिं विगतकैतव आश्रयेत[1]
तं स्वीकरोति भगवान् सकलान्तरात्मा ॥ ४० ॥

गमनाय नो दयति मर्दन नास्ति
यतिपुङ्गवः स्मितमुखो ? निजगाद ॥
इह शम्भुनाथ उपयाति सगर्व-
स्तमुदीक्ष्य [2]पर्वतमभीष्टमुपेहि[3] ॥ ४१ ॥

मङ्गलनाथादपि किं श्रेष्ठो ?
मर्दन ऊचे नानक आख्यत् ॥
मङ्गलनाथः सत्पुरुषोऽसौ
शम्भुरहंयुः सौम्य ? यथाऽन्ये ॥ ४२ ॥

मुद्रामभ्रि कुब्जयष्टिं दधानः
सिद्धेर्लभान्मानगर्वः प्रधानः ॥
जेष्यामीति प्रौढबुद्ध्या सनाथ-
स्तत्रायातस्तापसः शम्भुनाथः ॥ ४३ ॥

उक्त्वादेशमसावुवाच कलयेर्मुद्रामिमां कुब्जिका-
मभ्रिं बालक ? गच्च विक्षतमदो गोरक्षशिष्यो भव ॥
उत्तानं हृदयाम्बुजं कुरु हठाद्योगान्निरुद्धानिलो[4]
मार्गं शून्यपुरस्य पश्य परमं तेजोऽद्भुतं प्राप्नुहि ॥ ४४ ॥

सत्यसन्तोषसुभगोऽगम्यं निधिमवाप्नुहि ॥
एषोऽर्थस्तव गोरक्षं भजस्व[5] परमार्थतः ॥ ४५ ॥

---

१. आश्रयेते–क०
२. पर्वते–क०
३. मयीष्ट–क०
४. निरुद्धया–ख०
५. भजस्वे–क०

अक्षय्यं सुकृतं ददाति विहितं कर्मैव संसेवितं
तद् घोरान्नरकान्नयत्यपि सदा रागात्कृतं निन्दितम् ॥
ना मार्गेण फलं ददाति तदिदं श्रेष्ठं तु मार्गं श्रय-
द्देवैः किं श्रुतिमात्रसौख्यजनकैर्वेदान्तवाक्यैश्च किम्? ॥ ४६ ॥

तं नानकोपि निजगाद विमुद्र एव
त्रैगुण्यतो बहिरहं परितो भ्रमामि ॥
ते मुद्रितास्त्रिगुणपाशविगुम्फिता[१] ये
[1]कुब्जाग्निधारणपराः पशवो भ्रमन्तु ॥ ४७ ॥

दृष्ट्वा देवं मुच्यते सर्वपाशै-
स्तस्तात् पाशा मे समेऽपि प्रमुक्ताः ॥
प्रायं शून्यैर्मायिकैर्नामरूपैः
पूर्णानन्दं बोधरूपं पुरं तत् ॥ ४८ ॥

यः सत्यसन्तोषविधानलभ्यो
महात्मना यो निधिरप्रमेयः ॥
सन्दर्शितो मे गुरुणा परात्मा
गोरक्षमुख्या हि यतो यतन्ते ॥ ४९ ॥

गोरक्षसदृशाः शिष्यास्तिष्ठन्ति निधयो नव ॥
द्वारि यस्य प्रभावेण स गुरुर्मे विलक्षणः ॥ ५० ॥
प्राणायामैश्च योगैश्च न मे [२]किञ्चित्प्रयोजनम् ॥
निधावधिगते कस्मै ? निध्यञ्जनविधिश्रमः ॥ ५१ ॥
अज्ञानादेष संसारः कर्माप्यज्ञानतः कृतम् ॥
[३]बन्धकं तद्वयोर्नाशे ज्ञानादेव न चान्यथा ॥ ५२ ॥

---

1. हठयोगे मुद्रिका, मुद्रा, कुब्जयष्टिः, अग्निश्च धार्यन्ते । तान्निन्दति गुरुर्नानकः ।

१. घुम्फित–क०

२. किंचि- क०

३. बंधकं–क०

न कर्मणा न प्रजयेति वेद-
स्त्यागात्सबोधादमृतत्वमूचे ॥
फलं न नित्यं किल कर्मणोऽस्ति
दृष्टस्य चानुश्रविकस्य चापि ॥ ५३ ॥

क्षयातिशायित्वविशुद्धभावा-
त्स्वर्गे मुनिः पञ्चशिखोप्युवाच ॥
देवा न ते नोपनिषत्प्रमाणं
[1]प्राभाकराणामनुगोऽसि [१]शम्भो ? ॥ ५४ ॥

वेदोऽभिधत्ते प्रतिकर्मदेवान्
कथा पुराणेषु तथा सुराणाम् ॥
प्रसादकोपौ नृषु देवतानां
दृष्टौ नमस्ते सकलापलापिन् ? ॥ ५५ ॥

शब्दाः कार्यपराः प्रमाणमिति यत्प्राभाकरैरुच्यते
प्रामाण्यं न वदन्त्यहो उपनिषद्भागस्य पञ्चाप्यमी ॥
तन्[२]मन्दं तव देवदत्ततनयो जातस्तवाग्निर्गृहे
लग्नो वाक्यमिदं यदस्य कुरुते हर्षं च शोकं परम् ॥ ५६ ॥

गोरक्षोऽपि न ते निमज्जति हृदि ध्वस्ते [३]महाहङ्कृते-
स्त्वं जातोसि कुतोतिगर्वगहनः सिद्धानहो ! निन्दसि ॥
माहात्म्यं कथमीदृशं ? नु मलिनं तेहं वहन्नास्रवा-
नाविष्टस्त्वमथोन्मदिष्णुरसि वा क्रूराणि यद्भाषसे ॥ ५७ ॥

---

1. प्रभाकरः पूर्वमीमांसामनुसृत्य कर्मकाण्डाय प्रायतत । तस्य कृते ज्ञानस्य नास्ति कश्चिदपि महिमा ।
2. उन्मदिन्णुः विक्षिप्तः । अत्रशम्भोः क्रूरवचनं निन्दति नानकः ।

१. शम्भो–क०
२. मन्दो–क०
३. महाहुंकृते–क०

एवं शम्भुरभाषतैनमवदत्तं सोऽपि योगीश्वरो
गोरक्षं कलयामि जीवमबुधान् सिद्धान्न मन्यामहे ॥
यस्माज्जातमिदं ततोऽस्मि स ममाविष्टो हृदि प्रेरको
मालिन्यं वपुषामपैतु हि कथं ?मांसास्थिसंस्थानिनाम् ॥ ५८ ॥

युग्मम्

निन्दामि साधून्न कदापि बन्धून्
[1]पाखण्डिनः किन्तु तृणाय मन्ये ॥
माहात्म्यमीशेन ममातिदिष्टं
भवादृशैर्मत्सरिभिर्न नाऽयम्[2] ॥ ५९ ॥

ततो गतः [2]शम्भुरपृच्छदेनं
गोरक्षनाथः कथय प्रवृत्तिम् ॥
उन्मादवादं वदतीत्यवक्तः स
मङ्गलं पृच्छति स स्म भूयः ॥ ६० ॥

तेनोक्तं न निजापकर्षकथनं श्रेयस्तथाप्युत्तमा
मिथ्या नैव वदन्ति पश्यसि च तं यादृक् तथा निश्चिनु ॥
शम्भुः क्रुद्ध उवाच वच्मि बहुधा पक्षेऽस्य नूनं स्थित-
स्तच्छिष्यो भव मङ्गलोऽप्यभिदधौ को नाम दोषोऽत्र भोः ? ॥ ६१ ॥

न हीयते क्षुद्रजनैर्विनिन्दितो
महाजनो निन्दति नैव कश्चन[3] ? ॥
करोति निन्दां स्वयशो विनाशिनीं
सतां खलो वालिसता विलासतः ॥ ६२ ॥

---

1. नानकस्य गर्वोक्तिः ।
१. पाखण्डि—क०
२. शम्भु—क०
३. कंचन—क०

निन्द्यं न निन्दन्ति महानुभावा
अनिन्दितं निन्दति को न साधुः ?॥
न योगिनां निन्दनमस्ति धर्म्यं
त्वं पृच्छ गोरक्षगुरुं प्रतीत्यै ॥ ६३ ॥

शम्भुः प्रपच्छ गोरक्षं मङ्गलो वक्ति किं गुरो ? ॥
तूष्णीमेव स्थिते तस्मिन् गोपीचन्द्रोऽभ्यधादिदम् ॥ ६४ ॥

स्ववर्ग एवं कलहः किमर्थं ?
यथा तथा वास्तु सते न कोऽर्थः ॥
नास्मभ्यमेवाखिलसिद्धिपट्टो
विलिख्य दत्तो जगदीश्वरेण ॥ ६५ ॥

दिग्बन्धनं कर्तुमशक्यमेत-
न्मा भूत्परो योगविरागभूमिः ॥
यस्य प्रसन्नो भगवान्प्रयत्नैः
श्रयन्ति तं सिद्धसमाधिबोधाः ॥ ६६ ॥

पुनर्गोपीचन्द्र ऊचे [1]मङ्गलेनाभिनन्दितः[2] ॥
विवादस्तत्त्वबोधाय न विरोधाय योगिनाम् ॥ ६७ ॥

गोपीचन्द्रे मङ्गले च यथार्थमिति वादिनि ॥
व्रीडारोपपरीतात्मा शम्भुनाथो गतस्ततः ॥ ६८ ॥

विज्ञप्तो मर्दनेनाथ गतो मणिमयाद्रिरेः ॥
उड्डीय नानको मेरुं परिक्रामति यं रविः ॥ ६९ ॥

गोरक्षमुखान्नव तत्र नाथा-
न्सिद्धाँश्चतुःसिन्धुरसंख्यकाँश्च ॥

---

१. मङ्गल–क०
२. नन्दितः–क०

यतीनपश्याम च षट् प्रवीणान्
मिथः कथासु प्रवणानुपेत्य ॥ ७० ॥

नानकस्तानुवाचेदं निसर्गेण प्रियंवदः[१] ॥
नाथाः सिद्धाश्च यतयः आदेशः सर्वतापसाः ॥ ७१ ॥

आयाहि बाल ? सफलीकुरु जन्म तूर्ण-
मादेश आदिपुरुषस्य विशुद्धबुद्धेः ॥
अस्मै प्रदेहि चषकं ननु तीर्थपूर्णं-
गोरक्षनाथ इति वाचमुवाच तुष्टः ॥ ७२ ॥

ऋङ्गरः शीधु चषकं[1] पिबेत्युक्त्वा[२] समार्पयत् ॥
किमिदं ? कथमुत्पन्नमिति ? तं स्माह नानकः ॥ ७३ ॥

ततो ऋङ्गरनाथेन सनाथेनान्ययोगिभिः ॥
गोरक्षस्याशयं [३]बुध्वा गिर एता उदीरिताः ॥ ७४ ॥

इदममृतमतीव तुष्टिहेतुः
परमपवित्रमघौघविश्वहारि !
हरति सपदि दैन्यदुःख-
[४]चिन्तालयमधिकं मनसः करोति पीतम् ॥ ७५ ॥

[2]द्राक्षादिसन्धाय[५] निधाय यन्त्रे-
विधाय तापं कलयेद्[६] मपर्कम् ॥

---

1. चषकं=द्राक्षारसः, द्राक्षासवो वा ऋङ्गरनाथः श्लो० ७५ तः ८१ यावत् चषकं वर्णयति । "ख" इत्यत्र कंगर इति पाठः ।
2. चषकनिर्माणविधिः ।

१. प्रियम्वदः—ख०
२. त्युत्का—क०
३. वध्वा—ख०
४. चिन्ता—क०
५. सन्धाय—क०
६. कलयेथ—क०

स एव सद्भिर्विधिना निपीतः–
सिद्धीरनेका निदधाति पाणौ ॥ ७६ ॥

यत्रास्ति भोगो नहि तत्र मोक्षः
यत्रास्तिमोक्षो नहि तत्र भोगः ॥
[1]श्रीसुन्दरीतर्पणतत्पराणां
भोगश्च मोक्षश्च करस्थ एव ॥ ७७ ॥

प्रवृत्ते [1]भैरवीचक्रे सर्वे वर्णाः द्विजातयः ॥
निवृत्ते भैरवीचक्रे सर्वे वर्णाः पृथक् पृथक् ॥ ७८ ॥

न ये पिबन्ति प्रतनैर्मुनीन्द्रै–
रभ्यर्हितां मोहवशाः पुमान्सः ॥
सुरां महाभैरवदेवशेषां
तेषां विमुक्तिः खलु दुर्लभैव ॥ ७९ ॥

सौत्रामण्यां[2] कुलाचारे सुरापानं न दुष्यति ॥
इति तत्त्वविदः सन्तो निन्दकेभ्यो न बिभ्यति ॥ ८० ॥

पिबति यो रसमेतमपेतभी–
र्विपटलीकृतबोधविलोचनः ॥
विधिनिषेधमयादिह पाशतः–
स बहिरेति बिभेति न कालतः ॥ ८१ ॥

विषयामिषलुब्धानां गोष्ठीरगणयन् गुरुः ॥
उवाच नानकस्तत्र परमात्मसुखोम्भितः ॥ ८२ ॥

---

1. भैरवीचक्रे स एव प्रवृत्तो भवति अथवा भैरवीचक्रं तदैव प्रवृत्तं भवति यदा कश्चिद् भैरवदेवशेषां सुरां पिबति ।

2. सौत्रामणी = यज्ञो वेदविहितः ॥

१. "श्री सुन्दरी सेवनतत्पराणां" इत्यभियुक्तोक्तः पाठः ।

रागद्वेषकषायविषयमधूकं सुखं गुडं क्षिप्ता ॥
भाण्डे विचारनामनि वैराग्याग्निं प्रदीप्य कृष्टेन ॥ ८३ ॥

मानसनलिकायन्त्रे निश्चयनाम्ना सुशौण्डिकेनालम् ॥
प्रेम्णा परमस्य पुंसो मधुना पीतेन सह सद्भिः ॥ ८४ ॥

ध्यानावदंशसेवी मत्तोऽहं तन्मयं जगत् पश्यन् ॥
गलिताऽहं-मम भावः पामरपेयं न बहु मन्ये ॥ ८५ ॥

त्रिभिर्विशेषकम्

स्मृतिं द्वादशादिव्रतं बोधयन्तीं
विहातुं महाज्ञानिनो यूयमास्त ॥
अधिक्षेपवाक्ये परेण प्रयुक्ते
ज्वलन्तो भवन्तो हि किं ज्ञानिनो न ? ॥ ८६ ॥

उत्पादयन् महामोहं पीतं कतिपयैः क्षणैः ॥
ज्ञानस्य साधनं मद्यमद्यश्रुतिपथं गतम् ॥ ८७ ॥

तोषं स्थिते सङ्गरनाथनाम्नि सिद्धाःस्वबुद्धेरनुरूपमूचुः ॥
विख्यातकीर्तियतियोगिमुख्यस्तत्राख्यदेवं किल पर्वताख्यः ॥८८॥

पराङ्मुखः परललनाधनादितो–
न यौवनद्रविणमदेन यो हतः ॥
समाहितः प्रविदितनादबिन्दुकः
प्रपद्यते सपदमरूपरेखकम् ॥ ८९ ॥

ईशो वदञ्जपतपो[1] नियमैः सशौचैः
चेतो निगृह्य विहितैर्गृहमेधिनोऽपि ॥

---

१. जपति–ख०

सिद्धं व्रजन्ति परमां किमु वीतरागाः
भिक्षाभुजः सुरसरिज्जलशुद्धिचित्ताः ॥ ९० ॥

गोरक्षोऽभ्यधित-शरीर-शोषणं-
यो वैराग्याद्विषयरसास्पृहःकरोति ॥
प्रारब्धक्षपणकृतक्षणोऽवधूतः
पूतः स व्रजति भवं भवं विहाय ॥ ९१ ॥

योगशोधितशरीरमनोभिः
कामकोपरहितैर्यमिमुख्यैः ॥
ब्रह्मलभ्यमितरैः सुदुरापं-
चर्पटो विकपटो वदति स्म ॥ ९२ ॥

उदासीनो लोके नियतमध ऊर्ध्वं परिमृशन्
पुरेशानं ग्रन्थिं शशितपनयोर्योगकलया ॥
सुषुम्नायां बिभ्रत् यजति न तनुं मृत्युविजयी
यतिर्गोपीचन्द्रोऽवददिति वितण्डोऽनुभवतः ॥ ९३ ॥

वैराग्ये विषयेषु सर्वसमये विभ्रत्समीरक्रियो-
न्नीते हृत्कमले विभाव्य विमले ज्योतिः परं सन्ततम् ।
तस्मिन्मायिकविश्ववस्तुविधुरे चित्तं स्थिरं स्तम्भवत्-
कुर्याद् भर्तृहरिर्मुमुक्षुषु परां शिक्षामिमामभ्यधात् ॥ ९४ ॥

किं मृत्योः परिहारतः ? किमु चिरं सञ्जीवनोपायतः ?
किं छायातपसेवनाय ? तपनात्किं कर्णभेदादिभिः ?॥
संसारी न नचावधूत उदितः संशुद्धबुद्धौ क्वचित्-
बुद्धः कायमनः क्रियाभिरसि ? नेत्थाख्यद् गुरुर्नानकः ॥ ९५ ॥

---

१. जल–क०

कामक्रोधमदाभिमानममतामूढो हृषीकैर्जितः-
सिद्धिं विन्दति को नु दुर्लभतरां लुब्धो भवे भूयसि ? ॥
तस्मात्तत्प्रविहाय निर्जितमना भित्त्वा दृढां वासनां
कश्चित्तत्त्वमुपैति चर्पट इति प्रोवाच वाचांनिधिः ॥ ९६ ॥

कामक्रोधमदाभिमानममताहङ्कारितानात्यजं
नान्यस्यापनयेन दण्डमयते धन्यो नृपे धार्मिके ॥
भुञ्जानो विषयान्नियत्युपननान् वात्सल्यतः सद्गुरो-
स्तत्त्वं प्राप मपेतमोह इति तं श्रीनानकोऽभाषत ॥ ९७ ॥

गृहीत्वा शिवं शक्तिमद् वा विमुञ्चन्
मनोनिग्रहात्क्रोधकामादिजेता ॥
जनः पारमायाति संसारसिन्धोः-
पट्टश्चर्पटो वाचमेतामुवाच ॥ ९८ ॥

शिवोमेऽस्वरूपं ग्रहस्तस्य कीदृङ्-
न शक्तेः परित्यागतः कश्चिदर्थः ? ॥
मनः किन्नु कुर्याद् भवाम्भोधिपारे ?
स्थितोस्मीत्यवोचद् गुरुर्नानकस्तम् ॥ ९९ ॥

नित्यं जानाम्येकमोङ्कारवाच्यं-
न स्वप्नेऽपि द्वैतमातर्कयामि ॥
पञ्चाग्रे मे पञ्चविंशत्युपेता-
लीलामात्राद् विश्वनाभं सृजन्ति ॥१००॥

रसनां त्रितयं चतुष्टयं न-
ममोदाहरति ध्रुवं यते ? ॥

---

1. चर्पटनानकसम्बादः श्लो० ७४ तः १०२ यावत् यत्र नानको महामहिमशालिनो महिमानं तं वर्णयति ।

नवसप्तदशापिसंयतान्
नियतं ज्ञानगुणेन विद्धि मे ॥१०१॥

चतुर्दशैकविंशतिर्मया पुरोपवाहितः ॥
न सन्ति खेशयश्च मे तथैव पश्चसम्मतिः ॥१०२॥

घुघ्घूनाथं वीक्ष्य तूष्णीकमेव–
स्मेरास्योऽमुं नानको व्याजहार ॥
त्वं किं तूष्णीं तिष्ठसि प्रौढयोगिन् ?
वाचश्चित्रा ब्रूहि मित्रार्थरम्याः ॥१०३॥

पृष्टो वारिपतिः सुतेन भृगुणा ब्रह्मावदन्मौनतः
शब्दानां हि [1]चतुष्टयी प्रसृतिरित्येतत्तु निर्धर्मकम् ॥
अप्राप्यैव निवर्ततैव रमते वाचा न संब्रह्मतो ॥
घुघ्घूनाथ इदं जगाद मुदितस्तेनाभवन्नानकः ॥१०४॥

चरणेऽपतत्तमथ नानकं यतिः स उवाच
स उवाच वेत्सि किमुभेदमुत्तम ? ॥
तमुवाच नानकगुरुर्भिदावयोः
कथमस्तु वस्तुगतभेदमस्ति चेत् ॥१०५॥

घुघ्घूनाथो नानकोऽन्योन्यनम्रौ–
चम्बानाथं जोषमासीनमूचे ॥
योगीन्द्रस्त्वं किंनु तूष्णीं स्थितोऽसि ?
वाचो ब्रूयास्त्वन्मतस्यानुरूपाः ॥१०६॥

चम्बानाथोऽब्रूत वाचामभूमि–
र्मन्तव्यो यो वस्तुना देशकालैः ॥

1. चतुष्टयीशब्दानां प्रवृत्तिः (महाभाष्य) ।

आत्मा ज्ञेयश्चेतसा शोधितेन-
तद्वै मुख्ये किं प्रलापैरनल्पैः ? ॥१०७॥

धन्योऽसि धन्या जननी धन्यो गुरुरनुत्तमः
धन्यस्तवोपदेशश्चेत्यब्रवीन्नानकस्ततः ॥१०८॥

चम्बानाथो मङ्गलो घुघ्घुनाथो
पीनानाथो नानकं श्लाघमानाः ॥
प्रापुः प्रीतिं भूयसीं साधुसङ्गे
सम्वादिन्यो मोदयन्ते गिरो हि ॥१०९॥

कनकसिन्धुरिति प्रथितो यतिः
सुरतिसिंह इति प्रथितिं गतः ॥
निरतिसिंह यतस्तदमर्षणात्-
क्रुधमधुर्महतीमबुधन्ततः ॥११०॥

गोपीचन्द्रो मङ्गलश्चाभ्यधाता-
मेते कोऽयं ? किं वृथैव व्रजन्ति ? ॥
सिद्धाः शृङ्गं हारिणं चर्म चाग्रि
सौत्रीं मालामुत्क्षिपन्ति स्म रोषात् ॥१११॥

तेपूङ्गीनेष्वाहतुःस्म स्मितास्यौ
गर्वाक्रान्तौ शृङ्गरः सङ्गरश्च ॥
कुण्ठः कस्मान्नानका भूरिदानीं
योगीन्द्राणां शक्तिमालोक्य चित्राम् ॥११२॥

तत्र स्मेरो नानकः पादुकां स्वा-
मूचे व्योमारोह रे ? पादुके मे ॥

---

1. हठयोगिनां वस्तु माकाश उड्डीयमानं दृष्ट्वा नानकोपि स्वां पादुकामाशे प्रेषयामास ।
तद् दृष्ट्वा गोरक्षः पुनराह प्रश्नान् नानकम् ।

सातङ्गीना योगिनामारुरोह-
चर्मादीनां मूर्ध्निऽधोधो गतानाम् ॥११३॥

गोरक्षं मङ्गलोऽब्रूत किं दृष्टो नानकस्त्वया ? ॥
नानकोऽसौ मया पृष्ट इत्युक्त्वा सोऽब्रवीत्पुनः ॥११४॥

[1] कियदङ्गुलिः परिमाणं व्योम ? कियत्तारकायुक्तम् ? ॥
कति पत्राणि महीरुहि ? कति वर्षति वासवो धाराः ? ॥११५॥

मेरुः किं परिमाणो ? वद गुरुता किं कृता जगति ? ॥
कथय कलौ कति देवाः ? कतिकृत्वो नानकायासीः ? ॥११६॥

इति गोरक्षनाथेन पृष्टो नानकतापसः ॥
क्रमादुशनसा[2] पृष्टो देवाचार्य इवावदत् ॥११७॥

चतुरङ्गुलपरिमाणं व्योमयुतं तारकाभ्यां च ॥
द्वे पत्रे च महीरुहि वर्षति नव वासवो धाराः ॥११८॥

मेरुगिरिश्च सपादप्रस्थमितौ गौरवं जगति ॥
दैवकृतं कृतबुद्धैः कलियुग एकः स्मृतो देवः ॥११९॥

सकृदप्यहमागच्छं गोरक्षं नानकोऽवादीत् ॥
इति वाणीमथ कंथरिनाथः सिद्धस्तमप्राक्षीत् ॥१२०॥

---

1. शुक्र–बृहस्पतिसम्वाद इव गोरक्षनानकसम्बादः ।
2. प्रश्नाः ? उत्तराणि कियदङ्गुलिपरिणामं व्योम ? चतुरङ्गुलिः ।
कियन्तारकायुक्तं ? तारकाभ्याम् ।
कति पत्राणि महीरुहि ? द्वे पत्रे ।
वासवः कतिधाराः वर्षति ? नव ।
मेरुः किं परिकाणः ? सपादप्रस्थम् ।
जगति गुरुता किं कृता ? इतो गौरवम् ।
कलौ कति देवाः ? एकः ।
कतिकृत्वो नानकायासीः ? सकृत् ।

को [1]गुरुः कश्च शिष्योस्ति ? किं मूलं कं च मेलकम् ? ॥
एकाकी किं गृहीत्वा स्यात्कायोऽयं किंमयो मतः ? ॥१२१॥
तस्मिन् शक्तिश्च कस्यास्ति ? वृत्तिः केनेति कथ्यताम् ॥
को नाऽमरपुरं याति विचार्य वद नानक ॥१२२॥
शब्दो गुरुर्धृतिः शिष्यो मनोमूलं च मेलकः ॥
पवनो ब्रह्मतत्त्वेन ज्ञातेनैकाकितां व्रजेत् ॥१२३॥
पञ्चभूतमयः कायः शक्तिस्तत्रेश्वरी मता ॥
सत्यस्य सततावृत्तिर्वेद शब्देन केवलम् ॥१२४॥

1. प्रश्नाः ? उत्तराणि
को गुरुः ? शब्दः ।
कः शिष्यः ? धृतिः ।
किं मूलम् ? मनः ।
कः मेलकः ? पवनः ।
एकाकी किं गृहीत्वा स्यात् ? ब्रह्मतत्त्वम् ।
कायः किं मयः ? पञ्चभूतमयः ।
तस्मिन् कस्य शक्तिः ? ईश्वरी ।
वृत्तिः केन ? वेदशब्देन ।
का नाडिः ? नवशतानि ।
कति सन्धयः ? षोडषशतीः ।
कः वपुषि शोषकः ? पवनः ।
वसति कुत्र मनः ? हृदि ।
" " पवनः ? अधिनाभि ।
कुतोध्वनिरुदेति ? प्राणेभ्यः ।
कः पञ्चगुरुः ? मनः ।
कः पचति ? अग्निः ।
किं दिशागमनम् ? उत्तरेणागमनं दक्षिणे न गमनम् ।
आदेशः क्रियते कस्मै ? मुखाय ।
कस्योपदेशतः ? तस्य ।
मनसः कः संस्कारः ? ज्ञानम् ।
ज्ञानस्य किं लक्षणम् ? सन्तोषः ।

सार्वभौमः प्रधानः कः ? को नृपो ? ग्रामणीश्च कः ? ॥
नानकोऽब्रूत नगरी तनुरात्मात्वधीश्वरः ॥१२५॥

इन्द्रियाणि प्रधानाः स्युर्मनो राजा समीरणः ॥
ग्रामणीरिति तेनोक्ते कंथडिः पुनरभ्यधात् ॥१२६॥

वसति कुत्र मनः पवनः स च ?
ध्वनिरुदेति कुतो ? वद केन वा ? ॥
भवति पञ्चगुरुः क इहोच्यतां ?
पचति कोऽशितपीतमनारतम् ? ॥१२७॥

हृदि मनः पवनस्त्वधिनाभि भो ?
वसति पञ्चगुरुर्मन एव च ॥
ध्वनिकरः किल प्राणसमीरणः
पचति वह्निरिति प्रजगौ यतिः ॥१२८॥

कंथडिः पुनरुवाच यतीन्द्र
किं दिशागमनमागमनं च ? ॥
नाड्यः कति च सन्धिसमेताः ?
शोषणो वपुषि कः कथयस्व ? ॥१२९॥

कोमलो वलजमत्र च कीदृङ् ?
नानकस्त्वथ तदुत्तरमूचे ॥
उत्तरेण कलयागतिमत्र
दक्षिणेन गमनं च मनुष्व ॥१३०॥

कीर्तिता नवशतानि धमन्यः
सन्धि षोडशशतीमवगच्छ ॥
शोषकः पवन एव शरीरे
सम्भवो मल उदाहियते च ॥१३१॥

द्वारमस्य कथयन्त्यविचित्य
कंथडे ? शृणु पुनः स जगाद ॥
अस्ति किं परिचयेन ? समाधि-
र्याति कस्य नियमेन न विन्दुः ? ॥१३२॥

ब्रह्म केन च भवत्यपरोक्षं ?
याति केन विलयं किल माया ? ॥
नानकोऽथ निजगाद गरीया-
नीश्वर प्रणयतोऽस्ति समाधिः ॥१३३॥

याति चित्तनियमेन न विन्दु-
र्ब्रह्मबोधत उदेत्यपरोक्षम् ॥
सद्गुरोर्विलयमेति च माया
कन्थडिः पुनरपृच्छदथैनम् ॥१३४॥

[1]आदेशः क्रियते कस्मै ? स च कस्योपदेशतः ? ॥
मनसः कोऽस्ति संस्कारः ? किं नु ज्ञानस्य लक्षणम् ? ॥१३५॥

मोक्षस्य कथितं द्वारं किं नु ? नानक ? कीर्तय ॥
नानकोऽवददादेशो मुखे तस्योपदेशतः ॥१३६॥

ज्ञानं चित्तस्य संस्कारः सन्तोषो ज्ञानलक्षणम् ॥
मोक्षस्य कथितं द्वारं सद्गुरुर्नैतरो यते ? ॥१३७॥

1. प्रश्नाः ? उत्तराणि
१. आदेशः क्रियते कुत्र ? मुखे ।
२. आदेशः कस्योपदेशात् ? तस्य सर्वमयस्य ।
३. मनसः कः संस्कारः ? ज्ञानम् ।
४. किं ज्ञानस्य लक्षणम् ? सन्तोषः ।
५. मोक्षस्य किं द्वारम् ? सद्गुरुः ।

उर्मनाथो धर्मनाथ आगतावथ कोपतः ॥
उर्मनाथोऽब्रवीदग्नौ धक्ष्यामि त्वां निरर्गल ! ॥१३८॥

गम्भीरेऽम्भसि मज्जयामि लवशः कृन्तामि गात्राणि ते
भूमौ त्वां निखनामि मूढ ! विदधे तूर्णं चपेटान्मृतिम् ॥
आकाशे लयमातनोमि तव रे ! याभ्याः शतं याचना
यच्छाम्यक्षमया करोषि कुमते ! साधो ! मदुक्तं न चेत् ॥१३९॥

त्वां दुर्विनीतसिद्धानां पातयामि पदे पदे ॥
गोरक्षदीक्षां नादत्से तदा पश्यसि मे बलम् ॥१४०॥

उक्तं नानकयोगिना जडमते ! का शक्तिका ते ! यया
दृप्तः शक्तिमवेहि मे गुरुकृतां वह्नौ चिरं तिष्ठतः ॥
प्रालेयं पिबतो हिमाचलसमं लोहाचलद् गच्छतो
भूमिं च क्षिपतो नभस्तुलयतस्तूलं तुलायां यया ॥१४१॥

वर्द्धेय विन्ध्यादधिकं सरोषा-
दगस्त्यवच्छोषयितास्मि सिन्धुम् ॥
नाथेन सिद्धन्नसि मूढविद्धा-
नमून्नयेयं वृषभानिवात्र ॥१४२॥

कुर्यां स्वयङ्कारयिता परांश्च
पराक्रमं च क्रमते कुयोगिन् ! ॥
भ्रूभङ्गतो भस्मकरोस्मि तूर्णं
भवादृशां कार्मणकारिणां च ॥१४३॥

सर्वापि शक्तिः खलु सत्यनाम्न
ईशस्य गर्वो मम नात्र कोऽपि ॥
कुल्येव तोयं सरसः कृपाऽस्य
परत्र सामर्थ्यमभिव्यनक्ति ॥१४४॥

अथोर्मिनाथो यतिनं जगाद
भक्ताधिकारिन् ? शृणु नानक ? त्वम् ॥
विना गुरोस्ते किमु वस्तुबोधः ?
सिद्धिश्च तुभ्यं ननु केन दत्ता ? ॥१४५॥

किं नीयते जन्म मुधैव ? मुग्ध ?
गोरक्षपादौ प्रणम स्वभक्त्या ॥
दीक्षां तदीयामधिगम्य रम्यां
ख्यातस्त्रिलोक्यां भव भव्यतेजाः ॥१४६॥

तमब्रवीन्नानकयोगिराजो
भक्ताधिकारी भगवान्न चान्यः ॥
लक्षाणि वेदाष्टमितानि जन्तून्
यो जीववत्यन्नजलादिदानाद् ॥१४७॥

गुरुं गरीयांसमसौ दिदेश
वात्सल्यतस्तस्य च वस्तुलाभः ॥
सत्सिद्धयः पादतलं श्रयन्ति
क्लेशाः परित्यज्य गता अशेषाः ॥१४८॥

ऊँकारवाच्यो न किलावबुद्धो
भ्राम्यस्यबोधो गुरुणा समेतः ॥
लोकोक्तिरेषा न मृषा प्रसिद्धाऽ-
सिद्धः स्वयं साधयते परान् हि ॥१४९॥

निरर्थकं जन्म भवादृशानां
पाखण्डिनां मोहपरिप्लुतानाम् ॥
अहं मदीयाश्च समे कृतार्था
गुरोः प्रसादात्समवाप्य सिद्धिम् ॥१५०॥

घगरोऽथ जगाद कः[1] पिता ?
जननी का ? गुरुरस्ति कश्च ते ? ॥
निजदेशमुदीरयस्व रे ?
कतमं मार्गमुपेयिवानसि ? ॥१५१॥

योगी रोगी वासि भोगी वियोगी
संयोगी वा जङ्गमो वावधूतः ॥
हर्षोऽमर्षः कुत्र ते ? वास्ति तर्षः
क्लेशध्वान्तं याति कस्य प्रकाशात् ? ॥१५२॥

गिरो निशम्य घागरी-
र्गरीयसां गुरुस्तदा ॥
उवाच नानको यमी
यमीशभागमूचिरे ॥१५३॥

सन्तोषो जनकः क्षमा च जननी सत्यं गुरुः काश्यपी
सर्वोऽयं विषयो विगानविषयो मार्गो न मे कश्चन ? ॥
नात्यन्तं मयि वास्तवो विगणितो योगो वियोगोऽथवा
क्लेशध्वान्तहतिर्भवेन्न नितरामात्मप्रकाशादृते ॥१५४॥

गोरक्षस्तमथाब्रवीत्कथमहो ! योगं विना ते मनो
वश्यं वश्यतया विनाश्य च कथं जातः प्रबोधोदयः[1] ? ॥१५५।

---

1. प्रश्नाः ? उत्तराणि ।
१. कः पिता ? सन्तोषः ।
२. का जननी ? क्षमा ।
३. को गुरुः ? सत्यम् ।
४. कस्तव देशः ? विषयः ।
५. कं मार्गमभिलषसि ? न कश्चित् ।
६. कोसि, योगी, वियोगी, संयोगी वा ? न वस्तुतः कश्चित् ।
७. केन क्लेशध्वान्तहननम् ? आत्मप्रकाशात् ।

१. घुघनाथ–क०

मोक्षो बोधमृते कथं ? परिगतो जातः कृतार्थः कथं ?
वाग्मिर्मेदिकमत्सि तृप्यसि परं बालो यथा नानक ? ॥१५६॥

कोन्यः कलौ कथय योगकलोपदेष्टा
मामेतरो नयति सिद्धिमुपेत्य शिष्यान् ।
तन्मे मतं प्रविश धारय कुण्डलादिं
योगीश्वरो विहर विश्वतले स्वतन्त्रः ॥१५७॥

स्रोतः शुद्धिं कर्मभिः षड्भिरादौ
कृत्वाभ्यस्ते कुम्भके चित्तजित्या ॥
वायौ वश्ये चामनस्कं प्रपन्नो
मुक्तो योगी ह्यन्यनाख्यातिभागी ॥१५८॥

अपानमाकुञ्च्य निरुध्य यत्ना-
त्प्राणं रसज्ञामपि लम्बिकायाः ॥
उपर्युपानीय निरन्तरं योऽ-
भ्यस्येत्स शीघ्रं समुपेति सिद्धिम् ॥१५९॥

आपादादेर्ब्रह्मरन्ध्रावधीह
देहे भूतान्याहुरङ्गस्थितानि ॥
तान्यभ्यासाद्योगिनो जेतुरेत-
ल्लक्ष्मस्पृष्टं दृश्यते सिद्धिशंसि ॥१६०॥

आरोग्यं लघुता तनोः कफमलाल्पत्वं स्वरः सौरभा
क्षुत्-तृण्-मर्षणमुग्रकण्टकपयः पङ्केष्वसङ्गस्तथा ॥
बह्वन्नाभ्यवहारितोष्णसहता दूराच्छ्रुतिदर्शनं
मेकस्येव गतिर्भुवि क्षितिरुहे कैशीनभश्चारिता ॥१६१॥

अष्टैश्वर्यविचित्रशक्त्यधिगमः कामं त्रिकालज्ञता
भूम्यादेर्विजये क्रमेण कथिताः पञ्चैर्गुणाः पञ्चभिः ॥

सौषुम्नीं सृतिमाश्रिते च पवने नादोऽष्टधा श्रूयते
विन्दुर्वह्नितडिद्भचन्द्रतपनाकारस्ततो भासते ॥१६२॥

प्रवेशः पाषाणे वियति गमनं चन्द्रकिरणान्
गृहीत्वारम्भादि-त्रिदशवरनारीसुलभता ॥
अकुण्ठः सङ्कल्पः करतलगतस्येव जगतो
विलोकस्ते सिद्धयेद् भजसि यदि योगि ! त्वमधुना ॥१६३॥

अव्याहता स्वैरगतिस्त्रिलोक्यां ?
स्थिरश्चरश्चापि वशे प्रपञ्चः ॥
अखण्डदानं धनदान्महर्द्धे-
स्तव प्रवर्तेत परं किमिष्टम् ॥१६४॥

कं मनोरथमाधाय हृदि मां त्वमिहागतः ?
वद तत् पूरयेयं ते मुधा माभूत्परिश्रमः ॥१६५॥

नानकस्तदनु सर्वबुधोऽपि
सर्वशक्तिरपि शीलसमृद्धया ॥
मन्दमन्दमिदमाख्यदमन्दो
नन्दयन्सुजनयोगिसमाजम् ॥१६६॥

दृष्टानुश्रविकं सदोषमखिलं बोद्धुर्विरक्तिर्न चेद्-
भक्तिर्योगकलाक्रिया बहुविधा रिक्तैव संलक्ष्यते ॥
वैराग्ये सति सर्वमेव सफलं प्रीत्यै यदारभ्यते
गोविन्दस्य विशोधनाय मनसो लब्धुं च भूम्नोऽस्यदाम् ॥१६७॥

तपस्यया योगबलेन चापि
वैरञ्च्यमासाद्य पदं प्रसन्नः ॥
न श्लाघनीयो मम कोपि मर्त्त्यो ?
विना शरीरत्रितयव्ययेन ॥१६८॥

सप्तद्वीपा जलधिरशना तत्र सिद्धाः सहस्रं
हं हो ! योगं कथयति भवान् कुत्र कुत्र प्रयातः ? ॥
तस्मादीशः सुकृतसुहिता[1] देशिकानां स्वरूपै-
स्तस्मै तस्मै दिशति दयया योगवैराग्यबोधान् ॥१६९॥

योगेन सिद्धयः सन्तु साक्षान्मोक्षाय कल्पते ॥
नासौ ज्ञानोदयद्वारा किन्तु नापवदामि तत् ॥१७०॥

योगस्य तारकं ज्ञानं फलं विद्यास्तु सिद्धयः ॥
शुद्धिसाम्ये हि कैवल्यं सत्वस्य पुरुषस्य च ॥१७१॥

द्रष्टुः स्वरूपेऽवस्थानं समाधौ परिकीर्तितम् ॥
वृत्तिसारूप्यमन्यत्र योगज्ञैरेव वर्णितम् ॥१७२॥

स्वप्नेन्द्रजालवदलंगलिते प्रपञ्च
आविद्यके स्फुरति चात्मसुखं समन्तात् ॥
मिथ्या शरीरसुखदुःखमवेक्षमाणो
ज्ञानी सदा वहति बोधसमाधिमुद्राम् ॥१७३॥

कर्णभेदपथगस्य मम स्यु-
र्द्वादशैव भवतो मतशाखाः ॥
सर्व एव मम सम्प्रति मार्गा
भ्रातरः सकलसाधुजनाश्च ॥१७४॥

उपदेश एव मम कर्णविभूषा
हिमघर्मवातसहनं पृथु कन्था ॥
परितोष एव महती खलु ऋद्धि-
र्जगदीशनाम कथनं वरनादः ॥१७५॥

अव्याहताज्ञो जगदीश एव
नान्यः समूर्तित्रयमाकलय्य ॥

करोति विश्वव्यवहारमाज्ञां
विनास्य वातोऽपि न वाति सौम्य ? ॥१७६॥

गुरोः सुरतरोरहं सपदि पूर्णकामोऽभवं
न किञ्चिदवशिष्यते मम मनीषितं सम्प्रति ॥
भ्रमामि तु भवादृशान् कुतुकतो दिदृक्षुः सत-
स्ततः खलु विरम्यतां मम मनोरथापूरणात् ॥१७७॥

मङ्गलोऽब्रूत गोरक्षं दीक्षितो नानको गुरो ?
सोऽवदन्मङ्गलं सौम्य ? दीक्षितो न परीक्षितः ॥१७८॥

भवादृशाः सत्यमुदीरयन्ति
ज्ञानी च योगी च परं विरक्तः ॥
भक्तस्तथा नानक इत्यमुष्य
शिष्यस्य वाणी गुरुणानुमेने ॥१७९॥

प्राणनाथः समागम्य[1] ततो नानकमब्रवीत् ॥
का मुक्तिरस्ति ? का युक्तिः ? आरोग्यं केन जायते ? ॥१८०॥

किं साधनं विमुक्तेश्च ? लक्षणं किमुदाहृतम् ? ॥
केन वा लभ्यते योगो ? वद नानक ? तापस ? ॥१८१॥

---

1 प्राणनाथनानकसंवाद.—
प्रश्नाः— उत्तराणि ।
क. का मुक्तिः ? भगवदनुसरणम्
ख. का युक्तिः ? नीरोगता ।
ग. आरोग्यं केन ? दोषक्षयात् ।
घ. विमुक्तेः किं साधनम् ? उपदेशः ।
ङ. ,, ,, लक्षणम् ? अशुभाशुभैरविकृतिः ।
च. योगः केन लभ्यते ? अभ्यासेन ।

उक्तं नानकयोगिना भगवतः स्मृत्यामविघ्नप्रदं
प्रारब्धोऽपनतं सहाश्रितजनैः संतुष्य यद्भुज्यते ॥
सा मुक्तिर्भगवज्जनानुसरणं युक्तिश्च नीरोगता
दोषाणां समता मता प्रतिहता सा संसृतेः संक्षयात् ॥१८२॥

ब्रह्मज्ञादुपदेश एव कलितो मुक्तेर्महत्साधनं
संसारोह्यशुभाशुभैरविकृतिस्तस्याः परं लक्षणम् ॥
अभ्यासेन समाधिसिद्धिरुदिता वैराग्यतश्चोत्तमा-
दीशस्य प्रणिधानतः प्रतिदिनं हे प्राणनाथाथवा ! ॥१८३॥

प्रासदत्प्राणनाथोऽथ पपात यतिपादयोः ।
तेन पृष्टपदश्चेदमवदत्साश्रुलोचनः ॥१८४॥

धन्योऽसि नानक ! समादिगुणैरुपेतो
नूनं गुरोस्त्वयि कृपा महती परस्य ।
तुष्टोऽस्म्यहं खलु निरञ्जनदर्शनेन
त्वत्तो निरञ्जन ! विभोश्च न कोऽपि भेदः ! ॥१८५॥

नानकोऽवददमोहमदानां ज्ञानिनामिति सदातनशैली ॥
तुच्छमप्यतितरां गणयन्ति वीक्ष्य विष्णुमखिलेषु वसन्तम् ॥१८६॥

वीक्षितोऽयमिति नानकयोगी
प्राणनाथमिति मञ्जुल ऊचे ॥
उक्तवान् स तममेयमहिम्न-
स्त्वं यथार्थमकरोः स्तवमस्य ॥१८७॥

प्राणनाथमवदत्परितुष्टो
मर्दनः सुभगवागयमार्यः ।
नानकेन कथितं गतमोहाः
साधवः सुभगमेव वदन्ति ॥१८८॥

नवानां[1] नाथानामथ कथय षण्णां च यतिनां
श्रुतानां सिद्धानामपि चतुरशीतेश्चिरतरम् ।
त्वमाख्याः प्रख्याता मम कुतुकतो मर्दन इति
प्रवक्ति स्म स्मेरास्यगददखिलं नानकगुरुः ॥१८९॥

गोरक्षनाथो मत्स्येन्द्रो मङ्गलश्चर्पटस्तथा ।
घुघ्घुनाथः प्राणनाथो गोपीनाथस्तथैव च ॥१९०॥

चम्बानाथोऽथ सुरतिनाथस्तव नवोदिताः
यतीनामपि नामानि शृणु ख्यातानि मर्दन ! ॥१९१॥

गोरक्षो दत्तआत्रेयो हनुमान् भैरवस्तथा ।
लक्ष्मणो भीष्मवर्मा च यतयः षट्प्रकीर्तिताः ॥१९२॥

कङ्करः सङ्करश्चैव सघरो ऋंगरस्तथा ।
ऊर्मो धूर्मः कनीफाश्च हनीफाश्च सुविश्रुतः ॥१९३॥

लहुरीयाः सङ्करश्च हाजीरश्च स संहरः ।
कन्थडिः सुरतिर्वृद्धिः पूर्णनाथकजालकौ ॥१९४॥

तथा केवलकर्णश्च शम्भुर्विविधलङ्ककः ॥
गौराङ्गुलो शरनिधिर्निरतिः पर्वतस्तथा ॥१९५॥

I. नवसिद्धाः

१. गोरक्षनाथः
२. मत्स्येन्द्रः
३. मङ्गलः
४. चर्पटः
५. घुघ्घुनाथः
६. प्राणनाथः
७. गोपीनाथः
८. चम्बानाथः
९. सुरतिनाथः

यतयः षट् :—

१. गोरक्षः
२. दत्तात्रेयः
३. हनुमान्
४. भैरवः
५. लक्ष्मणः
६. भीष्मवर्मा ।

ईश्वरो धगरो भर्तृहरिः शमरतस्तथा ॥
रामायतश्च चतुरवचनोग्रघनस्तथा ॥१९६॥

प्रथितो भूतवाः सिद्धस्तथैव कनकाभिधः ॥
अच्छेदनोऽथपलकनिधिपिप्पवकस्तथा ॥१९७॥

शिवरामः केशकर्णो गिरिबोधस्तथैव च ॥
सालसो मग्रधारश्च तथा गयलसः स्मृतः ॥१९८॥

चलनानाचितो मुक्तीश्वरो गिरिवरस्तथा ॥
उक्तः सूरायनः सिन्धुरायनः प्रीतिपानकः ॥ १९९॥

ज्योतिर्लिंग्नः शीतजलो विमलज्योतिरेव च ॥
ज्योतिर्मग्नश्च तुलसी योगो भोलशरस्तथा॥२००॥

विष्णुपानो कालनीरस्तथा रामकुमारकः ॥
सिद्धः कृष्णकुमारश्च तथा शङ्करयोगकः ॥२०१॥

वर्मयोगो गुहावासी तथा सूरसती स्मृतः ॥
मीरजो वीरगान्धारस्तथा मीरहुसेनकः ॥२०२॥

सकलन्दरो नीनी च नरेन्द्रनयनस्तथा ॥
सगोवर्द्धनसेनश्च नीलाक्षी कलसंग्यपि ॥२०३॥

एकरङ्गी कर्मनाशी मूलमन्त्री प्रकीर्तितः ॥
तथा केवलकर्मीचात्मरूपी क्लेशधूप्यपि ॥२०४॥

उक्तः कुलविलासी च तथा योगयती स्मृतः ॥
योगगम्भीरनामा च दीपरङ्गी प्रकीर्तितः ॥२०५॥

खलासो मुद्गलो योगी योगी केदारपूर्वकः ॥
तथा विहङ्गमो योगी सम्भालकविचित्रकौ ॥२०६॥

सिद्धाश्चतुरशीतिस्तु कथिताः[१] प्रथिता भुवि ॥
ग्रथिता [२]योगसिद्धैर्येऽव्यथिता न भवाधिभिः ॥२०७॥

मर्दनेन कथितं कथमुक्ता
एत एव यतयो यतिवर्य ? ॥
कामिनिग्रहपरा बहवोऽन्ये
तापसा जगति विश्रुतचर्याः[1] ॥२०८॥

नानकेन भणितं शृणु सौम्य ?
याति शुक्रमितरस्य कथञ्चित् ? ॥
ऊर्ध्वरेतस इमे दृढयोगाः
स्वप्नजागरणसंयतवीर्याः[2] ॥२०९॥

गन्तव्यमग्रे यदि गच्छ साधो ?
इत्युक्तवान्मर्दन नामधेयः ॥
किं बालसिन्धो ? गुरुणेति चोक्तो-
ऽहमब्रुवं तं भवतो यथेच्छा ॥२१०॥

गोपीनाथो मङ्गलः प्राणनाथो
घुघ्घूनाथो यान्तमेनं परीत्य ॥
ऊचुस्तिष्ठास्माकमानन्दहेतोः
किं कृत्यं ते ? सिद्धगोष्ठीगरिष्ठ ? ॥२११॥

कृत्यं साधुसमागमो न तु परं तज्जातमेवाधुना
संसारस्तु गुरोरभाजि कृपयोङ्कारैकवाच्यस्मृतैः ॥

---

1. श्लो० १९३ तः २०८ यावत् ८४ सिद्धानां नामानि ।
2. यद्यपि कामिनिग्रहपरा. बहवो यतयः सन्ति तथापि तत्र एत एव तेषु ऊर्ध्वरेतस इति कथनसङ्गतिः ॥

१. चतुरणी—क०
२. द्वयो—ख०

युष्माकं रतिरस्तु केवलमिति प्रार्थ्यं मया ज्ञानिने-
त्युक्ता नानकयोगिना जिगमिषा युक्तेन ते व्याहरन् ॥२१२॥

नैरञ्जनी त्वयि कृपा महती बभूव
ज्ञानोदधिर्निरवधिर्विमलो जजृम्भे ॥
आज्ञामवाप्य जगतामधिपस्य गच्छ
पन्थाः शिवोस्तु तव नानक ! निर्विकार ! ॥२१३॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
सिद्धसम्वादो नाम द्वादशः प्रस्तावः ॥

त्रयोदशः प्रस्तावः

वाचस्पतित्वमगमद्धिषणः स्तवेन
यस्यां सुरेन्द्रगुरुता गुरुतावदग्र्यम् ॥
वाल्मीक्युपज्ञमितरे कवितागुणं च
वाणीं भजे द्रुहिणकण्ठनिवासिनीं ताम् ॥ १ ॥

नानको मर्दनो बालस्त्रयस्ते वयमुद्गताः ॥
ततो [1]व्यारङ्गिरिं प्राप्ता मर्दनो विस्मितोऽवदत् ॥ २ ॥

कुत्रागताः ? कश्चिदिहापि ? सिद्धि-
श्चेदस्ति किं ? नेत्रपथं न नेया ॥
गुरुर्जगौ सप्तसहस्रमत्र[2]
सार्धं त्वमागाः खलु योजनानाम् ॥ ३ ॥

व्यारो गिरिरयं सौम्य ? सर्वसिद्धशिरोमणिः ॥
दत्तात्रेयोऽवधूतोऽत्र स्वपित्यजगरोपमः ॥ ४ ॥

गत्वा ततः [१]समशिलातलतल्पशायी[२]
दत्तो व्यलोकि विगताखिलमोहबन्धः ॥
पद्मेक्षणो विसृतपिङ्गजटः[३] सुवक्षा[४]
नग्नः पिचिण्डलतया रमणीयरूपः ॥ ५ ॥

---

1. व्यारगिरिर्यत्र दत्तात्रेयः स्वपिति स्म ।
2. योजनानां सप्तसहस्रम् = १४००० कोशपरिमितम् ।

१. तल्प—क०
१. शायी—क०
३. गतः—क०
४. मुमुक्षा—क०

अस्माभिः प्रणतो न किञ्चिदवदद् दत्तस्ततः प्रोक्तवान्
योगीन्द्रो वपुषि स्थिते कथमहो ! कर्म त्यजेत्कायिकम् ? ॥
सम्भाषादिभिरर्चयन्ति सततं यद्वीतरागक्रुधः
क्षुद्रानप्युपसङ्गतान् प्रतिजनं सन्तो विदन्तो हरिम् ॥ ६ ॥

दत्तोऽवदच्छृणु परेण न कश्चिदर्थः ?
सम्भाषणादिभिरहं [1]स्वसुखानुभूतिः ॥
हंसो जयत्यविरतामजपामयत्नाद्[1]
ध्येयं निरावरणमात्ममहो परोक्षम् ॥ ७ ॥

तं नानकोवददपास्तसमस्तमोहं
कस्त्वां परः प्रतिवदेदपरावरज्ञः ॥
किं तु ब्रवीमि ? भवदुक्तिषु सन्दिहानो
मत्वा कमन्यमिदमास्य ? परेण नार्थः ॥ ८ ॥

तत्त्वज्ञदृष्टिमवलम्ब्य यदीदमुक्तं
ब्रह्मातिरिक्तमसदेव तदापरः कः ? ॥
स्वीकृत्य चेदभिहितं व्यवहारसत्तां
सम्भाषणादिरहितो व्यवहारवर्गः ॥ ९ ॥

अजपयापि[2] विमुक्तजनस्य किं ?
किमु ? मनीषितमस्य हि शिष्यते ? ॥
इदमनुग्रहणाय परस्य चे-
दतिथिसत्कृतिरप्यपराह[3]ता ॥१०॥

---

1. अजपाजपः । यदा हंसः (सुषुम्णायां स्थितः शम्भुः) अनवरतम्नयत्नाद् सोहम् इति जपति तदा स अजपा जप इति कथ्यते ।

१. रहःस्व—क०

२. यामि–क०

३. हना–क०

सो[1]ऽहमित्यजपया स्मरणीयं
विस्मृतस्य महसः खलु रूपम् ॥
स्वप्रकाशमहसामपरोक्षे
तत्र तत्र भवतां किमु यत्नः ? ॥ ११ ॥

पूर्वं जपन्तो जगदीशमेव
सिद्धिं व्रजत्यस्य[१] कृपावशेन ॥
संस्कारतस्तं च जपन्ति भूयः
प्रारब्धशेषेण तनुं दधानाः ॥ १२ ॥

दत्तस्ततो नानकमित्यवादीद्
[२]गुरूंश्चतुर्विंशतिमाश्रितोऽहम् ॥
बहु व्यथा [३]संप्रति तेन नार्थो
लब्धे फले व्यर्थ उपायसङ्गः ॥ १३ ॥

दाम्पत्यमनुमोदन्ते कन्यकाः पुत्रिकागतम् ॥
पश्चालिका विमुञ्चन्ति सत्ये पत्यौ तु सङ्गते ॥ १४ ॥

[2]आहूयते हि दूरस्थो न तु संनिधिसंस्थितः ॥
परोक्षस्य जपो विष्णोः प्रत्यक्षस्यावलोकनम् ॥ १५ ॥

जपसि किं खलु ? नानकतापस ?
स्मरसि कं मनसः प्रणिधानतः ? ॥

---

1. अजपाजपेन 'सोहं' इति स्मरणीयः ।
2. परोक्षमपिविष्णुमजपयाक्ष्णोः समक्षमानयन्त्यवधूताः ।

१. व्रजेत्य—क०
२. गुरुं—क०
३. व्यसंप्रति—क०

ऋतमुदाहर, कामिह देवतां ?
त्वमियता[1] वयसा[2] निरभावयः ॥ १६ ॥
तमुवाच नानकयतिः शृणु सौम्य ?
प्रणवं जपामि [3]मनुमन्त्रमुदस्य ॥
परदेवता प्रकटिता जगदीशो
जगतीजनुस्थितिलयैकविलासी ॥ १७ ॥
दत्तात्रेयः स्मेरवक्त्रो बभाषे
मिथ्या वाच्यं तापसैर्नो कदापि ? ॥
प्राञ्चः श्रान्ता यत्कृते भूरिकालं
त्वामात्मानं दर्शयेदञ्जसा सः ॥ १८ ॥
[4]निरञ्जनो निराकारः स कथं दृष्टिगोचरः ? ॥
यदि दृष्टो वद तदा किं रूपः ? किं परिच्छदः[1] ? ॥ १९ ॥
पुनरुवाच यतिर्यतिनां पते ?
वदसि सत्यमदस्तदपि प्रभो ? ॥
न कृपया किमुदेति ? भवादृशा–
मसुलभोऽपि स[2] भक्तिवशंवदः ॥ २० ॥
जीवोपाध्यनवच्छिन्न चेतने रतिरुत्तमा ॥
भक्तिस्तयैव मुच्यन्ते ब्रह्मसंस्थाम्[5]तत्वतः ॥ २१ ॥

---

1. दत्तो नानकं निरञ्जनस्य विष्णो रूपं कथयितुं कथयति "किं रूपः किं परिच्छद" इत्यादिना ।

2. विष्णुः ।

१. त्वमिव—क०

२. तापय—क०

३. जपगममनु—क०

४. विरञ्जनीतकथं—क०

५. मृत्वतः—ख०

ज्ञानं भक्तेरङ्गं लोकाद्गीता गिरश्चापि ॥
योगो भक्तौ ज्ञाने प्रयाजवच्चाङ्गतां भजति ॥ २२ ॥

साधनभक्तेर्ज्ञानं
[1]ज्ञानात्फ[१]लभक्तिरुत्पन्ना ॥
साक्षादात्मपदस्थिति–
हेतुर्भक्तैरुदीर्यते स्पष्टम् ॥ २३ ॥

क्वचित्प्ररूढस्त्वनुराग एव
ज्ञानानपेक्षः प्रददाति मुक्तिम् ॥
गोप्योऽनुरक्ताः स्मरकोटिकान्ते
कृष्णो विमुग्धा अपि मुक्तिमापुः[२] ॥ २४ ॥

[2]श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ॥
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ २५ ॥

इयं नवविधा भक्तिः करोति परिशीलिता ॥
अनुरक्तिमपि च्छिन्नां प्रेमाश्रुपुलकाङ्किताम् ॥ २६ ॥

मृदुनि मनसि सत्वभाविते सा
भवति पुरातनपुण्यबीजजन्मा[३] ।
[3]अलमलमितरेण साधनेन
प्रकटमियं कुरुते परं पुमांसम् ॥ २७ ॥

1. साधनभक्तिः फलभक्तिश्च ।
2. नवधा भक्तिवर्णनम् ।
3. भक्तिरेव सर्वश्रेष्ठं साधनमिति ।

१. फलं—क०
२. मापुः–क०
३. जन्या–क०

मनसो[1] वचसोऽप्यगोचरः
स दुराराध्यतरः परः पुमान् ॥
भजते भजतां मनोनुगं
नयनानन्दकरं कलेवरम् ॥ २८ ॥

भक्तच्छन्दानुवर्तित्वं मुकुन्दस्य परिस्फुटम् ॥
प्रह्लादवचनात् स्तम्भादाविरासीन्नृकेसरी[2] ॥ २९ ॥

तमालनीलः कनकावदातया
श्रिया समेतः समुदीय माधवः ॥
निहन्ति तापं सकलं घनाघनो
यथा जनानां तडिता सहोदितः ॥ ३० ॥

अभिनवघननीलकायकान्तिः
कमलदलद्युतिशोणकोणनेत्रः ॥
शरदिजशशिसुन्दराननश्री–
मुकुटमणिप्रभया [3]हृतान्धकारः[3] ॥ ३१ ॥

श्रवणसुभगकुण्डलः सुनासो
भुजधृतचक्रगदादरारविन्दुः[4] ॥
उरसि भृगुपदाङ्क[5]वैजयन्ती–
रविरुचिकौस्तुभकान्तिभिर्मनोज्ञः ॥ ३२ ॥

---

1. ३१ तः ३५ यावत् विष्णुस्तुतिः ।

१. मनसां वचसाम्–ख०

२. नरकेशरी–क०

३. हृतांधका–क०

४. विन्दः–क०

५. पादांक–क०

कनकरुचिरमम्बरं दधानो
गरुडगतो रमया समाश्रितश्च ।
जयविजयमुखैरुपेतपार्श्व-
श्चमरधरैः सुरसन्निभैर्निषेव्यः ॥३३॥

सकलभुवनबीजमादिदेवः
सदयविलोकनवर्द्धितात्मवर्गः ॥
निजजनकरुणागृहीतमूर्तिः
श्रुतिगणगीतकथो मया व्यलोकि ॥३४॥

चतुर्भिः कालापकम्

श्रीवत्सवक्षसमुदारचतुर्भुजाग्रं
जाग्रन्महामणिमयूखकृतप्रकाशम् ॥
[1]फल्गूदरं कुटिलकुन्तलमायताक्षं
[1]स्मेराननं स्मरति शार्ङ्गधरं मनो मे ॥३५॥

कथयेय कथं विभोर्विभो ?
महतीं लोचनलोभनीं श्रियम् ॥
गरुडोऽपि यथा भुजङ्गभुक्[२]-
कमला चाति चला नियन्त्रितौ ॥३६॥

सनकादिनारदभवादशसिद्धा
[2]विगतैषणागतकृताकृतशोकाः ॥

---

1. स्तोत्रमनुहरतीदं भीष्मकृतश्रीमद्भागवतीयं स्तोत्रम् ।
तदात्रास्ति छन्दसः साम्यं बहुशो भावसाम्यं च ॥

2. एषणा भवति त्रिधा-पुत्रैषणा वित्तैषणा लोकैषणा च । ता अप्यैदंयुगीना एव ।

१. फलादरं–क०

२. युक्त–क०

सततं भजन्ति भगवन्तमभुं
यन्महनीयमोहनगुणोस्ति हरिस्तत् ॥३७॥

पश्यसि सदैव देवं
भक्तिज्ञानामृतो दधि त्वमसि ॥
यदि तु परीक्षितुमिच्छसि
मया समं गच्छ वीक्षस्व ॥३८॥

दत्तात्रेयः प्रासदत्तस्य वाक्या–
दूचे सत्यं नानक ? त्वं ब्रवीषि ।
भक्तौ ज्ञाने योगवैराग्ययोश्च
स्थेम्ना दृष्टस्ते गुरोः सूपदिष्टः ॥३९॥

नारदेन कथितं खलु मह्यं
तारणाय जगतो गतमोहः ॥
नानकोऽवतरति स्म कलौ स
ज्ञानवानिति कलैव मुरारेः ॥४०॥

आव्रजेत्क इतरो हि सुमेरौ ?
सर्वशक्तिसहितस्य न गर्वः ।
कस्य वा भवति कालमहिम्ना ?
त्वं ततो भगवतो ध्रुवमंशः ॥४१॥

त्वां दिदृक्षुरहमत्र विवक्षु–
राविरासमुपयातमवेत्य ॥
मादृशाः कलियुगे जनभीताः
प्रायशः प्रकटतां न भजन्ति ॥ ४२ ॥

ज्ञानभक्तिसुविरक्तिकथाऽपि
दुर्लभैव कलुषे कलिकाले ॥

दाम्भिकाः प्रकटयन्ति कुतश्चि-
[1]जीविकापरिणतामतदर्हाः ॥ ४३ ॥

बोधयन्ति खलु शिष्यगणेभ्यो
यत्र तत्स्वहृदये कलयन्ति ॥
घोषयन्ति [2]षडदोषतया यत्
तोषमात्मनि च ते न भजन्ति ॥ ४४ ॥

सर्वमेतदिति दुष्करमस्मिन्
सत्वहारिणि कलौ पुरुषाणाम् ॥
रामनामवरमन्त्रजपं तत्
पारमश्वय जनानुपदिश्य ॥ ४५ ॥

श्रद्धाभक्तिविवर्जितैः खलु जनैः[3] कर्तुं न किञ्चित् क्षमं
मालिन्यान्मनसः समाधिविधुतिर्ज्ञानोदयो दुर्लभः ॥
धर्मग्लानिमुदीक्ष्यते न भगवद्धर्मोपदेष्टाभवा-
नादिष्टः स्वकलाकलौ भगवता तुभ्यं नमो नानक ! ॥ ४६ ॥

नानकस्तं [4]नमन्नूचे [7]हसन्महिमकीर्तनम् ॥
कुरु त्वमीशोऽलर्काय प्रह्लादाय च बोधदः ॥ ४७ ॥

आत्मैव भूरि तपसे हरिणा [5]प्रसद्य
दत्तात्रये [6]त्वमसि सूनुरगाधबोधः ॥

---

१. जीविकाय—क०
२. षरदोष—क०
३. जनैक—क०
४. स्तन्नमन्—क०
५. प्रसुद्य—क०
६. तत्तात्रये—क०
७. नसन्महिम—क०

त्वद्दर्शनं परिपुनाति जनान् कृपालो ?
किं वर्णये तव गुणान् गणितान् पुराणे ? ॥ ४८ ॥

दत्तात्रेयो नानकश्च परस्परनतिस्तुती ॥
व्यधत्तां स्मेरवदनो मर्दनोऽहं च विस्मितौ ॥ ४९ ॥

श्रुत्वाथ नानकगुणानिति बालसिन्धोः
सार्धत्रयप्रहरवर्तिसमाधिमुग्धः ॥
ऊचेऽङ्गदः पुनरुदञ्चितचित्तवृत्ति-
र्भूयः कथा भवतु भव्यकरी भवेऽस्मिन् ॥ ५० ॥

औत्सुक्यादीक्षितमुखः सर्वैः सामाजिकैस्ततः ॥
बालसिन्धुरुवाचेमां कथां श्रोतृमनोहराम् ॥ ५१ ॥

वैणिकोऽवददितश्चल साधो ?
साधवो यदि परेऽपि विलोक्याः ॥
उज्जगाम गुरुरद्भुतशक्ति-
र्मर्दनेन च मया च समेतः ॥ ५२ ॥

उन्मयूखमणिभासुरशृङ्गेऽ-
वातरामधरणीभृतितुङ्गे ॥
मर्दनेन कथितं कथयस्व
को गिरिः ? क इह साधुधुरीणः ? ॥ ५३ ॥

पर्वतोऽयमनलाञ्चितनामा
साधुरत्र च विरोचनतातः ॥
नानके कथयतीति गिरं नः
पक्षिणो परिमिताः परिवव्रुः ॥ ५४ ॥

ते विचित्रगरुतः शिखराभा-
स्त्रोटिकोटिपटुकुट्टनकामाः ॥
वीक्षिता न च कदापि धरित्र्यां
मर्दनस्य मम भीतिमकुर्वन् ॥ ५५ ॥

पक्षिणां प्रभुरवोचदथैषां
मानुषीं गिरमुदारशरीरः ॥
नीयमान इव मार्दवमुच्चै-
र्नानकस्य महसा महितेन ॥ ५६ ॥

[1]आकाशपक्षिण इमे तव मानुषस्य
दृष्ट्वाऽन्तरिक्षगमनं कुपिताः प्रकामम् ॥
त्वामर्दयन्ति कथमामशरीरधारी
भ्राम्यस्यगम्यमितरैर्गगनं प्रपन्नः ॥ ५७ ॥

मन्त्रौषधीविविधयोगकलाचलेन
मर्त्यो भवेद्गहनगाहनशक्तिशाली ॥
नैतावता सुर इवायमटेत्स्वतन्त्रो
भक्ष्येत भूतनिवहेन नभश्चरेण ॥ ५८ ॥

अस्माभिरुज्झिताभूमिरण्डमाकाश एव नः ॥
उद्भिद्य[१] शिशुरुद्गच्छेद्विहरेद्गगने ततः ॥ ५९ ॥

न स्थले जलजो जीवेत् स्थलजोपि जले न च ॥
न व्योम्नि भूमिजस्तद्वद् व्योमजोपि न भूतले ॥ ६० ॥

---

1. स च पक्षिणां प्रभुः नानकं ५६ तः ६२ यावत् कथयति यत् कथं स तत्रागतः केन प्रेषित इति ।

१. उद्भिद्य—क०

पिपीलिकानां हि पुरातनीनां
पक्षोपलब्धिर्मरणार्थमेव ॥
युष्माकमाकाशगतिस्तथैव[1]
किमर्थमत्रागमनं ? वदध्वम् ॥ ६१ ॥

प्रेषितः केन ? किं नामा ? किमर्थं गगनाङ्गने ?॥
धावसे तावदफलं स्वस्य प्रौढिं विदर्शयन् ॥ ६२ ॥

नानकः स्मितमुखस्तत ऊचे
विद्धि नो वपुरपक्कमिदं नः ॥
तादृशं कथमनर्गलमश्वेद्
दुर्गमं गमनमार्गमिमं तम् ॥ ६३ ॥

नाम नानक इति प्रथितं मे
कामना न पटुता प्रथनस्य ॥
आममेतदखिलं कथमस्तु ?
रामकीर्तनमृते परिपाकः ॥ ६४ ॥

[1]ईशितारमवलोकितुकामा-
स्तत्कृपैकशरणाश्चलिता स्मः ॥
[2]आम्रसेकपितृतर्पणरीत्या
त्वद्विलोकनमवाप्तुमसाधो ? ॥ ६५ ॥

नानकस्य गिरं श्रुत्वा [3]सोनलाचीननामकः ॥
ऊचे प्रणम्य नितरामितरानपसारयन् ॥ ६६ ॥

---

1. विष्णुम् ।
2. आम्राश्च सिक्ताः पितरश्च प्रीणिता इति न्यायः ।
3. अनलाचीननामा गिरिशिखरशायी ।
१. मति—क०

श्रुत्वपूर्वयशाः प्रशान्तचित्तो
विदितस्त्वं खलु नानकोऽसि योगी ॥
भवता कृपया कृताः कृतार्था-
वयमेते गिरिरेष पावितश्च ॥ ६७ ॥

[1]प्रह्लादं वदति जनो वसन्तमत्र
कुत्रास्ते स इति ? मर्दनस्तमूचे ॥
तेनोक्तं गिरिशिखरे वसत्यमुष्मि-
न्नास्माकं स तु नृपतिर्मुकुन्दभक्तः ॥ ६८ ॥

ततस्त्रयः सर्वत उन्नतं तं
गता वयं पर्वतमेकशृङ्गम् ॥
समाहितस्तत्र विलोकितोऽभूत्
प्रह्लाद आह्लादकरो जनानाम् ॥ ६९ ॥

[1]किरीटरत्नद्युतिदीप्यमानः
स्फुरन् महाकुण्डलशोभिकर्णः ॥
विशालवक्षस्थललम्बहारो[2]
धृताङ्गदाभ्यां रुचिरो भुजाभ्याम् ॥ ७० ॥

करस्फुरत्कङ्कणरत्नरोचिः
पीतं वसानस्तनुपट्टवस्त्रम् ॥
प्रांशुर्नवाम्भोधरनीलकान्तिः
सुवैष्णवव्यञ्जनशोभमानः ॥ ७१ ॥

गृहस्थधर्मापि मनोजयेन
दृढं वशीकारविरक्तियुक्तः ॥

---

1. प्रह्लादः = तत्रत्यः पर्वतीयो भक्तस्तेन सह मिलितुं गतो गुरुः पर्वतशिखरे ।

१. द्युति–क०

२. दीरी–क०

तनुं दधाना ननु भक्तिरेव
कायं गता भागवतानुधर्मा[1]: ॥ ७२ ॥

त्रैलोक्यतुच्छीकरणाय कामं
धैर्यस्य किं नाम नवावतारः ? ॥
किमात्मनि प्रेमरसोक्षितस्य ?
ज्ञानस्य साकारतया विनोदः[1] ॥ ७३ ॥

पञ्चभिः कुलकम्

कर्त्ताकर्त्तेत्युक्तवान्[2] योगिराजो
भ्रातः कस्त्वं ? मानवोत्रागतः किम् ? ॥
प्रह्लादेनेत्येवमुक्तः स ऊचे
दासो रामस्यास्मि तेनेह नुन्नः ॥ ७४ ॥

सदा गोविन्दभक्तानां साभिलाषः समागमः ॥
प्रह्लादो निजगादेदं प्रेमाश्रुपुलकान्वितः ॥ ७५ ॥

पात्रे कुत्र पयः श्रितं[3] ? किमदधास्तस्मिन् ? किमात्तं धनं ?
दत्वा दध्यकरोर्मन्थिथमथा केनाथ तद्युक्तितः[4] ॥
उद्भूतं नवनीतमत्र किमिदं ? सम्भुज्यकां[5] निर्वृतिं ?
प्रायस्तापहरीं हरिप्रियसखे ? त्वं नानकेदं वद ॥ ७६ ॥

---

1. ७० तः ७३ यावत् नानककृतप्रह्लादवर्णनम् ।

१. तु–क०

२. त्युत्य–क०

३. शूर्तं–क०

४. युक्तितः–ख० न द्युक्तितः—क०

५. भुच्यकां–क०

ऊचे नानकतापसो मम मनः पात्रं पवित्रं कृतं
तत्त्वं चोपनिषद्गवीविगलितं दुग्धं विरक्तेः श्रृतम्[1] ॥
तत्रात्तं धनमर्पितं गुरुवचो मन्था विचारो महा-
नुद्भूतं नवनीतमात्मविषयप्रेमातिमाधुर्ययुक् ॥ ७७ ॥

तदास्वाद्य सुसन्तुष्टो भवता पालनच्छटाः ॥
न संस्पृशामि दैत्येन्द्र ! दुर्निवाराः शरीरिणाम् ॥ ७८ ॥

प्रह्लादस्तदनु जगाद सुप्रसन्न-
स्त्वं ज्ञानी त्वमसि [2]विरक्तिमांश्च भक्तः ॥
कालेऽस्मिन् बहुजनकार्यमार्य ! कुर्वन् ॥
कोप्यंशो नियतमवातरो मुरारेः ! ॥ ७९ ॥

तमभाषत नानकः प्रवीणो
वद दैत्येन्द ! समस्तशास्त्रविद्वन् ! ॥
अवधारितवान्भवान्स तत्त्वं
किमु बुध्या च सतां च सङ्गमेन ! ॥ ८० ॥

प्रह्लादस्तमिदमुवाच नानक ! त्वं
सिद्धान्तं शृणु मम सम्मतं सतां च ॥
आबाल्याद्भगवत आश्रयेत धर्मान्
मानुष्यं चलमतिदुर्लभं प्रपद्य ॥ ८१ ॥

विषयसुखमशेषे लभ्यते दैवयोगाद्
वपुषि खलु तदर्थं व्यर्थयेन्न स्वमायुः ॥
भगवति निजआत्मन्याचरेद्भक्तिमुर्वी
[3]विविधविधुरगुर्वीं संसृतिं या भिनत्ति ॥ ८२ ॥

---

१. श्रुतम्—क०
२. विरक्तमांश्च—क०
३. विध—क०

सुप्तस्यार्धमपैति रात्रिषु मुधा मुग्धस्य बाल्ये तथा
तारुण्ये तरुणीगृहीतमनसोऽशक्तस्य हा ? वार्धके ॥
आयुर्भूरिकुटुम्बकार्यक[1]तिलस्वांतस्यशान्तिः कुतः ?
पुंसः संसृतिनागुरानिपतितस्योद्धारवार्तैव का[2] ? ॥ ८३ ॥

प्रकृतिविकृतिषु स्वयं महेशः
स्थिरचरजातिषु भोक्तृभोग्यरूपः ॥
अनुभवसुखसत्य एक एव
ह्यनधिगतो निजमायया निगूढः ॥ ८४ ॥

मुकुन्दः सुखमाराध्यः प्रसन्नो येन केनचित् ? ॥
आत्मा सर्वत्र सिद्धश्च भक्त्यैव सुलभः सदा ॥ ८५ ॥

त्रयी त्रिवर्गो विविधा च वार्ता
ज्ञानं च योगः सदुपासनं च ॥
यद्यर्पितं प्रीतय ईशितुर्मे
मन्ये तदेदं सफलं न चान्यत् ॥ ८६ ॥

वेदैर्गुणानां गणिनः प्रपञ्च–
स्त्रैगुण्यशून्ये नु रमेत तत्त्वे ॥
न मोक्षमिच्छेद्भगवत्प्रपन्नः
स तत्कृपापर्यवसान एव ॥ ८७ ॥

विकारा जन्माद्याः षडपि वपुषो नात्मन इमे
फलानीं ते स्थास्नौ क्षितिज इव कालेन कलिताः ॥
ध्रुवः शुद्धो हेतुर्विकृतिरहितो व्यापकतमः
स्वदृक्[3] चैकश्चात्मा सकलजगदाधार उदितः ॥ ८८ ॥

---

१. कविल–ख०

२. वा–क०

३. स्वतृक्वैक—क०

प्रकृतिविकृतिपुन्सां सङ्गतानां विवर्ते
वपुषि परमतत्वं निर्णयेच्छास्त्रदृष्ट्या ॥
स्वनिखननिर्यद्वालुकाभ्यः प्रवीणाः
कनकमुचितयत्नैः कान्तमासादयन्ति ॥ ८९ ॥

अन्वितं व्यतिरिक्तं च ब्रह्मसूत्रं मणिष्विव ॥
पदार्थेषु जगज्जन्मस्थितिसंहारकारणम् ॥ ९० ॥

गन्धैर्गन्धवहो यथा सुमनसामालिङ्गितो भासते ॥
बुद्धेर्जागरणादिभिस्त्रिभिरसौ साक्षी तया लक्ष्यते ॥
आज्ञानात्स च वासना विरचितः स्वप्नोपमानो भवो
वैधर्म्ये परिभाविते हृदि ततो बुद्धेर्विधूयेत भोः ? ॥ ९१ ॥

बुद्ध्यादितादात्म्यविडम्बनेऽयं
येनास्य जातेव[1] निरञ्जनस्य ॥
यत्नैस्तदज्ञानमपोहनीयं
बीजं हि संसारविषद्रुमस्य ॥ ९२ ॥

धर्मांस्ततो भागवतान्[2] श्रयेत
यैः श्रीपतिस्तुष्यति तूर्णमेव ॥
संसारदुर्वारदवानलोऽयं
[3]तस्मिन् क सिञ्चत्यमृतच्छटाभिः ? ॥ ९३ ॥

भक्त्या गुरूणां सकलार्पणेन
सतां च सङ्गेन हरिप्रियाणाम् ॥
कथासु विष्णोरनुरागतश्च
सत्कीर्तनैस्तद्गुणकर्मणां च ॥ ९४ ॥

ध्यानेन तत्पादसरोरुहस्य
तन्मूर्तिसन्दर्शनजातहर्षैः

१. जातेन—क०
२. भागवताश्र—क०
३. नास्मिन्—क०

निर्जित्य षड्वर्गमुपार्जयेत
भक्त्या रतिं श्रीमति [I]वासुदेवे ॥ ९५ ॥

युग्मम्

सर्वेषु भूतेषु मम प्रियोऽसौ
[१]राधाधवो राजति पूर्णरूपः' ॥
एवं विनिश्चित्य च भूतवर्गं
[३]सम्मानयेन्मानमुदस्य धीरः ॥ ९६ ॥

लीलावतारै रचितानि विष्णो-
र्निशम्य कर्माणि च जातहर्षः ॥
रोमाञ्चितो गद्गदमुद्गताश्रु[२]-
रुच्चैर्यदा गायति वीतलज्जः ॥ ९७ ॥

नृत्यत्यलं कृष्ण ! मुकुन्द ! विष्णो !
इत्याकुलं वक्ति नमत्यदम्भः ।
तदा हरिं ध्वस्तसमस्तबन्धो
भक्त्या प्रपन्नो गतवासनोऽसौ ॥९८॥

युग्मम्

कान्ताः पल्लवकोमला बहुधनं पुत्राः सखायो मही
मातङ्गास्तुरगाः श्रमोपगमिता दुःखप्रदा नश्वरा
आसङ्गं प्रविहाय तेषु मनसा स्निग्धेन सेवेत तं
यो ज्ञातः स्वपदं ददाति भगवान् ब्रह्मादिभिर्वाञ्छितम् ॥९९॥

I. श्रीमति वासुदेवे रतिं नवधाभक्त्या उपार्जयेत । षड्वर्गं विजित्य, अर्पणेन, सङ्गेन, कथानुरागेण, सत्कीर्तनेन, ध्यानेन, दर्शनजातहर्षेण च ।

१. कामः–क०

२. मद्गता–क०

३. सम्मानयेत्–क०

वेषया बहुयत्नसाध्यमानाः
सिकतानामिव सेतवो गलन्ति ॥
न सुखं न ततश्च दुःखभङ्गो
लभते प्रत्युत दुःखमेव देही ॥१००॥

न कुलं न वयो बहुज्ञता वा
भगवत्प्रीतिकरी न वर्णधर्माः ।
सकलेषु निवासिनो जनेषु
विमला भक्तिरधोक्षजस्य किंतु ? ॥१०१॥

आस्तामन्यद्वासुदेवस्य नाम
नित्यं मर्त्यः कीर्तयेद्यत्र कुत्र [1] ॥
प्रायश्चित्तं भूयसां दुष्कृतानां
तत् कामानां लब्धये कामरत्नम् ॥१०२॥

नारायणो नरसखो निजगाद धर्मं
यं नारदाय दयया निवसन् वदर्याम् ॥
गर्भे स्थितस्य कथितो मम तेन सौम्य ?
सोऽयं हृदि स्फुरति तुभ्यमुदीरितश्च ॥१०३॥

प्रह्लादस्येति वाचा स परममुदितो तन्तुकामः कराभ्यां
धृत्वा दैत्येश्वरेण स्वहृदि विनिहितः प्रेमतो भूरिकालम् ॥
अन्योन्यं प्रीतिरासीद् बहुदिनजनितेवातिरम्या प्रकामं
पृष्ट्वा तं द्रष्टुकामो ध्रुवमगमदसौ योगतो योगिराजः ॥१०४॥

राजव्यञ्जनमैक्षत ध्रुवमसौ सौवर्णसिंहासने
नक्षत्रैश्च प्रदक्षिणीकृततनुं खेटैश्च तेजोमयैः ।

---

1. नामभिर्भिन्नो मुकुन्दो भज्यत एव भिन्नरुचिभिः ॥

धर्मेन्द्रानलकश्यपप्रभृतिभिः संसेवितं श्रीहरे-
र्भक्तिप्रेमरसालसेन मनसा तुष्टस्तदाज्ञाकरम् ॥१०५॥

नक्षत्राणि न दृश्यन्ते मर्दनेनेति भाषिते ॥
जगाद नानको योगी तान्यधो ध्रुवमण्डलात् ॥१०६॥

बालसिन्धो ! ध्रुवं पश्य यतिनेत्यहमीरितः ॥
यथाज्ञापूज्यपादानामिति प्रत्यवदं ततः ॥१०७॥

दृष्ट्वास्मान्ध्रुव इत्युवाच हरिणः कंठीरवस्यास्पदे
केन क्रीडितुमुत्सहन्ति गगने केन स्थ भो ! लम्भिताः ? ।
हिंस्राः खेचरभूचरा बहुविधा मर्त्यान् खभक्ष्यान् बहून्
रक्ष्यान् को नु ररक्ष हन्त ! भवतस्तद्दुर्गमार्गागतान् ॥१०८॥

प्रह्लादस्य स्थानमभ्यागतस्त्वं
भूलोकस्थो नानको मे श्रुतोऽसि ॥
कस्मिन्नर्थे साहसं निर्मिमीषे ?
गन्तुं चेतः सस्पृहं कुत्र ते च ? ॥१०९॥

ततो नानकोऽब्रूत बाल्ये भवन्तं
गृहान्निर्गतं यो ररक्षातिदक्षः ।
स नो रक्षिता सिंहशार्दूलमुख्या
न हिंस्रा विहिंसन्ति यस्यातिदेशे ॥११०॥

मूकं वाक् यतिमातनोत्यचरणं नागारिसंस्पर्धिनं
यो वज्रं तृणतोऽपि फल्गुतृणमप्युद्भिन्नवज्रोदरं
आपद्मोद्भवमापिपीलिकमनुल्लंघ्य स्फुरच्छासनो
यो देवो गमयन्स दुर्गममिदं नः स्वं निनीषुः पदम् ॥१११॥

इति नानकस्य वचनानि निशम्य
प्रससाद स ध्रुव इदं च जगाद ॥

तव सूनृतानि हरिभक्तियुतानि
श्रुतवानहं परमहर्षमुपेतः ॥११२॥

कलासि नूनं कमलाधवस्य
यो नारदाद्यैः सनकादिभिश्च ॥
गम्यं कथञ्चित् प्रथितं ? प्रयासि
वैकुण्ठमावासमकुण्ठशक्तिः ॥११३॥

इह स्वकीयावनुगौ विहाय
प्रयाहि भो ! नानक ! दर्शनाय ॥
आम्नायनिर्णीतमहाविभूते-
र्भूतेषु नित्यं वसतो मुरारेः ॥११४॥

तथेति तं योगिवरो निगद्य
मां मर्दनं तिष्ठतमित्युदीर्य ॥
भुक्तिप्रभावप्रबलीकृतेन
जगाम योगेन जवान्मुकुन्दम् ॥११५॥

यदुन्नतं [I]षोडशकोटियोजनं
विरञ्चिलोकान्न कदापि नश्वरम् ॥
विस्तारयुक्तं [II]रदकोटिसंख्यया
तद्धाम विष्णोः स जगाम भक्तितः ॥ ११६॥

यस्मिन् राजतहैममौक्तिकमयैर्माणिक्यवज्रोद्भवै-
रुत्तुङ्गैर्भवनैर्विभिन्नमभितः स्थातुं न शक्तं तमः ॥
आस्ते कुत्रचिदिन्द्रनीलभवनव्याजेन गारुत्मतः ?
स्थानस्यापि मिषेण कुत्रचिदहो ! तापिच्छगुच्छच्छलात् ॥११७॥

I. षोडशकोटियोजनमुन्नतं विष्णोर्धाम ।
II. ३२ कोटिसंख्यया विस्तृतम् ।

सारूप्यं समवाप्य कैटभरिपोरेकान्तभक्ताः परं
क्रीडन्तः सततं विमाननिवहैः कल्पद्रुमाणां वने ॥
कल्पान्तोल्वणवीतिहोत्रबहुलज्वालावलीविज्वलद्
ब्रह्माण्डौघचटत्कृतिं सुकृतिनः शृण्वन्ति यत्र स्थिताः ॥११८॥

यत्पारेविरजं विराजतिहरेः सौशील्यतः शीतलं
तेजोभिस्तमसां विनाशिशशिनः सूर्यस्य चागोचरः ॥
नीयन्ते किल षष्ठियोजनबृहच्छाखस्य शाखातले
विश्रान्तास्तिलशाखिनो हरिजनैर्यन्मुक्तभक्ताजनाः ॥११९॥

वाप्यो विद्रुमखण्डमण्डिततराः सोपानवत्यो महा-
नीलैरुत्पलकाननेषु विलसच्चक्राङ्गचक्राङ्गनाः ॥
यस्मिंश्चोपवनानि फुल्लतरुभिर्नैश्रेयसादीन्यलं
नेत्रश्रोतसुखानि कोकिकलैर्भृङ्गावलीगुञ्जितैः ॥१२०॥

पञ्चभिः कुलकम्

प्राकारः कनकोज्वलो मणिमयः स व्योमसीमां स्पृशन्
दृष्टी यत्परिखासु नीलनलिनामोदैः पयो वासितम् ॥
रम्भाः स्तम्भशुभाः सहेमकलशा मुक्तावलीतोरणाः
पृष्टाः काञ्चनदण्डमण्डितकटैः कक्षाः सुरैरक्षिताः ॥१२१॥

स [1]सप्तकक्षान्यतिलम्ब्य योगी
जगाम गोविन्दकृपावलम्बः ॥
सभां मणिव्रातमयूखरम्यां
ददर्श तद्भक्तसुरैः समेताम् ॥१२२॥

तुङ्गे तत्र सहस्रचन्द्रचटुले सिंहासने संस्थितः
कोटीरङ्कुरुविन्दगारुडमहानीलैर्विचित्रं वहन् ॥

१. व्यति—क०

केयूरस्थितहीररश्मिरुचिरैर्नित्यं जयश्रीश्रितै-
[1]दोर्भिर्दीर्घतरैर्गदासदसिजं शङ्खं च चक्रं दधत् ॥१२३॥

[1]बिभ्राणो मकराकृतिं श्रवणयोर्भूषां प्रकोष्ठद्वये
मन्थानांचलघर्षणोज्वलमहारत्ने स्फुरत्कङ्कणे ॥
हारं वक्षसि कौस्तुभं भृगुपदं श्रीवत्सवन्यस्रजौ
मालां हैमसरोरुहीं स तुलसीमाल्यां [1]पिशङ्गाम्बरः ॥१२४॥

स्निग्धश्यामपयोदसुन्दरवपुः फुल्लारविन्देक्षणो
लक्ष्म्या चामरहस्तया सुरवरैरासेव्यया सेवितः ॥
भक्तैः स्वैः सनकादिनारदमुखैः सूक्तैरनेकैः स्तुतो
वाग्देव्या कलिताकला ललितया वाण्या मुहुर्वर्णितः ॥१२५॥

कर्मब्रह्मपरैः समस्तनिगमैर्द्वेधापि मूर्तैर्नुतो
भूम्यामोदकरण्डचारुकरया सप्रेमसम्भावितः ॥
चन्द्रेणामृतशीकरैर्निजकरैराराधितो दूरतो
वातेनातिसुगन्धिशीतमृदुभिः सञ्जीवितो मारुतैः ॥१२६॥

[3]मूलप्रकृत्या महताहङ्कारेण च सर्वतः ॥
तन्मात्रैरिन्द्रियैर्भूतैर्भूतिमद्भिर्निषेवितः ॥१२७॥

ब्रह्माद्यैः सुरसत्तमैः कथमपि प्राप्तप्रवेशैश्चिरं
दूराद् दैत्यवधावदानजनितं दृष्टो गृणद्भिर्यशः ॥

I. साक्षाद्द्रष्टेव नानको ददर्श विष्णुमक्ष्णोः समक्षमिति नानकस्य प्रतीयते महिमा ।

2. त्रिलोकीपतिवर्णनमत्र वैदुष्येणासादितं कविना । वाच्यप्रधानवर्णनेऽत्र दृश्यन्ते बहवो गुणा यदुपतेः ।

3. साङ्ख्यमतानुसारं वर्णनम् ।

१. पिसङ्गा–क०

[1]प्रेमस्मेरमुखो निजेशकरुणापीयूषधारां किरन्
दृग्भ्यां लोचनगोचरो यतिपतेरासीत् त्रिलोकीपतिः ॥१२८॥

षड्भिः कुलकम्

त्रयीमयेन ताक्ष्येंणास्तुतमुत्तमसामभिः ॥
सर्वश्रुतिशिरोरत्नं [1]दूरात्तमनमद्[2] यतिः ॥१२९॥

सुनन्दनन्दविजयजयप्रबलसात्वताः ॥
कुमुदः कुमुदाक्षश्च [2]विश्वक्सेनो बलस्तथा ॥१३०॥

जयन्तः श्रुतदेवश्च पुष्पदन्तश्च पार्षदाः ॥
अभिनारायणं निन्युर्नानकं सादरस्मितम् ॥१३१॥

युग्मम्

प्रणिपत्य दण्डवदसौ प्रणयेन
समुदीतसान्द्रपुलकोश्रुपरीतः[3] ॥
अवधाय दूरमपि वेदपदानां
तमवदत्स्फुटमनोरमशब्दैः ॥१३२॥

तं धर्मबन्धोपासनातत्पराणा—
माम्नायानां गोचरं देवमीडे ॥
विद्याविद्ये स्वे पुरस्कृत्य शक्ती
आतन्वानं मुक्तिसंसारलीलाम् ॥१३३॥

I. पूर्वोक्तै रेतावद्भिर्गुणैरुपेतः प्रेमस्मेर मुखस्त्रिलोकीपतिर्यतिपतेर्नानकस्य लोचनगोचरोऽभूदित्यन्वयः ।

2. कुलकेऽस्मिन्वैकुण्ठनाथं प्रति नानकस्य नमस्कारवर्णनं विद्यते । दूरादेव यतिर्नानकस्तं विष्णुमनमत् ।

१. दूरादेवानमद्यतिः—ख०

२. विष्वक्—क०

३. काश्रुपरीतः—क०

देवास्ते ते यज्वनां पूरयन्ति
कामांस्तुष्टाः कर्मभिस्तैश्च तैश्च ॥
यज्वा यज्ञो देवता च त्वमेव
लीलामात्रं वास्तवोऽयं न भेदः ॥१३४॥

अव्यक्तादीन्हेतुमाहुर्भवस्य
ब्रह्माणं वा ये मनुं वेतरे वा ॥
ते त्वन्मायामोहिता विस्मरन्तः
सर्वादिं त्वां बद्धविस्तीर्णवादाः ॥१३५॥

जीवान्नानायोनिभाजो विमूढान्
स्वर्गं श्वभ्रं वानयन्नीश्वरस्त्वम् ।
नोपालभ्यस्तत्कृतस्यानुसारी
चित्रं ! क्रीडाकौतुकं कौशलं ते ॥१३६॥

धर्मापोहाद्वस्तुमात्रं ब्रवीति
वेदस्तत्त्वं तावकं निर्विकल्पम् ।
त्वय्यारोपात्संसृतेश्चापदाच्च—
चैतन्यं त्वं शुद्धमेवावशिष्टम् ॥१३७॥

जीवो मिथ्यावासनावेशवश्यो
यावद्भिन्न[1]स्तावदाप्नोति दुःखम् ॥
त्वामात्मानं ज्ञानदृष्ट्या तु पश्यन्
स्वस्मिन्नेतान्[2]संस्मरन्निर्वृणोति ॥१३८॥

---

१. भेन्नः—ख०
२. खनाने—ख०

मायाशक्तिस्तावकी यद्गुणाढ्यो
ब्रह्मा[1] विष्णूरुद्र इत्युच्यसे त्वम् ।
जन्मस्थित्युन्माथकर्ता भवस्य
भासि ब्रह्मन् ! निर्गुणो निष्क्रियश्च ॥१३९॥

आनन्दस्ते तावकी चैव सत्ता
लोके भातः सर्वलोकाश्रयस्य ॥
मायामात्रं नामरूपप्रपञ्चो
मिथ्या यद्वत्सैकते वारिधारा ॥१४०॥

यावन्न त्वां वीक्षते तावदेव
मायामात्रं तावतीयं तनोति ।
दृष्टो मायां संहरस्यङ्ग तूर्णं ?
धन्यो धन्यो मायिकस्त्वं सलज्जः ॥१४१॥

हित्वा सर्वं ये भवन्तं प्रपन्नाः
कालध्वस्तं पौरुषं वीक्ष्य जन्तोः ।
तेषां चिन्तामैहिकामुष्मिकाणां
कृत्यानां त्वं भृत्यवन्धो ! जहर्थ ॥१४२॥

ब्रह्माण्डानां नाशकर्ता निमेषा—
न्नानारूपैर्हंसि दैत्यान्[2]उपायैः ।
क्रीडामात्रं सम्भ्रमः कल्पितेभ्यो
बालस्येव क्रीडनेभ्यस्तवायम् ॥१४३॥

---

१. न्यो—क०

1. नामप्रपञ्चो ब्रह्माविष्णूरुद्रेत्यादिनामवैविध्यम् ।
रूपप्रपञ्चो मत्स्यकूर्मेत्यादिरूपवैविध्यम् ।

२. नुपायैः—क०

धर्मं रक्षंस्तद्विहन्तॄन्विनिघ्नन्
यत्त्वं धत्से मत्स्यकूर्मादिरूपम् ।
स्वैरं गेहे तत्कथाः कथ्यमाना
नॄणां तापानाशु निर्वापयन्ति ॥१४४॥

नीरूपं त्वा निर्गुणं गाहमानाः
[I]श्रान्ता भक्तान् यत्र सुन्मुक्तसीमम् ॥
मेघश्यामे पूर्णचन्द्राननेऽस्मिन्
शोभासिन्धौ स्नान्ति शीते स्वरूपे ॥ १४५॥

चिन्तारत्नं चिन्तकानां जनानां
लक्ष्मीपाण्योः सौकुमार्यस्य साक्षि ॥
योगीन्द्राणां हृत्सरोजा लयन्ति
दुःखध्वंसं पादपद्मं प्रपद्ये ॥१४६॥

स्वर्वेदीनां मानसोल्लासकारी
कस्त्वत्तोन्यः ? पाञ्चजन्यस्वनेन[1] ?॥
दैतेयानां दुर्मदानां मृधेषु
स्तब्धान् कुर्यात् कः करानुद्यतासीत् ? ॥१४७॥

श्रान्तः स्मृत्वा हन्त ? दन्तावलस्त्वां
सद्यो रक्षामार्छ दुग्रावहारात् ॥
नूनं हीनाहं कृतियों भवन्तं
मुञ्चेन्मुञ्चेस्त्वं नतं दीनबन्धो ? ॥१४८॥

त्रैलोक्यं त्वं वामनीभूय यत्ना–
दिन्द्रस्यार्थे दैत्यराजाज्जहर्थ ॥

I. नीरूपं त्वां गाहमानाः कदाचित् सगुणं तव पूर्णचन्द्राननं दृष्ट्वा खेदं विजहतीति भावः।

१. नैव–क०

त्वद्भक्तानां गौरवं भावि येन
नूनं [1]तस्मिंल्लाघवेप्यादरस्ते ॥१४९॥

[2]उद्वृत्तानां दानवानां शिरांसि
छित्वा संख्ये सद्गतिं [3]राति तेभ्यः ॥
देवानां तु म्लानिभाजां प्रमोदं
त्वच्चक्रं त्वद्दर्शनं सुष्टुतस्य ॥१५०॥

पापध्वान्तध्वंसने [1]द्वादशात्मा
सर्वार्थानां पूरणो कामरत्नम् ॥
[4]दूतोच्चाटे सिद्धमन्त्रो यमस्य
त्वन्नाम स्यान्मे रसज्ञाग्रवर्ति ॥१५१॥

सिद्धैर्ध्यातं नारदाद्यैरजस्रं
[5]सुत्रामाद्यैरर्चितं स्वार्थसिद्ध्यै[2] ॥
भक्तक्लेशाम्भोधि कुम्भोद्भवं ते
पादाब्जं मे मानसे शश्वदास्ताम् ॥१५२॥

मौलिर्नित्यं त्वां नमन्मे मुरारे ?
मूर्तिं नेत्रे तावकीं पश्यतां च ॥
हस्तौ स्यातां त्वत्सपर्यासु सक्तौ
पादौ च त्वत्तीर्थयात्रापवित्रौ ॥१५३॥

---

1. द्वादशात्मा दिवाकरो यथा ध्वान्तं नाशयति तथैव त्वं पापध्वान्तं ध्वंसयसीति ।
2. वज्रिणः कार्यं यदि तस्य स्वार्थपूर्तयेऽकरोस्त्वं तदा मम भक्तस्य कथं न करिष्यसीति भावः ।

१. तस्मिन् ल्ला–क०
२. बद्वृत्तानां–क०
३. याति–ख०
४. दुष्कृतो–क०
५. सुत्रामाद्यैः–ख०

लक्ष्मीं वेदं वन्दितां सर्वदेवै-
स्त्वल्लावण्याम्भोधिमग्नां मुरारे ॥ ?
याऽमुञ्चन्ती चञ्चलत्वं परत्र[1]
ध्रौव्यं धत्ते त्वद्गुणौघेन बद्धाम् ॥१५४॥

कान्तिः किन्ते सर्वनीलोत्पलानि
त्यक्त्वा मूर्तिं संश्रिता श्रीरिवेयम् ॥
एकश्चन्द्रो[3] ह्रासवृद्धी विहाय
किं त्वद्वक्त्रव्याजतो ? राजतेऽङ्ग ? ॥१५५॥

भक्तत्राणे यस्य जागर्ति चक्रं
यस्याह्वानादापदो यान्ति नाशम् ॥
यस्य स्मृत्या मङ्गलान्युल्लसन्ति
स श्रीकान्तः पातु मां सर्वभीतेः ॥१५६॥

ब्रह्मावाणी शेषनागः सुरेज्यो
नालं वक्तुं कृत्स्नशो यद्गुणौघान् ॥
पारं यायात्कः ? परस्तन्महिम्न-
स्तस्मात्तुभ्यं देवनित्यं नमोऽस्तु ॥१५७॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
भगवत्स्तुतिर्नाम त्रयोदशः प्रस्तावः

---

1. प्रस्तावेस्मिन् नानककृतविष्णुस्तोत्रमतीव भक्तिरससञ्चारि राजते । श्लो० १३२ तः १५७ यावत् नानककृतभगवत्स्तुतिः ।

१. तु यत्र—क०

२. त्यक्त्वा—क०

३. एका—क०

चतुर्दशः प्रस्तावः

या पुस्तकं वहति हस्तविशप्रसूनै-
भक्ताभयं परमथो जपमालिकाश्च ॥
सिन्दूरसुन्दरविसारिशरीरशोभा
सा भारती भवतु मे भवभीतिहन्त्री ॥ १ ॥

इति स्तुतिं यतिऋषभस्य शृण्वता
प्रसीदता मधुमथनेन भाषितम् ॥
वरं वृणीष्व[1] मनसि सन्तमुत्तमं
मदीक्षणं न विफलमस्ति नानक ? ॥ २ ॥

पुरे न[2] मे त्वयि धृतिरुद्भभूव[3] भो ?
यतो भवानलभत दर्शनं मम ॥
न कश्चन प्रभवति ? मामुदीक्षितुं
मदिच्छया किल रहितात्स्वपौरुषात् ॥ ३ ॥

विरज्य यो विषयसुखान् सुदुस्त्यजान्
मनो मयि प्रथममतीव दुर्ग्रहे ॥
निवेसयेत्तमहमुदारपौरुषं
वशीकृतः क्षणमपि विस्मरामि नो ॥ ४ ॥

समुक्षितो हरिमुखचन्द्रनिर्गतै-
र्वचोमृतैरिति यतिनायकोऽवदत् ॥

---

१. वृणीस्व–क०

२. पुरैव—क०

३. रुद्बभूव–क०

समुद्वहन्[1] पुलकमुताश्रुलोचनो
रमापतेः सदयविलोकनादतः[I] ॥ ५ ॥

इतः परं[2] वरमवशिष्टमर्थये
कमुत्तमं त्रिभुवनकल्पभूरुहात् ? ॥
तपस्यतां नियतहृषीकचेतसां
न जन्मभिर्बहुभिरपि त्वदीक्षणम् ॥ ६ ॥

कृपामिमां मयि कलिकालसम्भवे
चकर्थ यां स्पृहयति देवसंहतिः ॥
न साधनं स्पृहयसि नाम किञ्चन ?
प्रपत्तितः खलु दयसे दयानिधे ? ॥ ७ ॥

न पूजया भुवनपतेः प्रयोजनं
स्तवेन वा निगमनिरूपितस्य ते ॥
निवेदितैर्जलकुसुमैः प्रसीदसि
स्तुतो जनैस्तदपि विसंष्ठुलैः पदैः[2] ॥ ८ ॥

विमोहणं भवतु न मायया मम
त्वदीयया जनमृगवागुरा हि या[3] ॥
पदाब्जयोस्तव रतिरस्तु शाश्वती
विमुक्तिदा सकलजनस्य या शुभम् ॥ ९ ॥

तव ? प्रियाः सुखर ? कीदृशा जना ?
जनुर्जनः क्षपयतु केन वर्त्मना ? ॥

I. हरिमुखचन्द्रनिर्गतं वचः श्रावं श्रावं यतिपतिः पुनरारभत विष्णुस्तवम् ॥

१. समुद्दहन्—क०

२. परैः—क०

३. वागुरापि—क०

मुमुक्षुणा कथय कथं विचार्यतां ?
विमुक्तिभाग्भवति च कीदृशः पुमान् ? ॥ १० ॥

ममार्थनाः सफलय नाथ ? कः परः ?
प्रबोधयेद् [1]भवत ऋते विचक्षणाः ॥
परस्परं श्रुतकलहेन भूयसा
प्रतिक्षणं कलिलमतिः कलौ किल ॥ ११ ॥

[2]प्रसेदिवानथ निजगाद माधवः
पुरैव ते विहितमिदं ममेप्सितम् ॥
न मायया व्रजतु विमोहनं जनो
यमिच्छसि त्वमुपदिशस्यथापि वा[3] ॥ १२ ॥

विरोधितां वदति न कुत्रचिज्जने ?
व्यसर्जयत्खलु ममतामहङ्कृतिम्[1] ॥
समः सुखे य उरुणि दुःखसङ्कटे
क्षमीमपि प्रहितमनो मनीषकः ॥ १३ ॥

न तापयेज्जनममुतो न तप्यते
विषीदति क्वचन न मोदते नयः ? ॥
गतव्यथः शुचिरनपेक्षकः सदा
विसर्जितोऽपि च सकलैरुपक्रमैः ॥ १४ ॥

समो रिपौ सुहृदि विमानमानयो-
र्विनिन्दन स्तवनविधौ च यः समः ॥

---

1. ऋते योगे पञ्चमी ।
2. प्रसेदिवान् = प्रसन्नोऽभूत् ।
3. १२: १८ यावत् विष्णोर्नानिकं प्रत्युपदेशामृतम् ।
१. महंकृती–ख०
२. क्षमा–क०

सुतोषितो भवति च येन केनचिन् ?
मम प्रियः स हि दृढभक्तिभावितः ॥ १५ ॥

त्रिभिर्विशेषकम्

स्वप्नोपमं सुतसुहृद्धनदारसङ्गं
पश्यन्न तत्र महतीं रतिमादधानः ॥
प्रारब्धभोगसमये गतहर्षशोको
मां संस्मरन् जनुरिह क्षपयेन्मनीषी[1] ॥ १६ ॥

विषयदोषविचिन्तनमन्वहं
प्रथममेव मुमुक्षुरुपाश्रयेत् ॥
शिथिलशक्तिमनोविषयेषु चेद्
भवति तत्त्वविचारसमञ्जसम् ॥ १७ ॥

क्षणे क्षणे विश्वमिदं विलोक्य
वियोगसंयोगविपत्तिविद्धम् ॥
अनश्वरस्यात्मसुखस्य लब्धै-
र्मयि प्रपत्तिं पुरुषो विदध्यात् ॥ १८ ॥

आत्मास्तिबुध्यादि[1]जडप्रकाशकः
स्वतः प्रकाशो नियतं प्रदीपवत् ॥
विलक्षणो दारुषु सन्निवानलः
[2]कश्चित्तदीयं गुणमाश्रयन्नपि ? ॥ १९ ॥

मायागुणैर्विरचिते पुरुषस्य सूक्ष्म-
स्थूले वपुष्यहमिति भ्रम एव बन्धः ॥

---

1. विशेषकेस्मिन् विष्णुर्नानकं ब्रूते उपदिशति च यत् जनः सर्वदैव गतहर्षशोको भगवति प्रपत्तिं विदध्यादिति ।

१. ह्यपादि–क०

२. क्वचित्–ख०

तस्योपकारिणि कुटुम्बगणे धने वा
ग्रन्थिर्ममेति मतिरेव सुदुर्विभेदः[1] ॥ २० ॥

आनन्दबोधमधिगम्य मम स्वरूपं
स्वस्याप्यभेदममुतः[2] कलयेत धीरः ॥
भिन्नाः परस्परमिमे परमात्मनश्च
जीवा उपाधिवशतो [3]ननु वस्तुगत्या ॥ २१ ॥

बन्धमोक्षव्यवस्थैषां[4] वैलक्षण्यं परस्परम् ।
उपाधियोगहानाभ्यां तद्भेदाच्चापि [5]सिद्ध्यति ॥ २२ ॥

प्रतिविम्बितः पयसि शीतदीधिति—
र्मलिनश्चलस्तदनुसारतो भवेत् ॥
प्रतिविम्बितेषु यदुपाधिसंक्षयः
शशिना स ऐक्यमुपयान्ति ते नरः ॥ २३ ॥

उपाधिरन्तः करणान्यविद्यावास्य नानक ! ॥
तदावेशादसौ मिथ्या स्वप्नेष्विव विषीदति ॥ २४ ॥

यो बाल्ययौवनजराविकृतेऽपि देहे
जानाति सोऽहमिति जागरणं च सुप्तिम्[6] ॥
वेत्ता सुषुप्तिमपि यः करणैर्हृदा च
बुद्ध्या स एव पुरुषो न मृतो न जातः ॥ २५ ॥

---

१. वंधः—क०
२. मभितः—ख०
३. नतु—क०
४. स्यैषा—ख०
५. सिध्यति—क०
६. सुषुप्तिम्—ख०

ब्रह्माद्वितीयचिदयं सुखमप्रमेयं
भेदस्ततोऽस्य वत वासनया बभूव ॥
तन्नाशमाशु कलयेद्गुरुवेदवाक्यैः
सङ्गैः [1]सतां स्वमनसा मनसादिभिश्च ॥ २६ ॥

तत्त्वज्ञानं मनोनाशं वासनाक्षयमेव च ॥
[1]मुमुक्षुर्व्यवसायेन स्वेन सम्पादयेत् त्रयम् ॥ २७ ॥

इदं सर्वं द्वैतजातमद्वितीये चिदात्मनि ॥
मायया कल्पितं सोऽहमिति तत्त्वमतिर्मता ॥ २८ ॥

वृत्तिसन्तानरूपेण परिणामि मनः स्मृतम् ॥
निरोधः सर्ववृत्तीनां मनोनाश[2] उदाहृतः ॥ २९ ॥

हेतुः क्रोधादिवृत्तीनां संस्कारश्चित्तगो[2] दृढः ॥
वासना तत्क्षयो ज्ञेयः क्रोधादीनामनुद्भवः ॥ ३० ॥

मिथः कारणकार्याणामेतेषां साधनं पृथक् ॥
[3]श्रवणादित्रयं तत्त्वज्ञानसाधनमीरितम् ॥ ३१ ॥

योगोऽष्टाङ्गो मनोनाशे कारणं गुर्वनुग्रहात् ॥
प्रतिकूला वासनैव वासनाक्षयकारणम् ॥ ३२ ॥

---

1. मुमुक्षुस्तत्त्वज्ञानं मनोनाशं वासनाक्षयञ्चैतत्त्रयं
स्वेन व्यवसायेन व्यवसायात्मिकया बुद्ध्या वा सम्पादयेदिति ॥

2. श्लोक सं० २८ तः ३० यावत् पूर्वोक्तानि त्रीणि वस्तूनि वर्णितानि सन्ति ।

3. श्रवणमनननिदिध्यासनम् ।

१. स्वतां–क०

२. कोहृतः–ख०

[1]वासना द्विविधा ज्ञेया शुद्धा च मलिना तथा ॥
शास्त्रसंस्कारसम्भूता दैवी संपत्सुपुण्यजा ॥ ३३ ॥

साधनं तत्त्वबोधस्य शुद्धैका वासना मता ॥
त्रिविधा मलिना लोकशास्त्रदेहप्रभेदजा ॥ ३४ ॥

इमा बाह्या आन्तरी तु मानसी सम्पदासुरी ॥
अनर्थकारिणी कामक्रोधदर्पादिरूपिणी ॥ ३५ ॥

श्रयेत तत्त्वबोधाय मुमुक्षुः शुद्धवासनाम् ॥
बाह्यामाभ्यन्तरीं दुष्टां मलिनामपवर्जयेत् ॥ ३६ ॥

प्राणस्पन्दनिरोधार्थमभ्यस्येत् प्राणसंयमम् ॥
वासनानां विमर्दार्थं वैराग्यं परिशीलयेत् ॥ ३७ ॥

विषयामिषाणि विधिनोपनतानि
करणैरदन्ननभिमत्य विरक्तः ॥
खमिवार्यमेव यवना न इवात्र
प्रकृतिस्थितोऽपि न स सङ्गमुपैति ॥ ३८ ॥

जड इव विचरेद्विशेषविद्वान्
परगुणदोषनिरूपणेषु मूकः ।

1.



वितथमिति च हर्षशोकशून्यो
हितमहितं स्वमुदीक्ष्य कालपक्कम् ॥ ३९ ॥

यद्यकल्पो मनो रोद्धुं परब्रह्मणि निर्गुणे ॥
समर्थ्य सर्वकर्माणि मां भजेन्निरहङ्कृतिः ॥ ४० ॥

दारापत्यसुहृद्धनेषु वपुषि स्वे यैरनास्था कृता
मय्येवा सजता चिराय मनसा ते साधवो मत्प्रियाः ।
तैः सङ्गं विमदो विधाय हृदये मां भक्तितो भावयन्
मत्प्रेमालसमानसो मम कथाः शृण्वन्कृतार्थो जनः ॥ ४१ ॥

[1]स्त्रीशूद्रपक्षिपशवःसु सुरराक्षसाश्चेद्
भक्त्या ममातिमहतीं गतिमापुरङ्ग ! ॥
किं न द्विजाः सुकृतलब्धकुलाः ! कुलाय–
मेतं विहाय मम धाम समाश्रयेरन् ॥ ४२ ॥

शृणु नानक ! मुक्तस्य लक्षणं त्वमतः परम् ॥
प्रारब्धविहितं देहं दधतो ममतां विना ॥ ४३ ॥

ज्ञानभूमिः शुभेच्छाख्या प्रथमा परिकीर्तिता ॥
विचारणा द्वितीया स्यात्तृतीया तनुमानसा ॥ ४४ ॥

सत्वापत्तिश्चतुर्थीस्यात्ततो संसक्तिनामिका ॥
पदार्थभावनी षष्ठी सप्तमी तुर्यगा स्मृता ॥ ४५ ॥

श्रवणं मननं सौम्य ! निदिध्यासनमेव च ॥
भूमिका त्रितयं त्वाद्यं तत्र जाग्रदिति स्थितम् ॥ ४६ ॥

अद्वैते स्थैर्यमायाते द्वैते प्रशममागते ॥
पश्यन्ति स्वप्नवल्लोकं चतुर्थी भूमिकामितः ॥ ४७ ॥

---

१. सुर–क०

पञ्चमीं भूमिकामेत्य सुषुप्तिपदनामिकाम् ॥
षष्ठीं गाढसुषुप्ताख्यां क्रमात्पतति भूमिकाम् ॥ ४८ ॥

षष्ठयां भूम्यामसौ स्थित्वा सप्तमीं भूमिमाप्नुयात् ॥
किञ्चिदेवैषसम्पन्नस्त्वथवैष न किञ्चन ॥ ४९ ॥

विदेहमुक्तिता तूक्ता [1]सप्तमीयोगभूमिका ॥
अगम्या वचसां शान्ता सा सीमा योगभूमिषु ॥ ५० ॥

चतुर्थीभूमिकाज्ञानं तिस्रः स्युः साधनं पुरा ॥
जीवन्मुक्तेरवस्थास्तु परास्तिस्रः प्रकीर्तिताः ॥ ५१ ॥

ज्ञानस्य भूमिकास्तिस्रश्चरमाः क्रमतोऽव्रजन् ॥
परमानन्दनिस्पन्दो मुक्त इत्युच्यते बुधैः ॥ ५२ ॥

ब्रह्मैव निष्क्रियमसौ पुरुषो विमुक्तः
प्रारब्धतो वपुरमुष्य वियुष्यमाणम् ॥
मत्तस्य वस्त्रमिव निल्वयनीव[१] चाहे-
र्वल्मीकगानममताविषयः कदापि ? ॥ ५३ ॥

दिङ्मात्रमेतदुदितं तव नानक ? त्वं
जानासि तत्त्वमखिलं मनसा श्रुतैश्च ॥

---

1. ज्ञानभूमिः सप्तविधा–i. शुभेच्छा ii. विचारणा iii. तनुमानसा
iv. सत्वापत्तिः v. संसक्तिः vi. पदार्थाभावनी
vii. तुर्यगा ॥

तत्र प्रथमभूमिकायां श्रवणं द्वितीयायां मननं तदा निदिध्यासनं जायते चतुर्थ्यां सत्वापत्तौ लोकं स्वप्नवत्पश्यन्ति जनाः इत्थं च सप्तम्यां क्रमन्तो यजन्तो जनाः मुक्ता जायन्ते ॥

१. निल्वं–क० सर्पस्यत्यक्तं चर्म "केचुली"

अंशोऽसि मे कलियुगे कलयस्व बोधं
मार्गेण मूढमनसां सुगमेन सौम्य ! ॥ ५४ ॥

जन्मान्तरेषु कृतसाधनसम्पदो ये
त्वामाश्रितास्त्वदुपदेशगिरं निशम्य ॥
पास्यन्ति तेधिततत्त्वधियो विमुक्ति—
मित्यर्थमेव तव भूमितलेवतारः ॥ ५५ ॥

एतद्धि दण्डविधृतिः स्मृतिभिर्निषिद्धा
वैखानस ! त्वमपि नैष्ठिकतापि सौम्य ! ॥
स्वस्थानकर्मठतया[2] सततं गृहस्थाः
शैवेषु वैष्णवजनेषु महान् विरोधः ॥ ५६ ॥

उदासीनः समस्तेषु मतेषु ब्रह्मवित्तया ॥
उदासं नाम सन्यासं तस्मादङ्ग ! प्रवर्तय ॥ ५७ ॥

[1]न जटासु न मुण्डत्वे न विभूतौ न चन्दने ॥
दिगम्बरत्वे वसने नाग्रहः स्यादुदासिनाम् ॥ ५८ ॥

नेपथ्यमात्रेण भवन्ति नार्था
गुणैर्विहीनस्य कदापि सौम्य ! ॥
मूल्यं लभन्ते न पयो विहीना
गावः समन्ताद्गलवद्धघण्टाः ॥ ५९ ॥

आस्थापरब्रह्मविदां न लोके
यथा तथा वाऽस्त्विति बुद्धिभाजाम् ॥

---

1. उदासं नाम सन्यासं प्रवर्तयितुं नानकावतारः कलियुगे । परं तत्र संन्यासिनां जटादावाग्रहो न भवेदिति भगवदुक्तिः ॥ अत्रविषये कविः पयोविहीनया गवा दृष्टान्तं ददाति। उदासिनास्त्वात्मचिन्तका इति नास्ति तेषां कृते नेपथ्यस्यावश्यकता ।

२. मूह–क०

निर्वैरता सर्वमतेषु तस्मा-
दुदासिनामात्मविचिन्तकानाम् ॥ ६० ॥

शिष्यास्तु केशान्बिभृयुः सदैव
शस्त्राणि च म्लेच्छनिवारणाय ॥
ग्रन्थेगुरौ चास्तु परैव भक्ति-
र्देवे द्विजे त्वन्मतसंस्थितानाम् ॥ ६१ ॥

उपासतां ब्रह्म भवन्मनस्था
निवृत्तिमार्गैकरसा भवन्तु ॥
न यन्तु वैराग्यविरोधिकर्म
स्मार्तेन मार्गेण तदा चरन्तु ॥ ६२ ॥

भवन्तु तीर्थानि कृताश्रमाश्रे-
दातिथ्य मायातजनस्य कुर्युः ॥
प्रियम्बदाः सन्तु सदैव मान्याः
सर्वत्र सर्वस्य नये स्थितास्ते ॥ ६३ ॥

शाखोपशाखाभिरिदं त्वदीयं
मतं ततं भावि भवे भवेयुः ॥
सिद्धाः प्रसिद्धा बहवस्तथास्मिन्
दिगम्बरा ज्ञानिधुरन्धराश्च ॥ ६४ ॥

रौद्राक्षी पौत्रजीवी वा प्रायो माला[1] प्रशस्यते ॥
मन्त्रः कालत्रये ब्रह्मसत्यताप्रतिपादकः ॥ ६५ ॥

दासान्तं वापि रामान्त गुरुब्रह्मपदाङ्कितम् ।
नामत्रयाप्यनियम औदासीन्यं हि सर्वतः ॥ ६६ ॥

1. न्याला–क०

ग्रन्थास्ते भाषया सन्तु मन्दानां प्रतिपत्तये ॥
पात्रेण येनकेनापि पयः पानं हि तृप्तिदम् ॥ ६७ ॥

किमधीतैर्महाग्रन्थैरभिमान[1]विवर्द्धनैः[2] ॥
भक्तिर्न मयि चेज्जाता प्रयातानाप्यहं मतिः ॥ ६८ ॥

सन्त्येव सर्वोपनिषत्प्रबंधाः
सूत्राणि भाष्याणि तदर्थकानि ॥
स्त्रीशूद्रबोधाय च बालिशानां
ज्ञानाय नानावचनैर्यतस्व ॥ ६९ ॥

भाषाप्रबन्धान् भवता प्रणीतान्
ये भक्तिवैराग्यविबोधदातॄन् ॥
पठेयुरेते कृतिनो भवेयु-
र्भ्रश्यन्तु विद्वेषकरा नरा ये ॥ ७० ॥

त्वन्मतस्थः परो वापि यस्त्वां नानक ! पूजयेत् ॥
तस्य[1] सिध्यन्तु सर्वेऽर्थाः श्रद्धाविश्वाससम्पदा ॥ ७१ ॥

क्षेत्राणि ते जन्म विहारगोष्ठी
कृतानि ये यान्ति नराः पृथिव्याम् ॥
समृद्धकामा गतया यदीषा
स्तोषाय मे ते प्रभवन्ति सन्तः ॥ ७२ ॥

तथा यतस्व[2] योगीन्द्र ! ग्रामे ग्रामे गृहे गृहे ॥
यथाखण्डचिदानन्दकथा ऋज्वी प्रवर्त्तते ॥ ७३ ॥

---

1. नानकपूजायाः फलश्रुतिरत्र ।
2. नानकं नानकधर्मप्रचारायोपदिशति विष्णुः ।
१. विवद्धनैः—क०
२. निबन्धनैः—ख०

तारणाय जगतो गतो भवान्
पाहि तत्कुरु हितं हितं नृणाम् ॥
आगमिष्यसि मृतोऽमृतो[1] निशं
सीदतो वनमतो मतोचितान्[2] ॥ ७४ ॥

इत्थं प्रसह्य वदतः पुरुषोत्तमस्य
पादारविन्दतुलसीं सिरशा दधानः ॥
आमन्त्र्य नानकमुनिर्निरगात्प्रसन्न-
स्तत्पार्श्ववर्तिविबुधैरभिनन्द्यमानः ॥ ७५ ॥

आजगाम ततो योगी वैकुण्ठादीशसत्कृतः ॥
ध्रुवस्य लोक आवाभ्यां नतः स्मेरमुखाम्बुजः ॥ ७६ ॥

ततः प्रसन्नं तमुदीक्ष्य धीरं[3]-
ध्रुवोऽवदद्विष्णुरुदीक्षितः किम् ? ॥
कीदृग्विधः किं परिवार आस्ते ?
किमाबभाषे ? सविधे गतं त्वाम् ॥ ७७ ॥

योगीन्द्रोऽवददीश्वरः स जगतां कर्ता तथा रक्षिता
संहर्ता रविकोटिदीधितिरपि स्वेषां सदा शीतलः ॥
ब्रह्माद्याः सनकादयः सुरमुनिव्राताः सुराधीश्वराः
सेवन्ते श्रुतिभिः स्तुवन्ति च दयादत्ताः[4] प्रवेशाः क्वचित् ? ॥७८॥

तल्लावण्यविमोहिताजलधिजा चेचामरग्राहिणो
केन श्रीरुपमीयतां ? नवघनश्यामस्य तस्यातुला ॥

---

१. सृतोमृतो–क०
२. यथो–क०
३. धीरो–ख०
४. दयादत्तप्रवेशाः–ख०

ऐश्वर्यं कलयस्व गोपुरागतो दौवारिकप्रार्थना
प्रह्वस्तिष्ठति सर्वदेव निवहैरुद्धस्तु वृद्धश्रवाः ॥ ७९ ॥

आहूय[1] स्वान्तिकं देवो दयादृष्ट्या व्यलोकयत् ॥
स्तुतः प्रश्नान्ममावोचदुदासिमतमादिशत्[2] ॥ ८० ॥

दृष्टस्त्वयापि सुलभः स हि भक्तिभाजां
बाल्ये तुतोष तव तीव्रतपस्यया यः ॥
तस्यारबिन्द नयनस्य निरीक्ष्यरूप-
मक्ष्णाभुवमनृणकोऽहमहो ! कृतार्थः ॥ ८१ ॥

ध्रुवोऽवदत्तमीशानमित एव विलोकये
सनिरावरणं ज्योतिरहमस्मि स एव च ॥ ८२ ॥

स च भवांश्च [1]यदैक इहस्थित-
स्तदधिकारधरोसि[2] तदा कुतः ? ॥
अभिदधाविति मर्दननामको
ध्रुव उवाच वचः श्रृणु मर्दन ? ॥ ८३ ॥

लीलेयं सृष्टिरीशस्य तन्निर्वाहाधिकारिणः ॥
ब्रह्माद्या अहमप्यङ्ग ? व्यवहारे पृथक् कृताः ॥ ८४ ॥

तं नानकोब्रूत वयं ब्रजाम
आमन्त्रयामो ध्रुव ? हेभवन्तम् ॥
दयादृशा पश्य जनार्दनस्य
त्वं व्यापकं पश्यसि रूपमङ्ग ॥ ८५ ॥

---

१. आहूयैव–क०
२. दुदाशि–क०
१. यदेक–क०
२. कारकरोसि–क०

ध्रुवोऽवदद् ध्रुवमसि वैष्णवी कला
कलावमून्कृतसुकृतान्कृतार्थयन् ॥
अवातरस्तरणिरिव प्रकाशय
स्व तेजसा तिमिरमुदस्य सत्पथम् ॥ ८६ ॥

इदं पदं यदि रुचितं कृतार्थय
क्षितेः शुभा यदि नियतिस्तदाऽस्तु तत् ॥
खलो मिलन् व्यथयति संज्जनः सतो
विबाधते खलु विभजंस्तु मादृशः ॥ ८७ ॥

प्रणेमतुः प्रीतियुतौ परस्परं
चिराय राजर्षिवरौ सुसङ्गतौ ॥
स्थितस्तदैकः स्वपदे विषण्णधीः[१]
परो जगाम क्षितिलोकमुन्मना ॥ ८८ ॥

सर्वमाचष्ट वैकुण्ठे सम्वादं शार्ङ्गधन्वनः ॥
आवाभ्यामध्वनि शनैर्योगी स्वजनवत्सलः ॥ ८९ ॥

आवामाकर्ण्य गोविन्दगदितं विस्मतावुभौ ॥
भूगोलस्य खगोलस्य स्थितिं पप्रच्छ मर्दनः ॥ ९० ॥

गुरुः सर्वज्ञमूर्धन्यो धन्यो गोविन्ददर्शनात् ॥
सप्रमाणं ससंस्थानं स्थानं [२]तत्तदवर्णयत् ॥ ९१ ॥

स्थूलं रूपमिदं हरेर्भगवतो मायागुणैः कल्पितं
ब्रह्माण्डानि विलक्षणानि[१] विविधैर्जीवैर्निविष्टानि च ॥

---

१. ण्ण–क०
२. तत्तदवर्णयत्–क०

कः कात्स्न्र्येन विदाङ्करोतु तदिदं मोहो हि यस्मिन् विदां
तुभ्यं मर्दन? कीर्तये तदपि भोः शुश्रूषवे किञ्चन ॥ ९२ ॥

मायामये भगवतो वपुणुषि त्रिलोक्यां
चित्तं स्थिरं सहति सूक्ष्ममपि ग्रहीतुम् ।
स्थूले क्वचित्स्थिरकरः प्रशमं शरव्ये
धन्वीसु सूक्ष्ममपि विध्यति सायकेन ॥ ९३ ॥

लक्ष योजनविस्तारो जम्बूद्वीपोऽयमुच्यते ॥
वर्तुलो नववर्षाणि तस्मिन् भिन्नानि पर्वतैः ॥ ९४ ॥

योजनानां सहस्राणि नवसप्तसुविस्तृतिः ॥
भद्राश्वे केतुमाळे च चतुस्त्रिंशदिति स्थितिः ॥ ९५ ॥

धनुर्वत्सं स्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे ॥
दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम् ॥ ९६ ॥

कमलमिव धरातलं तदन्त–
र्ललितमिलावृत मत्र कर्णिकेव ॥
कनकगिरिरुपाश्रितः सुरोच्चै–
र्विलसति योजनलक्षतुङ्गशृङ्गः ॥ ९७ ॥

योजनानां सहस्राणि द्वात्रिंशत्तस्य मूर्धनि ॥
मूले षोडशविस्तारः प्रविष्टस्तावता महीम् ॥ ९८ ॥

सहस्रैर्वेदवसुभिर्योजनानां बहिः स्थितः ॥
इलावृतस्योत्तरत्र रम्यके नीलपर्वतः ॥ ९९ ॥

हिरण्मये श्वेतगिरिं शृङ्गवान्कुरुवर्षगः ॥
क्षीरोदावधयो दीर्घाः प्राच्यां सीमा महीधराः ॥१००॥

१. विलंक्ष—क०

I. श्लोक ९४ तः ३४२ श्लोकं यावत् अर्थात् सर्गान्तं यावत् भूगोलादि वर्णनं कृतमस्ति ॥

इमे त्रयस्तथोत्तुङ्गा योजनायुतसंख्यया ॥
विस्तीर्णा द्विसहस्रा च योजनानामुदाहृताः ॥१०१॥

निषधोद्रिर्हरिवर्षे
किंपुरुषे हेमकूटाख्यः ॥
हिमशैलोऽपि[1] च भारत-
इलावृतो दक्षिणे भागे ॥१०२॥

विस्तृतिस्तुङ्गताचैषां नीलादिवदुदाहृता ॥
माल्यवान्पश्चिमे भागे पुरस्ताद् गन्धमादनः ॥१०३॥

इलावृतस्य ग्रावाणां[1]
वानीलनिषधायतौ ॥
केतुमालं च भद्राश्वं
परिच्छिद्य स्थितावुभौ ॥१०४॥

योजनानां सहस्रे द्वे
विस्तीर्णौ परिकीर्तितौ ॥
दिक्षु मेरोरूपष्टम्भा[2]
मंदरो मेरुमन्दरः ॥१०५॥

सुपार्श्वः कुमुदश्चैवायुतयोजनविस्तृताः ॥
चूतजम्बूकदम्बाश्च न्याग्रोधस्तरवः क्रमात् ॥१०६॥
एकादशशतान्येषु योजनानि समुन्नताः ॥
पथीमब्धि क्षुरससज्जलपूर्णह्रदा अपि ॥१०७॥

---

१. शैली–क०
१. धावाणां–क०
२. ष्टम्भो–क०

वनानि नन्दनं चैत्ररथं वैभ्राजसंज्ञकम् ॥
सर्वतो भद्रसंज्ञं च क्रमात्तत्र नभः सदाम् ॥१०८॥

अरलीनां शतान्यष्टावेकषष्ठ्याधिकानि च ॥
मानं मन्दरमाकन्द फलस्य परिकीर्तितम् ॥१०९॥

अरुणोदा नदी याति रसालरससम्भवा
इलावृतस्य पूर्वस्यां दिशि मन्दरतोयुता ॥११०॥

गिरिजानुचरीस्तस्याः पिबन्ती रसमुत्तमम् ॥
स्पृशन्वासयते वातः समन्ताद्दशयोजनम् ॥१११॥

जम्बूफलानां मानङ्गसदृशां स्यन्दते रसैः ॥
मेरुमन्दरतोजंबूनदीलावृतदक्षिणे ॥११२॥

तस्या रसा सेकवशान्मृत्तिकारोधसोर्द्वयोः ॥
शुष्कासमीरसूर्याभ्यां जाम्बूनदमुदीर्यते ॥११३॥

कदम्बकोटराज्जाताः सुपार्श्वशिखराच्च्युताः ॥
वहन्ति मधुनो धाराः पञ्च पश्चादिलावृतात् ॥११४॥

पिबतां ता मुखोद्भूता निश्वासाः शतयोजनम् ॥
आमोदयन्ति सततं मोदयन्ति मनांसि च ॥११५॥

विभाति न्यग्रोधः शतवलशनामा कुमुदगो
नदास्तस्योदीच्यां विदधति वतेलावृतमभि ॥
जनानांमानन्दं दधिमधुसितादुग्धघृतसद्-
विभूषा वस्त्राद्यैरपि विविधभोज्यैरनुदिनम् ॥११६॥

तद् गृह्णतां नवलयः पलितं जनानां
स्वेदोद्गमो विविधविघ्न भवानचिन्ता ॥
वैवर्ण्यमश्रुजडता त्रिविधो न तापो
दौर्गन्ध्यमिन्द्रियहतिर्न जरा न मृत्युः ॥११७॥

विंशतिः केशराकाराः कुरङ्गकुररादयः ॥
सर्वतः पर्वता मेरोः कर्णिकाश्च चकासति ॥११८॥

जठरो देवकूटश्च मेरोः प्राच्यां धराधरौ ॥
सहस्रयोजनादग्रे द्विसहस्रं पृथून्नतौ ॥११९॥

अष्टादशसहस्राणि योजनानामुदग्गतौ ॥
पवनः पारियात्रश्च प्रतीच्यां तस्य संस्थितौ ॥१२०॥

कैलाशः करवीरश्च दक्षिणस्यामवस्थितौ
त्रिश्रृङ्गमकरौ तस्मादुदीच्यामुपकल्पितौ ॥१२१॥

मेरौ [1]नवपुराणि स्युर्मनोवत्यमरावती ॥
तेजोवती संयमनी[1] तथा कृष्णाङ्गना[2] परा ॥१२२॥

श्रद्धावती गन्धवती तथाचान्या महोदया ॥
यशोवती च ब्रह्मेन्द्रब्रह्मादीनां यथाक्रमम् ॥१२३॥

विष्णुनामपदाङ्गुष्टं भित्त्वा ब्रह्माण्डतश्च्युता ॥
मेरुस्थब्रह्मसदने चतुर्धा याति जाह्नवी ॥१२४॥

---

1. मेरौ नव पुराणि—
(i) मनोवती। (ii) अमरावती।
(iii) तेजोवती। (iv) संयमनी।
(v) कृशाङ्गना। (vi) श्रद्धावती।
(vii) गन्धवती। (viii) महोदया।
(ix) यशोवती।

1. मेरुस्थ ब्रह्मसदनात् जाह्नवीगतिश्चतुर्धा—
(i) सीता गन्धमादनं गच्छति।
(ii) भद्रा क्षारसारगं याति।
(iii) महाजवा माल्यवन्तं याति।
(iv) केतुमाला पश्चिमं सागरं गच्छति।

१. सँयमनी—क०
२. कृष्णाङ्गता—क०

सीता विरञ्चिसदनाद्गन्धमादनमीयुषी ॥
भद्राश्वमन्तरा प्राच्यां क्षारसागरगामिनी ॥१२५॥

चक्षुर्माल्यवतः शृङ्गं गाहमाना महाजवा ॥
केतुमाला प्रसर्पन्ती पश्चिमं याति सागरम् ॥१२६॥

भद्रा सुमेरुशिखरादुदकागार गामिनी ॥
शृङ्गवन्तमतिक्रम्य प्रविशत्युत्तरान् कुरून् ॥१२७॥

तथैवालकनन्दापि हेमकूटावघट्टिनी ॥
वहन्ती भारते वर्षे दक्षिणं याति सागरम् । १२८॥

याममि व्रजतः पुंसः पूर्वपुण्यैः पदे पदे ॥
राजसूयाश्वमेधादि यज्ञानां सुलभं फलम् ॥१२९॥

भारते कुरुते जन्तुर्यत्तु कर्मशुभाशुभम् ॥
द्वीपान्तरे तस्य भोगः स्वर्गे च नरकेषु च ॥१३०॥

वर्षान्तरेषु पुरुषोऽयुतवर्षजीवी
स्वस्वर्गशेषसुखभोगकृतावतारः ॥
नागायुतोऽद्भुतवलो वनितैकगर्भा
त्रेतासमो भवति तत्र समोपि कालः ॥१३१॥

विहरन्ति तत्र वनितासखाः सुरा
विपिषु फुल्लनववल्लिचारुषु ॥
कलहंससारसकृतस्वनास्वलं
मणिदीर्घिकासु विकलोत्पलासु च ॥१३२॥

इलावृते चन्द्रधरः परः पुमान्
शिवा प्रकोपादितरास्तु योषितः ॥
स्तुवन्ति संकर्षणमत्रदैवतं
यशोभिरस्यैव सदा सुमङ्गलैः ॥१३३॥

भद्रश्रवास्तु भद्राश्चेद्धर्मसूनुः समाहितः ॥
स्तौति सर्वैर्निजजनैर्हयग्रीवं रमापतिम् ॥१३४॥

प्रह्लादो हरिवर्षे
वर्षस्थैः सज्जनैः सहितः ॥
नरहरिमुज्ज्वल यशसं
भक्त्या रोमाञ्चितः स्तौति ॥१३५॥

केतुमालेऽपि[1] भगवान् कामदेवो हरिः श्रिया ॥
स्तूयते रुचिरालापस्मितालोकमनोहरः ॥१३६॥

रम्यके च मनुः स्तौति मत्स्यरूपिणमीश्वरम् ॥
तद्वर्षपुरुषैः सर्वैः पुरा तस्मै प्रदर्शितम् ॥१३७॥

हिरण्मये च तिष्ठन्तं कूर्ममूर्तिं मधुद्विषम् ॥
वर्षस्थैः पुरुषैः स्तौति पितॄणां पतिरर्यमा[2] ॥१३८॥

उत्तरेषु कुरुषु स्थितो हरिः
सौकरं मखमयं वहन् वपुः ॥
स्तौति तं वसुमती समन्विता
वर्षवासिपुरुषैः प्रहर्षितैः ॥१३९॥

सीतापतेः किं पुरुषे हनूमान्
युतः स्तुतिं किं पुरुषैः करोति ॥
उदारतामस्य जनानुरागं
स्मरन् परं प्रेमसमुद्रमग्नः ॥१४०॥

श्रीपतिं भारते वर्षे नरनारायणात्मकम् ॥
नारदः सांख्ययोगाभ्यां प्रजाभिः स्तौति सङ्गतः ॥१४१॥

श्रीशैलो विन्ध्यः सह्याद्याश्च महीधराः ॥
नर्मदाद्याश्च सरितो भारते सन्ति भूरिशः ॥१४२॥

वाञ्छन्ति भारते वर्षे जन्म देवगणा अपि ॥
यत्र सद्यः शुभाचारैर्वासुदेवः प्रसीदति ॥१४३॥

वदन्त्यष्टावुपद्वीपान् जम्बूद्वीपस्य मर्दन ? ॥
स्वर्णप्रास्त्वश्वमुक्तस्थ आवर्तन इति स्मृतः ॥१४४॥

उक्तो रमणकौमन्दहरिणा पाञ्चजन्यकः ॥
सिंहलश्चैव लङ्का च नामतः परिकीर्तिताः ॥१४५॥

लक्ष्ययोजनविस्तारः समन्तात् क्षारसागरः ॥
जम्बूद्वीपात्ततः प्लक्षद्वीपस्तु द्विगुणो मतः ॥१४६॥

प्लक्षो जम्बू प्रमाणोऽस्ति सौवर्णो द्वीपनामकृत् ॥
तस्मिन्नास्ते सदा सप्तजिह्वो देवस्तनूनपात् ॥१४७॥

प्रियव्रतसुतस्तस्मिन्निध्मजिह्वो विरक्तधीः ॥
विभज्य सप्तवर्षाणि स्वपुत्रेभ्यो ददौ किल ॥१४८॥

शिवं च यवसं चैव सुभद्रं शान्तमेव च ॥
क्षेमामृताभयानि स्युस्तस्मिन् वर्षाणि नामतः ॥१४९॥

मणिकूटो वज्रकूट इन्द्रसेनस्तथैव च ॥
ज्योतिष्मांश्च सुपर्णश्च हिरण्यष्टीतिनामकः ॥१५०॥

मेघमाल इति प्रोक्ता मर्यादागिरयस्तथा ॥
सप्तैव तत्र वर्षाणां समानां भेदकारकाः ॥१५१॥

अरुणा नृमणाङ्गिरसा
सावित्री सुप्रभाता च ॥
प्रथिता ऋतम्भराख्या
नदी च सत्यम्भरा तत्र ॥१५२॥

हंसायतगोद्धापनाः
सत्यांगास्तत्र वर्णाश्च ॥

उपतिष्ठन्ते निगमै-
भगवन्तं भास्करं भक्त्या ॥१५३॥

समेन क्षरसोदेन प्लक्षद्वीपः समावृतः ॥
द्विगुणः शाल्मलिर्द्वीपः प्लक्षतुल्योऽत्र शाल्मलिः ॥१५४॥

गरुडस्य गृहं तत्र श्रुत्या यः स्तौति केशवम् ॥
प्रियव्रतसुतोपज्ञबाहुस्तत्र विभक्तवान् ॥१५५॥

वर्षाणि सप्तपुत्रेभ्यः शृणु तन्नाम मर्दन ? ॥
सुरोचनं सौमनसं वर्षं रमणकंस्तथा ॥१५६॥

देववर्षं पारिभद्रमाप्यापनमिति स्मृतम् ॥
अविज्ञानं च गिरयः स्वरसः शतशृङ्गकः ॥१५७॥

वामदेवश्च कुन्दश्च कुमुदः पुष्पवर्षकः ॥
सहस्रश्रुतिरित्येव सरितोऽनुमतिः स्मृताः ॥१५८॥

सिनीवालीसरस्वत्यौ कुहूश्च रजनी तथा ॥
नन्दा राकेति कथिता वर्णाः श्रुतिधरः स्मृतः ॥१५९॥

तथावीर्यधरश्चैव वसुन्धर इषुन्धरः[1] ॥
यजन्ते वेदविद्वांसो देवं कुमुदबान्धवम् ॥१६०॥

समेन शाल्मलिर्द्वीपः सुरो देनावृतो[2] बहिः ॥
द्विगुणोतः कुशद्वीपः कुशोत्रज्वलनोपमः ॥१६१॥

हिरण्यरेता इत्युक्तः प्रियव्रतसुतो नृपः ॥
विभज्य सप्तवर्षाणि स्वसुतेभ्यो न्यवेदयत् ॥१६२॥

---

१. इसु–ख०
२. देवावृतो–क०.

वसुश्च वसुदानश्च स्मृतो दृढरुचिस्ततः[1] ॥
सत्यव्रतो नाभिगुप्तो विविक्तो नामदेवकः ॥१६३॥

इति तस्य सुतावर्षो नामान्येतादृशानि च ॥
शैलाश्चक्रश्चतुःशृङ्गः कपिलश्चित्रकूटकः ॥१६४॥

[2]दैवानीकश्चोर्द्ध्वरोमा द्रविणः परिकीर्तिताः ॥
सरितो रसकुल्या च मधुकुल्या तथैव च ॥१६५॥

श्रुतविन्दा मित्रविन्दा देवगर्भा घृतच्युता ॥
मन्त्रमालेति कथिता वर्णाश्च[3] क्रमतःशृणु ॥१६६॥

कुशलः कोविदश्चैवाभियुक्तः कुलकस्तथा ॥
प्रजानभःसदामास्यं[4] वैश्वानरमुपासते ॥१६७॥

कुशद्वीपो घृतोदेन[5] समेन बहिरावृतः ॥
ततो बहिस्तद्द्विगुणः क्रौञ्चद्वीपोऽस्ति मर्दन ॥१६८॥

क्रौञ्चो नाम महाशैलस्तस्य संज्ञा प्रवर्तकः ॥
न केवलं गुहस्यापि क्रौञ्चदारणनामकृत् ॥१६९॥

पुरा प्रकोपाच्छिखिवाहनेन
शक्त्या स्वशक्त्या व्रणितस्य तस्य ॥
दुग्धो दधिद्वीपसमो व्रणस्यं
पूर्त्यै ध्रुवं सिञ्चति किञ्च दुग्धैः ॥१७०॥

---

१. दृढसखः—ख०
२. देवानी—ख०
३. वर्णाश्च—क०
४. आस्थं—क०
५. घृतोदेन—क०

प्रियव्रतस्य पुत्रोऽत्र घृतपृष्ठो ददौ पुरा ॥
वर्षाणि पुत्रनामानि पुत्रेभ्यः सप्त मर्दन ! ॥१७१॥
आमो मधुरुहो मेघपृष्ठो[1] भ्राजिष्ठसंज्ञकः ॥
सुधामा लोहितार्णश्च वनस्पतिरिमे सुताः ॥१७२॥
शुक्रश्च वर्द्धमानश्च भोजनश्चोपबर्हिणः ॥
नन्दश्च नन्दनश्चैव सर्वतोभद्र इत्यपि ॥१७३॥
शैला नद्यो[2] भयामायामृतौघाऽप्यार्यका[3] तथा ॥
उक्ता तीर्थवती शुक्ला सपवित्रवती मता ॥१७४॥
वर्णास्तु पुरुषस्तत्र ऋषभो द्रविणस्तथा ॥
देवकोञ्जलिना यान्ते मायादेवीमुपासते ॥१७५॥
ततःपरस्ताद् क्षीरोदाच्छाकद्वीपोऽस्ति मर्दन ! ॥
द्वात्रिंशल्लक्षगणितयोजनायाम एष तु ॥१७६॥
शाकस्तरुस्तं द्वीपं तु सुरभीकुरुतेऽभितः ॥
प्रियव्रतसुतो मेधातिथिस्तत्र विभज्य तु ॥१७७॥
सप्तवर्षाणि पुत्रेभ्यस्तन्नामानि ददौ पुरा ॥
पुत्राः पुरोजवास्तस्य मनोजव इति स्मृतः ॥१७८॥
पवमानश्च कथितो धूम्रानीकस्तथैव च ॥
चित्ररेफो निगदितो बहुरूपः प्रकीर्तितः ॥१७९॥
विश्वाधारश्च गिरय ईशान उरुशृङ्गकः ॥
बलभद्रश्च कथितस्तथा शतकेसरकः ॥१८०॥

---

१. पृष्ठौ—क०
२. नद्योनद्यो—क०
३. भयामृतौघाप्या—क०

उक्तः सहस्रस्रोतश्च देवपालमहानसौ ॥
नद्यस्तत्राऽप्युदासंज्ञीत्युभयस्पृष्टिरेव च ॥१८१॥

उक्ता पराजिता पञ्चपदी च परिकीर्तिता ॥
सहस्रस्तुतिसंज्ञा च तथा निजधृतिः स्मृता ॥१८२॥

वर्णा ऋतव्रतः सत्यव्रतो दानव्रतस्तथा ॥
अनुव्रतोऽनिलं देवं प्राणायामैरुपासते[1] ॥१८३॥

[2]दण्डिभण्डोदधिर्द्वीपं समस्तमुपगूहते ॥
परस्तात्पुष्करद्वीपो द्विगुणंस्तत्र पुष्करम् ॥१८४॥

कनकायुतपत्राणि चासनं परमेष्ठिनः ॥
प्रियव्रतसुतो वीतिहोत्रः स्वात्मजयोरदात् ॥१८५॥

वर्षं रमणकं चैव घातकिश्च तदाख्ययोः ॥
मानसोत्तरसंज्ञोऽस्ति योजनायुतमायतः ॥१८६॥

तुङ्गस्तथा द्वीपमध्ये वर्षसीमाकरो गिरिः ॥
दिक् चतुष्टयवर्तिन्यः शक्रादीनां पुरोऽत्र च ॥१८७॥

परितो भ्रमतो मेरुं रवेः संवत्सरात्मकम् ॥
अहोरात्रेण देवानां चक्रं भ्राम्यति तत्र च ॥१८८॥

स्वकर्मणा विशुद्धेन पुरुषाः परमेष्ठिनम् ॥
यजन्ते विश्वकर्तारं देवानां प्रपितामहम् ॥१८९॥

स्वादूदकेन द्वीपोऽयं समेन परिवेष्टितः ॥
ततः परस्तादचलो लोकालोको व्यवस्थितः ॥१९०॥

---

१. सर्वस्मिन् वर्ण्यमाने द्वीपे चत्वारिवस्तूनि वर्णितानि सन्ति। नद्यः, गिरयः, वर्णाः, उपासकाश्च।

२. दण्डिमण्डो—क०

प्रकाशस्यान्धकारस्य मर्यादाकारकः स च ॥
योजनानां सार्धकोटिः सप्तलक्षी च साधिका ॥१९१॥

मेरोः परस्ताद् भूरस्ति मानसोत्तरतः पुरः ॥
तावती स्वादुजलतः समुद्रात्परतो मही ॥१९२॥

तत्र तु प्राणिनः सन्ति ततः काञ्चनमेदिनी ॥
एकोनचत्वारिंशद्भिः लक्षैः कोट्यष्टकं युतम् ॥१९३॥

योजनानां तु सा तत्र देवा दीव्यन्ति नेतरे ॥
लोकालोकस्य शैलस्य मेरोश्चान्तरमेकतः ॥१९४॥

सार्द्धद्वादशकोट्यः स्युर्योजनानां महामते ! ॥
ध्रुवादप्युन्नतो यस्माल्लोकालोको महाचलः ॥१९५॥

ततस्तं नातिवर्तन्ते[1] सूर्यादीनां गभस्तयः ॥
[2]अन्धकारो योजनानां सार्द्धद्वादशकोटयः ॥१९६॥

ततः परस्तात्कथिता विशुद्धा योगिनां गतिः ॥
भूमण्डलमिदं सौम्य ! पञ्चाशत्कोटियोजनम् ॥१९७॥

ऋषभः पुष्करचूडो वामनसंज्ञोपराजितो दिक्षु ॥
शिरसा भुवं दधाना दिशागजायोजिता विधिना ॥१९८॥

ऊर्ध्वखण्डप्रमाणं तु पञ्चाशत्कोटि योजनम् ॥
पञ्चविंशतिकोट्यस्तु खण्डयोरन्तरं विदुः ॥१९९॥

कालस्य च दिशां चैव जनानामायुषस्तथा ॥
निमित्तं कर्मणां कर्म साक्षी सूर्यो विभाजकः ॥२००॥

---

१. सूर्यादीनां किरणानि लोकालोकं पर्वतं नातिवर्तते तस्यात्युन्नतत्वात् ।

२. अन्धकारात्परस्तात् योगिनां गतिः कथिता । अन्धकारस्य च योजनानां सार्धं द्वादश-कोटयो गतिः ।

युगाक्षकोटिबद्धस्य वायुपाशस्य कर्षणात् ॥
ध्रुवेणारोहणं भानोः प्रवेशोत्तरमण्डले ॥२०१॥

बाह्यं तु मण्डलं याति शीघ्रस्तद्दक्षिणायने ॥
रात्रिवृद्धिर्दिनह्रासस्ततो भवति मर्दन ! ॥२०२॥

वैषु वैपाशसाम्येन सममण्डलवेशने ॥
समागतिर्दिनमणेरहोरात्रसमानता ॥२०३॥

मेषेतुलायामेकस्मिन्नहोरात्रे समानता ॥
तथापि सूक्ष्मवैषम्यात्साम्यमित्येव कीर्त्यते ॥२०४॥

वृद्धिह्रासौ प्रतिदिनं विषमौ सूक्ष्मदर्शने ॥
तथापि घटिकाभासे सामान्येन प्रकीर्तिताः ॥२०५॥

वृषभे मिथुने वृद्धिर्दिनानां कर्कटादिषु ॥
ह्रासः किं नु निशोपेक्ष्यवृद्धिरित्येव कीर्त्यते ॥२०६॥

मन्दशीघ्रसमा नाभिर्गतिभिर्मानसोत्तरे ॥
नवकोटयैकपञ्चाशल्लक्षं भ्राम्यति भास्करः ॥२०७॥

सर्वग्रहाणां त्रीण्येव स्थानानि शृणु मर्दन ! ॥
स्थानं जरद्गवं मध्यं तथैतावत्तदुत्तरम् ॥२०८॥

वैश्वानरं[1] दक्षिणतो निर्दिष्टमिह तत्त्वतः ॥
वीथीत्रयेण प्रत्येकं त्रिधामार्गं[2] प्रचक्षते ॥२०९॥

अश्विनीकृत्तिकायाम्वा नागवीथीति शब्दिता ॥
रोहिण्यार्द्रामृगशिरे गजवीथ्यभिधीयते ॥२१०॥

पुष्योश्लेषा तथादित्या वीथी चैतावती मता ॥
एतास्तु वीथयस्तिस्र उत्तरोमार्ग उच्यते ॥२११॥

१. वैखानसं—ख०
२. मार्गो—ख०

तथा द्वे चापि फल्गुन्यौ मघा चैवार्षभीमता ॥
हस्तश्चित्रा तथा स्वाती गोवीथीति नु[1]शब्दिताः ॥२१२॥

ज्येष्ठा विशाखा मैत्रश्च वीथी जारद्गवी मता ॥
एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥२१३॥

मूलाषाढोत्तराषाढा[2] अजवीथ्यभिशब्दिता ॥
श्रवणं च धनिष्ठा च मार्गी [3]शतभिषक् तथा ॥२१४॥

वैश्वानरी भाद्रपदे[4] रेवती चेति कीर्तिता ॥
एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते ॥२१५॥

मानसोत्तरशैलोऽस्ति सुमेरोः पूर्वतः पुरी ॥
देवधानी सुरेशस्य दक्षिणे समवर्तिनः ॥२१६॥

संयमन्यभिधेया च निम्लोचन्यपि वारुणी ॥
विभावर्युत्तरे सौम्या क्रमास्तासु भवन्ति च ॥२१७॥

उदयोऽपि च मध्याह्नोऽस्तमयश्च निशीथकः ॥
सुमेरोर्दक्षिणे तेषामैत्राः पूर्वोदयो मताः ॥२१८॥

पश्चिमस्थास्तु याम्यायाः पूर्वाद्या हरितो विदुः ॥
उत्तरस्थाः सुमेरोर्या वारुण्यास्तु च ता विदुः ॥२१९॥

याः पूर्वे तास्तु सौम्यायाः प्राच्याद्या जानते दिशः ॥
मेरुस्थानां तु मध्याह्ने सदा तिष्ठति भास्करः ॥२२०॥

प्रदक्षिणावर्तवहन् प्रवहाख्येन वायुना ॥
भ्रमञ्ज्योतिश्चक्रवशान्मेरुर्दक्षिणतो रवेः ॥२२१॥

---

१. ती—क०
२. षाढ़ी—ख०
३. भिषा—ख०
४. भाद्रपदो—ख०

निःसरन्निव यत्रार्को भूमेस्तत्रोदयं विदुः ॥
प्रविशन्निव यत्रास्यां तत्रास्तमय उच्यते ॥२२२॥

उदयास्तमयौ चैव सर्वकालं तु सम्मुखौ ॥
दिशास्वशेषासु तथा जानीहि विदिशासु च ॥२२३॥

यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ॥
तिरोभावं च यत्रैति तत्रास्तमय[1] उच्यते ॥२२४॥

नास्तं गमनमर्कस्य नोदयः सर्वदा सतः ॥
उदयास्तमयाख्यं हि दर्शनादर्शनं रवेः ॥२२५॥

शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् ॥
विकर्णौ द्वौ विकर्णस्थस्त्रीन्कोणान्द्वे पुरे तथा ॥२२६॥

यस्य यत्रोदितः सूर्यः सा प्राची तस्य वामतः ॥
मेरुस्तद्द्वीपवर्षाणां सर्वेषामुत्तरः स[2] तु ॥२२७॥

योजनानां चतुस्त्रिंशल्लक्षाण्यष्टशतानि च ॥
मुहूर्तेन रथो गच्छन् पुरीर्भ्राम्यति भास्वतः ॥२२८॥

एकचक्रो द्वादशारः षण्णेमिश्च त्रिनाभिकः ॥
संवत्सरात्मको भानोर्भ्रमत्याकाशगो रथः ॥२२९॥

तस्य नीडस्तु षट्त्रिंशल्लक्षयोजनमायतः ॥
विस्तीर्णस्तुर्यभागेन तावानेव युगः स्मृतः ॥२३०॥

अरुणः सारथिस्तस्य सप्ताश्वा वामगामिनः ॥
अक्षो मेरौ परस्त्वक्षो वायुस्थो मानसोत्तरे ॥२३१॥

---

1. सूर्यस्योदयस्यास्तस्य च न कश्चिद्विशेषो नियमः ॥ परन्तु यत्र दृश्यते भास्वान् स तेषामुदयः, यत्र च तिरोभावं याति तत्रास्तमयः । इत्थं रवेर्दर्शनादर्शनं उदयास्तमयाख्यमस्ति ।

2. प्राक् प्रत्यगुदगवाग्वर्णनम् ।

राशौ राशौ रविबुधसिता आसते मासमेकम् ॥
भौमः सार्द्धं शिशिरकिरणो द्वे दिने पादयुक्ते ॥
त्रिंशन्मासांस्तपनतनयो वर्षमेकं च जीवो ॥
वैलक्षण्यान्निजनिजगतेराहुरष्टादशैव ॥२३२॥

यदगम्यं हि यत्किञ्चिद्वस्त्वस्ति धरणीतले ॥
तद्भूर्लोक इति ख्यातं साब्धिद्वीपाद्रिकाननम् ॥२३३॥

आद्यः पन्थाः कुलिङ्गानां ये च धान्योपजीविनः ॥
द्वितीयो बलिभोजानां येऽत्र वृक्षफलाशनाः ॥२३४॥

मासास्तृतीयं गच्छन्ति क्रौञ्चाश्च कुररैः सह ॥
श्येनाश्चतुर्थं गच्छन्ति गृध्रा गच्छन्ति पञ्चमम् ॥२३५॥

बलवीर्योपपन्नानां रूपयौवनशालिनाम् ॥
षष्ठस्तु पंथा हंसानां वैनतेयगतिं परा ॥२३६॥

शतयोजनमुत्तुङ्गं पृथिव्यां यान्ति पक्षिणः ॥
पार्थिवास्ते न भूरेव सूरिभिस्तावदुच्यते ॥२३७॥

[1]मेघास्तदूर्ध्वे तिष्ठन्ति तीव्रो वाति ततोऽनलः ॥
तदूर्ध्वमन्तरिक्षन्तु भूतप्रेतपिशाचभूः ॥२३८॥

योजनायुतमुत्तुङ्गे सिद्धचारणभूस्ततः ॥
योजनायुतमूर्ध्वे तु ततो राहुरवस्थितः ॥२३९॥

पैशाचो गौह्यको लोको गान्धर्वस्तदनन्तरम् ॥
वैद्याधरश्चाप्सरसो भुवर्लोके रविस्ततः ॥२४०॥

ततः सहस्राक्षपुरी व्योमङ्गः सुविभूषिता ॥
स्थानानि लोकपालानां निशानाथस्थितिस्ततः ॥२४१॥

लक्षद्वये योजनानामूर्ध्वे भानुर्भुवो मतः ॥
ततो लक्षे योजनानामुपरिष्टान्निशाकरः ॥२४२॥

लक्षत्रये योजनानां नक्षत्राणां स्थितिस्ततः ॥
द्विलक्ष्यमुशना भानोः पुरः पश्चात्सह व्रजन् ॥२४३॥

लक्षद्वये योजनानां बुधस्तस्योपरि स्थितः ॥
भास्वतः पुरतः पश्चात्सह वा परिसर्पति ॥२४४॥

लक्षद्वये योजनानां बुधादूर्ध्वे कुजस्थितिः ॥
द्विलक्षयोजने तस्मादूर्ध्वे देवगुरोः स्थितिः ॥२४५॥

[1]द्विलक्षयोजने तस्मादूर्ध्वे सूर्यसुतः स्थितः ॥
तथैकादशलक्षोर्ध्वे स्थिताः सप्तर्षयस्ततः ॥२४६॥

सत्रयोदशलक्षाणि योजनानां स्थितो ध्रुवः ॥
ऋषिभ्य ऊर्ध्वं खचरैः[2] क्रियते यः प्रदक्षिणः ॥२४७॥

ज्योतिश्चक्रमिदं प्राहुः शिशुमारप्रतिष्ठितम् ॥
धृतमीशेच्छयैवैतत् तत्र वा वायुमण्डले ॥२४८॥

रवेरधस्तात्स्वर्भानुस्तिष्ठत्ययुतयोजने ॥
पिदधाति रविं यत्तु ग्रहणं तत्प्रचक्षते ॥२४९॥

अयुतयोजनमुक्तमहर्पते[3]
रविसहस्रमितं तु निशापतेः ॥
त्र्यविकपंक्तिसहस्रमितं विदु-
र्बुधगणास्तमसः खलु मण्डलम् ॥२५०॥

भूर्लोकाच्च भुवर्लोका ध्रुवावधिरुदाहृतः ॥
आदित्यादाध्रुवं सौम्य ? स्वर्लोक इति गीयते ॥२५१॥

---

१. विलक्ष— क०

२. खचरैः—ख०

३. अहस्पति—क०

महर्लोकस्ततोप्यूर्ध्वमेककोटिप्रमाणतः ॥
कोटिद्वयं तु संख्यातो जनो भूर्लोकतो जनैः ॥२५२॥

चतुःकोटिप्रमाणस्तु तपोलोकोऽस्ति भूतलात् ॥
उपरिष्टात्क्षितेरष्टौ कोटयः [1]सत्यमीरितम् ॥२५३॥

भूमेरधस्ताद् भुवनानि सप्त
प्रत्येकतुङ्गायुतयोजनानि ॥
माया विना यत्र मयेन पुर्यः
सुवर्णरत्नैरचिता विभान्ति ॥२५४॥

अतलं वितलं चैव सुतलं च तलातलम् ॥
महातलमिति प्रोक्तं रसातलमतः परम् ॥२५५॥

पातालमुच्यते तेषु स्वर्गादप्यधिकं सुखम् ॥
[2]दैत्यनागा जरामृत्युरोगदुःखविवर्जिताः ॥२५६॥

वाप्यः प्रफुल्लकमला विमलाम्बुपूर्णाः
स्वर्णालवालधरणीरुहरम्यतीराः ॥
सोपानसञ्चरदनुत्तमनागकन्या
मञ्जीरमञ्जुनिनदैर्मदयन्ति चेतः ॥२५७॥

मयपुत्रो बलो[2] नाम निवसत्यतले सुरः ॥
येन षण्णवतिर्मायाः कृता मायाविभिर्धृताः ॥२५८॥

जृम्भमाणस्य वदनात्तिस्रस्तस्याऽभवन् स्त्रियः ॥
स्वैरिणी कामिनी चैव पुंश्चली जनमोहिनी ॥२५९॥

---

1. अतलं, वितलं, सुतलं, तलातलं, महातलं, रसातलं पातालमिति भूगोलाधस्तात् ।
2. पुरा बलो नामाऽसुरोऽतले न्यवसत् । जृम्भमाणस्य तस्य वदनात् तिस्रः स्त्रियः स्वैरिणी कामिनी पुंश्चली चेति निःसृताः ।

१. "कोट्यः स" इति नास्ति 'क' इत्यत्र ।

२. दैत्या—क०

[1]वितले सुरतासक्तो भवान्यां हाटकेश्वरः ॥
हाटकान्तस्य वीर्येण नदी तस्यास्तु हाटकम् ॥२६०॥

सुतले तु ततोधस्तादास्ते दैत्यपतिर्बलिः ॥
यस्य भक्त्यावशो विष्णुर्गदावान् द्वारि तिष्ठति ॥२६१॥

निरस्तो येन दिग्जेता पादाङ्गुष्ठेन गवणः[1] ॥
लघुर्गौरवमुत्सृज्य [2]प्रयातायुतयोजने ॥२६२॥

तलातले ततोधस्तान्मयो नाम महासुरः ॥
त्रिपुरारातिना विष्णोश्चक्रात् त्रातोवतिष्ठते ॥२६३॥

महातले काद्रवेयागणाः क्रोधवशाभिधः ॥
तक्षकाद्या वैनतेयाद्बिभ्यतो नित्यमासते ॥६६४॥

रसातले ततोधस्ताद्दैतेया दानवास्तथा ॥
निवातकवचा नाम कालेयाः पणयोऽपि च ॥२६५॥

वसन्ति देवदोग्धारो हिरण्यपुरवासिनः ॥
शुन्या समरया प्रोक्ताः परुषं ते च बिभ्यति ॥२६६॥

पाताले च ततोधस्ताद्वासुकिप्रमुखा भृशम् ॥
फणामणिकृतोद्योतास्तिष्ठन्ति बहुमस्तकाः ॥२६७॥

I. (i) वितले हाटकेश्वरः ।
(ii) सुतले बलिः ।
(iii) तलातले मयो नाम दैत्यः ।
(iv) महातले काद्रवेया गणः ।
(v) रसातले दैतेयाः दानवाः कालेयाः पणयश्च ।
(vi) पाताले ।
(vii) पातालादधस्तात्सहस्रवदनः शेषः ।

१. रावण—क०

२. ययाता—क०

योजनानां सहस्राणि त्रिंशत्तस्याप्यधो विभुः ॥
श्रीमान्सङ्कर्षणः शेषः सहस्रवदनः स्थितः ॥२६८॥

क्वचिन्मूर्धनि यस्येयं फणामणिगणोज्वले ? ॥
भूमिः सिद्धार्थवद्भाति सपर्वतवनार्णवा ॥२६९॥

इति निशम्य तु मर्दन उक्तवान्
वद गिरोः नरकाः क्व ? कथं जनः ? ॥
नरकमेति कथं दिवमश्नति
प्रथय कर्मगतीः पृथुचेतन ? ॥२७०॥

ऊचे गुरुर्भुवोधस्तादष्टाविंशतिसंख्यकाः ॥
जलादुपरि[2] वर्तन्ते नरकाः पापिदण्डदाः ॥२७१॥

वैवश्वतस्य नगरी दक्षिणस्यां दिशि स्थिता ॥
अग्निष्वात्तादयस्तत्र पितरो नरका अपि ॥२७२॥

तामिस्रश्चान्धतामिस्रो महारौरवसंज्ञकः ॥
कुम्भीपाको रौरवश्च कालसूत्रमुदीरितम् ॥२७३॥

असिपत्रवनं प्रोक्तं तच्छंकरमुखं पुनः ॥
अन्धकूपश्च संदंशः कृमिभोजन उच्यते ॥२७४॥

तप्तसूर्मिः प्रकथितो वज्रकंटकशाल्मली ॥
क्षारकर्दमनामा च सरक्षोगणभोजनः ॥२७५॥

वैतरणी पूतदोला लाभश्च प्राणरोधाख्यः ॥
विशसनमवीचिरुक्तो यः पानंत्यारमे पादः ॥२७६॥

---

1. श्लोक सं० २७१ तः नरकवर्णनं नानकेन कृतमस्ति ।
2. भुवोधस्ताज्जलादुपरि नरकाः सन्ति ॥
तत्र तामिस्रादयः पञ्च नरकाः कालसूत्रमिति कथ्यते ।

शूलप्रोतो दन्दशूकस्तथा वटतिरोधनः ॥
पर्यावर्तनसंज्ञश्च सूचीमुखमिति स्मृतः ॥२७७॥

वित्तापत्यकलत्राणि परस्य हरते तु यः ॥
तामिस्रे ताडितो याम्यैः स मोहमधिगच्छति ॥२७८॥

वञ्चयित्वा तु पुरुषं तस्य दारधनादिकम् ॥
यो भुङ्क्ते सोऽन्धतामिस्रे वृश्चयते नष्टदृङ्मतिः ॥२७९॥

बिभर्ति भूतद्रोहेण कुटुम्बं केवलं तु यः ॥
रौरवे रुरुभिः क्रूरैर्हिंस्यते म्रियते न सः ॥२८०॥

स्वदेहपोषको यस्तु केवलं क्रूरकर्मणा ॥
स महारौरवे हिंस्रैः क्रव्याद्यैः परिभूयते ॥२८१॥

यः पशून्पक्षिणो हन्ति करुणापरिवर्जितः ॥
कुम्भीपाके तप्ते तैले यमदूतैः स पच्यते ॥२८१॥

अग्न्यर्कतप्तेऽयुतयोजने च
ताम्रे समन्ताज्ज्वलदग्निताम्रे ॥
स कालसूत्रे परिदह्यते यो
देवं द्विजं द्वेष्टि निजं च तातम् ॥२८३॥

अनापदित्यनेद्वेदमार्गं पाखण्डमेति यः ॥
असिपत्रैर्द्विधारैः स छिद्यते कशयाहतः ॥२८४॥

राजा वा राजपुरुषो दण्ड्ये दण्डं दधाति यः ॥
स शूकरमुखे गाढमिक्षुवत्परिपीड्यते ॥२८५॥

यूकामत्कुणमक्षिकं च मशका ये रक्तभोज्या कृता
विश्वेशेन विवेकशून्यमनसो जानन्ति नान्यव्यथाम् ॥

1. २८५ तः ३०५ पर्यन्तं नरकयातनाविवेचनम् ।

तान् यो हन्ति विवेकवान् हि मनुजः क्षिप्तान्धकूपे स तै-
र्दष्टो नष्टमतिर्भ्रमत्यविरतं ध्वान्ते नितान्ताकुलः ॥२८६॥

न जुहोति यो न ददाति पञ्चमखान्करोति न मन्दधी-
रुदरम्भरिर्वलिपुष्टवत्स्वयमत्ति नित्यमुपार्जितम् ॥
कृमिभक्ष्यमाणकलेवरो व्यथितः क्षुधा परितो भ्रमन्
कृमिभोजने कृमिभोजनो बहुयोजने स विषीदति ॥२८७॥

हिरण्यरत्नं विप्रस्य यश्चोरयति मूढधीः ॥
सन्देशे सप्तसंदंशैः पिशितं तस्य कृष्यते ॥२८८॥

अगम्यामगम्यं स्त्रियं वा पुमांसं
नरः कामिनीकामतः संसृजन्तौ ॥
समालिङ्गितौ लोहसूर्म्याग्निमध्या
महावेदनां सप्तसूर्मौ लभन्ते ॥२८९॥

यः सर्वगामी पश्वादिगन्ता कामी नराधमः ॥
कर्षन्ति तं समारोप्य वज्रकण्टकशाल्मलीम् ॥२९०॥

रूपशोणितविण्मूत्रमांसकेशवसा भृतिम् ॥
भिन्दन्ति धर्मसैन्ये वैतरिण्यां पतन्ति ते ॥२९१॥

वृषलीपतयो विनष्टशौचा
गतलज्जाः पशुवृत्तिमाचरन्तः ॥
मलशोणितमूत्रपूयपूर्णे
तदनन्ते नरकार्णवे पतन्ति ॥२९२॥

ये विश्वकद्रुभिरुपद्रुतवत्यजीवा
हिंसा विहाररसिका हरिणान् हरन्ति ॥
ते प्राणरोधनिरये यमदूतवाणै-
र्विद्धाः श्वसन्ति निपतन्ति धरां सुराद्याः ॥२९३॥

दाम्भिका दम्भयज्ञेषु ये निघ्नन्ति वृथा पशून् ॥
निघ्नन्ति तान्विशसने नरके यमकिङ्कराः ॥२९४॥

ग्रामे येऽग्निमुचो विलण्ठनकृतो लुण्ठन्ति सार्थांश्च ये
खादन्त्युन्नतवज्रसारदशना उत्कृत्य कृत्तिं बलात् ॥
साक्ष्यो योऽनृतमाह मोहनकरो नॄणां क्रये विक्रये
कर्ता मानतुलादिकूटमनृजुः सोऽधःशिराः पात्यते ॥२९५॥

शैलाग्रान् शतयोजनाज्जलनिभे वीचौ शिलासङ्कटे
निर्भिन्नस्तिलशो न मृत्युमयते भूपस्ततः पात्यते ॥२९५[1]A॥
द्विजो द्विजस्य पत्नी वा सुरां पिबति मोहतः
अपः पाने द्रुतं लोहं पातयन्ति तु तौ बलाः ॥२९६॥

अपकृष्टोऽवमन्येत स्वोत्कृष्टांस्तु मदेन यः ॥
स क्षारकर्दमे भुङ्क्तेऽवाक्शिरास्तीव्रवेदनाः ॥॥२९७॥

पशूकृता ये पुरुषा यजद्भिः
कामैरनेकैरिह भूतसंघान् ॥
विदार्य रक्षोगणभोजने तान्
[1]परश्वधैस्ते रुधिरं पिबन्ति ॥२९८॥

ये विश्वास्य प्रोतैः शूले
जन्तुव्रातैः[2] संक्रीडन्ते ॥
शूलप्रोते शूलप्रोता-
[3]स्ते कङ्काद्यैर्निष्कुष्यन्ते ॥२९९॥

1, प्रथमद्वितीयचरणयोरभावः पाण्डुलिपावत्र ।

१. श्वद्यैः—क०

२. जन्तुव्रातैः—क०

३. स्तेकुङ्का—क०

उद्वेजयन्ति भूतानि ये क्रूरमनसस्तु तान् ॥
[1]दन्दशूके दन्दशूका दंशन्ति बहुभिर्मुखैः[2] ॥३००॥

अन्धावटे कुसूले
जनान्निरुन्धन्ति ये दर्पात् ॥
अवटनिरोधननरके
तेऽगरधूमैर्निरुध्यन्ते ॥३०१॥

अतिथीन् गृहागतान्यो
वक्रदृशा पश्यति क्रूरः ॥
पर्यावर्तननरके
तदक्षि गृध्रादिभिर्ह्रियते ॥३०२॥

यः साचि वीक्षत इह स्वगुरूनरिभ्यो
दृप्तः कदर्य उपधारितचोरशङ्कः ॥
[3]तन्तुन्नवाय इव दत्तगणोपमस्य
सूचीमुखे वपुषि सीव्यति सूत्रजालैः ॥३०३॥

प्राधान्येन तवोदितास्तु नरका वैचित्र्यतः कर्मणां
नृणां मर्दन ! मर्दनाय विहितास्ते सन्ति नानाविधाः ॥
शेषस्वर्गसुखस्य दुर्गतिमहादुःखस्य यद् भुञ्जते
भूमौ तत्स्फुटमेव पश्यसि सदा सुस्थांश्च दुःस्थान् जनान् ॥३०४॥

पापानामपि पुण्यानां जाले निपतितो जनः ॥
मुमुक्षुस्त्वरते यस्तु स प्रत्युत निबध्यते ॥३०५॥

---

१. दंदशूके—क०
२. मुखः—ख०
३. तंतुत्र—क०

तस्मादसत्कर्म विहाय दूरे
सत्कर्म कुर्वन् हरितोषणाय ॥
निवृत्तिमार्गस्वरसः शरण्यं
श्रीशं प्रपन्नः समुपैति मुक्तिम् ॥३०६॥

विपाकः कर्मणां प्रोक्तो मुनिभिस्तत्त्वदर्शिभिः ॥
वदामि तुभ्यं संक्षेपात्तं च मर्दन ! मच्छृणु ॥३०७॥

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ॥
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति[1] ॥३०८॥

ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदन्तकः ॥
हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः ॥३०९॥

महापातकजान्घोरान्नरकान्प्राप्य दारुणान् ॥
कर्मक्षयात् प्रजायन्ते महापातकिनस्त्विह ॥३१०॥

मृगश्वशूकरोष्ट्राणां ब्रह्महा योनिमृच्छति ॥
खरपुष्कसवेनानां सुरापो नात्र संशयः ॥३११॥

कृमिकीटपतङ्गत्वं स्वर्णस्तेयी समाप्नुयात् ॥
तृणगुल्मलतात्वं च क्रमशो गुरुतल्पगः ॥३१२॥

यो येन [1]संवसत्येषु स तल्लिङ्गोऽभिजायते ॥
अन्नहर्ताऽऽमयावी स्यान्मूको वागपहारकः ॥३१३॥

धान्यमिश्रोऽतिरिक्ताङ्गः पिशुनः पूतिनाशकः ॥
तैलहृत्तैलपायी स्यात्पूतिवक्त्रस्तु सूचकः ॥३१४॥

परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य[2] च ॥
अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः ॥३१५॥

---

1. ३०९ श्लोकात् कर्मणां विपाकविचारः ।

१. सवसत्येष—क०
२. स्वय—क०

हीनजातौ प्रजायेत पररत्नापहारकः ॥
यत्र शाकं शिखी हृत्वा गन्धान्छुछुन्दरिः शुभान् ॥३१६॥

मूषको धान्यहारी स्याद्यानमुष्ट्रः फलं कपिः ॥
जलं प्लवः पयः काको गृहकारीह्युपस्करम् ॥३१७॥

मधुदंशः पलं गृध्रो गाङ्गोधाग्निं वकस्तथा ॥
स्वित्री वस्त्रं श्वारसं तु चीरी लवणहारकः ॥३१८॥

प्रदर्शनार्थमेतत्तु मयोक्तं स्तेयकर्मणि ॥
द्रव्यप्रकारा हि यथा तथैव प्राणिजातयः ॥३१९॥

केन कर्मविपाकेन स्वर्गं यान्ति नरा गुरो ? ॥
मर्दनेनेति संपृष्टो निजगादाथ नानकः[1] ॥३२०॥

निष्प्रत्यूहं क्रतुशतं यः कश्चित्कुरुतेऽवनौ ॥
जितेन्द्रियोऽमरावत्यां स प्राप्नोति पुलोमजाम् ॥३२१॥

तुलापुरुषदानादिमहादानानि षोडश ॥
ये यच्छन्त्यमलात्मानस्ते लभन्तेऽमरावतीम् ॥३२२॥

अक्लीबवादिनो धीराः संग्रामेष्वपराङ्मुखाः ॥
विक्रान्ता वीरशयने तेऽत्र तिष्ठन्ति भूभुजः ॥३२३॥

कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा ॥
परपीडां न कुर्वन्ति न ते यान्ति यमालयम् ॥३२४॥

शरणागतवत्सला नरा
अवलाबालकवृद्धरोगिणाम् ॥
कलयन्ति दरिद्रतां च ये
हितमेते त्रिदशालयालयाः ॥३२५॥

I. ३२३ श्लोकात् तेषां कर्मणां विचारो येन यान्ति नराः स्वर्गम् ।

वापीकूपतडागादिकारका वृक्षरोपकाः ॥
गोग्रासदायिनः स्वर्गे वसन्ति बहुवत्सरात् ॥३२६॥

तुलसीं रोपयेद्यस्तु विष्णुपूजनतत्परः ॥
अयुतानि युगानां तु स्वर्गलोके स पूज्यते ॥३२७॥

शिवसेवनतत्परः सदा
शिवनामस्मरणे गतक्षणः ॥
रमते शिवसन्निधौ पुमान्
यमदूतास्तमुदीक्ष्य बिभ्यति ॥३२८॥

मठं यतीनां कुर्वन्ति ये च विश्राममन्दिरं ॥
धर्मशालां च विपुलां ते चिरं स्वर्गवासिनः ॥३२९॥

अतिथिर्विमुखो न याति यस्मा-
न्नियतं तस्य विरिञ्चिलोकवासः ॥
वितरान्नमपेक्षसे यदि स्वो
यम ऊचे किल केसरिध्वजाय ॥३३०॥

न परान्नरुचिः पुमान् बुभुक्षुः
सततं स्नानपरः प्रभातकाले ॥
त्रिपदाजपतत्परस्तपस्वी
त्रिदिवं याति न यातनां यमस्य ॥३३१॥

कदाचिदपि गङ्गायां कथंचित् स्नाति यः पुमान् ॥
स स्वर्गं नियतं याति न याम्यास्तस्य यातनाः ॥३३२॥

अप्रतिग्रहशीलो यः प्राणायामपरायणः ॥
सत्यवादी शुचिर्दान्तः स्वर्गस्तस्य करे स्थितः ॥३३३॥

गुरुशुश्रूषकः शिष्यो भार्या पतिपरायणा ॥
पुत्रः पित्रोर्भक्तियुक्तः सर्वे स्वर्गनिवासिनः ॥३३४॥

[1]द्वादशाक्षरमनुं[1] प्रजपन्तो
वैष्णवा विगतमोहमदा ये ॥
ते पुनन्ति भुवनं स्वमहिम्ना
माधवस्य सविधे च वसन्ति ॥३३५॥

एकादश्युपवासाः
शालग्रामस्य पूजनं विधिवत् ॥
नित्यं तदम्बुसेवा
रेवागङ्गादितीर्थैः किम् ? ॥३३६॥

यः पूजयेद्धरिं[2] चक्रे शालि[3]ग्रामशिलोद्भवे ॥
राजसूयसहस्रेण तेनेष्टं प्रतिवासरम् ॥३३७॥

शालग्रामशिला यत्र तत्तीर्थं योजनत्रयम् ॥
तत्र दानञ्च होमश्च सर्वं कोटिगुणं भवेत् ॥३३८॥

धर्मेण वासस्त्रिदशालये स्या-
दधर्मतो हा नरके निवासः ॥
दानाद्धनं तेन विना च दैन्यं
मोक्षो मुकुन्दस्मरणेन शश्वत् ॥३३९॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
भूगोलादिवर्णनं नाम चतुर्दशः प्रस्तावः ॥

—: ० :—

1. मनुशब्दः मन्त्रविशेषे देवविशेषे च प्रयुक्तोऽस्ति सर्वत्र शास्त्रे । "ॐ नमो भगवते वासुदेवाय" इत्यस्ति द्वादशाक्षरमन्त्रः ।

१. द्वादशाक्षरममुं–क०

२. हरिचक्रे–क०

३. शलिग्राम–क०

अथ पञ्चदशः प्रस्तावः

वाणीं गृणातु रसनां मम मानसं च
श्रीशारदा स्मरतु शारदचन्द्रशुभ्राम् ॥
सारस्वतं जयतु [1]मन्त्रमपश्चपाणि-
र्वाग्देवतां नमतु [2]संततमेव मौलिः ॥ १ ॥

पश्यन् [1]यतिः करतलामलकायमानं[3]
त्रैलोक्यवृत्तमिति योगजधर्मदृष्ट्या ॥
ऊचे विपाकमपि मानवकर्मणां च
कैलाशमिन्दुधवलद्युतिमाससाद ॥ २ ॥

उत्फुल्लकल्पतरुकाननमध्यवर्ति
विभ्राजमानमणिनिर्मितमुन्मयूखम् ॥
तस्मिन्महार्हशयनासनयानरम्यं
दृष्टं निशान्तमतिशान्तसुरैः परीतम् ॥ ३ ॥

[1]मन्दाकिनीसलिलसिक्तजटाटवीकः
[2]सूर्येन्दुवह्निनयनः शरदभ्रशुभ्रः ॥
भाले वहन् शशिकला करिकृत्तिधारी
वैयाघ्रचर्मवसनो भसितावदातः ॥ ४ ॥

---

1. प्रस्तावस्य प्रारम्भे धूर्जटेरतिललितं वर्णनं व्यधायि कविना ।
2. त्रिनयन इत्यर्थः । अथवा नयनमध्ये शिवस्य त्रपाणामेतेषां निवास इति भावः ।

१. मन्त्र—ख०
२. सन्तत–ख०
३. माण–क०

स्मेराननो गरलनीलमलो भुजङ्गैः
स्फूर्जत्फणामणिगणैः परिभूषिताङ्गः ॥
बिभ्रत्करैश्च परशुं हरिदम्बरं च
भक्ताभयं ललितवामतनुर्भवान्या ॥ ५ ॥

आसीन उज्ज्वलरुचौ वररत्नवेद्यां
पद्मासने सुरगणैर्गुणितावदातः ॥
नन्दीश्वरेण गणपेन च षण्मुखेन
भृंगादिभिः प्रथमभूतगणैरुपेतः ॥ ६ ॥

सख्या धनाधिपतिना कृतसुप्रलाप-
श्चिन्तामणिः सकलचिन्तकवाञ्छिताप्तौ ॥
आलोकितः पशुपतिर्यतिनायकेन[1]
तत्र प्रणाममपि तस्य दृशाभ्यनन्दत् ॥ ७ ॥

रूप्याचलं शशिधरस्य च तां समृद्धिं
भक्त्या प्रणाममपि नानकयोगिभर्तुः ॥
आलोक्य मर्दन उवाच[2] कएष शैलो[3]
देवश्च कोऽयमतुलाद्भुतदिव्यसम्पत् ॥ ८ ॥

तं नानकः प्रणिजगाद महोन्नतोऽयं
कैलासभूधवरः सुकृतैकगम्यः ॥
इन्द्रादिमौलिमणिरञ्जितपादपीठ-
स्त्रैलोक्यभूषणमणिर्गिरिजाधवोऽयम्[4] ॥ ९ ॥

---

१. पतिनापकेन—क०
२. उवाद—क०
३. शैला—क०
४. कोऽयम्—क०

ब्रह्मैव शुद्धमवधेहि ननु त्वमेनं
ध्यानाय भक्तनिवहस्य वपुर्वहन्तम् ॥
अस्यैव भालनयनादनलो युगान्ते-
निर्गत्य[1] विश्वमनुतिष्ठति भस्मशेषम् ॥ १० ॥

एवं वदन्नवततार गुरुः पृथिव्यै[2]
मार्गं महान्तमतिवृत्य गिरीनुदारान् ॥
ऊचे बुभुक्षित इवासि नु[3] मर्दन? त्वं
सोऽब्रूत को मम कृतेऽकृत पाकमत्र ? ॥ ११ ॥

योऽयं गिरिस्तव पुरो बहुतुङ्गशृङ्ग-
स्तस्मिन्नपेहि मधुराणि फलान्यशान ।
अस्मत्कृते च कतिचिद्द्रुतमानयेति
तेनोदितो गिरिमगात्पुनरागमत्सः ॥ १२ ॥

फलान्यमृतकल्पानि नान्यावाप्यमभुंज्वहि ॥
मर्दनोऽब्रूत मोघानि हा! फलान्यजने वने ॥ १३ ॥
नानकेन कथितं कृतबुद्धे[4] ?
न प्रतीहि विपुलानि फलानि ॥
तान्यदन्ति मुनयो विपिनेऽस्मिन्
ये निलीय कलयन्ति तपांसि ॥ १४ ॥

मर्दनोवददिहैव वसेति
नानकस्तमगदत्फललोभात् ॥

---

१. निर्गत्य—ख०
२. पृथिव्यां—ख०
३. तु—क०
४. बुद्धे—क०

वस्तुमिच्छसि स[1] तं पुनरूचे
किं चिकीर्षुरसि[2] तत्र यियासुः ? ॥ १५ ॥

तत्र यत्खलु कर्तव्यं ? न कर्तुं शक्यतेऽत्र तत् ॥
इति ब्रुवन्योगिवर्यः शैलसेन्यमुपागमत् ॥ १६ ॥

कोऽपि साधुरधितिष्ठति ? शैल-
मेतमित्यभिदधौ धृतवीणः ॥
नानकोऽप्यगददस्ति च साधु-
र्मर्दन ? [3]स्वयमुपैति च कृत्यः[4] ॥ १७ ॥

किं नामासीति ? पप्रच्छ नानकं मुनिरुन्मना ॥
नानकोऽस्मि निराकार इति योगिवरो जगौ ॥ १८ ॥

तेनोक्तं ध्रुवमसि नानकस्तपस्वी
यो गीतो मम गुरुणा कथाप्रसङ्गात् ॥
किं नामा त्वमसि ? गुरोश्च नाम किन्ते ?
मां ज्ञाता स कथमिदं ? यतिस्तमूचे ॥ १९ ॥

अहंकल्याणनामास्मि [1]शीलसेनो गुरुर्मम ॥
धर्म भ्रातरमाह त्वां त्रेतायामिति सोऽभ्यधात् ॥ २० ॥

---

१. समं—क०

२. रभि—

३. त्वं यमु—क०

४. कुव्याः—क०

1. सैन्यशैले शीलसेननाम्नो गुरोः शिष्यः कल्याणनामा यतिः प्रतिवसति स्म । यस्य (शीलसेनस्य) नानकः त्रेतायां धर्म भ्राताऽसीत् । तस्मिन् काले नानकस्य नाम गोवर्धन इत्यासीत् । शीलसेनः सदैव कर्ता कर्तेति मन्त्रं जपन्नासीत् ॥

कल्याणो गुरुमित्यूचे धर्मभ्राता तवागतः ॥
तेनोक्तं पृच्छ किं नामा ? कस्मिन्नासीद्युगे स च ? ॥ २२ ॥

नानकं परिपृच्छयेदं कल्याणः पुनरब्रवीत् ॥
त्रेतायां सहवासी ते स हि गोवर्धनाभिधः ॥ २३ ॥

तस्यादेशेन नीतोऽसौ कल्याणेन तदन्तिकम् ॥
सत्कृत्य स्थापितस्तत्र[१] कर्ता कर्तेति कीर्तयन् ॥ २४ ॥

[1]यद्यस्ति ते गुरुरिहाहममुं दिदृक्षे
श्रुत्वा यतेः स इति वाचमुवाच तुष्टः ॥
आपृच्छय तं ननु नयामि भवन्तमत्र
तिष्ठेति पार्श्वमगमच्च गुरोरगर्वः ॥ २४A ॥

को गुरुः ? कश्च मन्त्रस्ते ? कस्माद्विद्यामुपाददाः ? ॥
कां कलां कलयन्नत्र ? केनानीतोऽसि ? कीर्तय ॥ २५ ॥

इति शीलसेनवचसामवसाने
यतिनाऽभ्यधायि गुरुरीश्वर एव ॥
वरुणोऽस्य नाम वरमन्त्रमवोच-
ज्जनकाद् गुरोः[२]क्वचिदलभ्यत विद्या ॥ २६ ॥

कलये कलां सकलसत्यचरित्रा-
मिह मां निनाय जगतां पतिरेव ॥
अथ शीलसेनमुनिरेतदवादी-
दिति नानकस्य वचनानि निशम्य ॥ २७ ॥

---

1. श्लोकोऽयं "क" इत्यत्र नास्ति ।
१. वृस्यां–क०
२. ग्रुरो–क०
३. ग्रुरोकृचि–क०

जनुरन्तरस्य गुरुमीक्षणशैले
जनकं वसन्तमवलोकय सौम्य ! ॥
जनकः[1] कुतोभवदिहेति स योगी
कृतविस्मयः ! शिखरिणं[१] तमगच्छत् ॥ २८ ॥

प्रकटीबभूव जनकः स शुकस्तं
प्रणमन्तमादरपरः परिरेभे ॥
नहि योगिनां किमपि दुष्करमस्ति !
न [२]चंक्रणीयचरिता इतरैस्तैः ॥ २९ ॥

तव दर्शनाय शुक ! नानक आगा-
दमुमाद्रियस्व महदादरणीयम् ॥
जनको जगाद तदनु स्मितवक्त्रः
परिषष्वजे [1]शुकममुं प्रणमन्तम् ॥ ३० ॥

वद नानक जप्यते मनुः[2] को ?
जनकेनेति यतिर्जगाद पृष्टः ॥
तव सङ्गतितः पुरा प्रतीतं
[3]भगवन्नाम जपामि नान्यमन्त्रम् ॥ ३१ ॥

तवोपदेशात् त्रेतायामपेता विश्वविभ्रमाः ॥
कृपा नृपाल ! भवतस्तापान्पापानि चाऽधुनोत् ॥ ३२ ॥

---

1. नानकस्य जनुरन्तरस्य गुरुर्जनक ईक्षण शैले वसन्नासीत् । शुकश्चासीज्जनकस्य शिष्यः ॥
2. मनु = मन्त्रः ।
3. भगवच्छब्दोऽत्र विष्णुवाचक एव ।
१. शिखरिणां–क० ।
२. चक्रंणीय–क०

ततः प्रसन्नो जनको जगाद
सर्वं स्मरस्यङ्ग ! पुरा चरित्रम् ॥
यशो मदीयं यदिदं ब्रवीषि
तवैव तद्भाव्यकृतघ्नतायाः ॥ ३३ ॥

वैकुण्ठनाथेन यदादृतस्त्व-[1]
मस्मान्स्मरस्येव चिराय बंधून् ॥
अल्पोपकारस्मरणं प्रभुत्वे
शीलं सतामेतदमत्सराणाम् ॥ ३४ ॥

आवयोर्नैव[2] विच्छेदस्त्रेतायां द्वापरे कलौ ॥
परीक्षितुमिदं सौम्य ! स शुकः [3]प्राहुरस्म्यहम् ॥ ३५ ॥

अंशस्य ते भगवतो न गुरोरपेक्षा[1]
शिक्षापरं त्वियमभूज्जगतीजनानाम् ॥
ये स्वप्रकाशनिगमागमसर्वतत्त्वा-
स्तेऽपि श्रयन्ति गुरुमेव पुरातनोऽध्वा ॥ ३६ ॥

अङ्गिराः पार्वतीशस्य रामस्यारुन्धतीपतिः ॥
[2]श्रियःपतिश्च कृत्स्नस्य गुरुराचारतः कृतः ॥ ३७ ॥

गुरुभक्त्या तव नानकास्मि तुष्ट-
स्तव पन्था गुरुसेवनप्रधानः ॥
प्रचरिष्यति सर्वदोषहन्ता
कलिकाले सुगमः समस्तलोकैः ॥ ३८ ॥

---

1. श्लोके–'रपेक्षा इत्यारभ्य–जनानाम्' इति यावत् 'क' इत्यत्र नास्ति ।
2. कलौ विष्णुः सर्वेषां गुरुरिति भावः ।

१. यदाहृत–क०
२. आदयोवयो–क०
३, प्राहुन् स्यस्म्य–क०

नास्तिकान् यवनान् जित्वा कृत्वा निष्कंटकां महीम् ॥
तव शिष्यैरियं कीर्णार्णवनेमिर्भविष्यति ॥ ३९ ॥

प्रीत्या तव ममाभेदस्तत्त्वज्ञानदशापि च ॥
यन्मूलो जनवादोऽयं जनको नानकोऽभवत् ॥ ४० ॥

इह वसेति वदन्तमुदारधी-
रनुमतिं जनकं समयाचत ॥
अनुमतो जनकेन सुतुष्यता
गिरिशिरः सरसि क्वचिदाययौ ॥ ४१ ॥

पप्रच्छ मर्दनस्तत्र साधुरत्रास्ति कश्चन ? ॥
अवादि नानकेनेदमस्ति चायाति च स्वयम् ॥ ४२ ॥

स्नान्तं तत्र जगाद नानकऋषिं किं स्नास्यमुष्मिन्सर- ?
स्यंतःशुद्धिकरी परं भगवतो भक्तिर्न नीरं यतः ॥
विश्लेषे मनसो मुकुन्दचरणादत्याकुलत्वं नु सा
मीनस्येव जला तरंगतरला[1] भक्तिः प्रसक्तिः किल ॥ ४३ ॥

विश्लिष्य मीनः सलिलात्कियन्तं
कालं किल प्राणिति नानकस्तु ॥
मुकुन्दपादाम्बुजतो वियुक्त-
चेता क्षणं प्राणितु नाम किं नु ? ॥ ४४ ॥

इत्येवमुक्तो यतिना मुनिः स
उवाच किं त्वं जनकावतारः ? ॥
योगीश्वरो नानकनामधेय-
स्तपः प्रथिम्ना प्रथितः पृथिव्याम् ॥ ४५ ॥

---

१. दभलिः—क०

युग्मम्

अहमस्मि यं ब्रवीषि त्वं
वद कोऽसीति नानकोऽपृच्छत् ॥
सुखचपतनामधेयं
मामवगच्छेति स जगाद ॥ ४६ ॥

अभूत्पुरा यो जनकस्य भृत्य
इत्यब्रवीन्नानकयोगिवर्यः ॥
सत्यं स एवेत्यभिधाय भक्त्या
पादौ ववन्दे स यतीश्वरस्य ॥ ४७ ॥

प्रेम्णोपगूढः स च नानकेन
कुटीं मदीयां[1] परिभावयेति[2] ॥
ऊचे तमामन्त्र्य जगाम योगी
स [3]सिन्धुरोऽधो नगराणि पश्यन् ॥ ४८ ॥

ययौ स मत्स्यनगरं लहरीनगरं ततः ॥
सुरत्याख्यं च नगरं शोभितं परया श्रिया ॥ ४९ ॥

मर्दनस्तमपृच्छच्च[4] कस्येदानीं धरापतेः ॥
मण्डलं यासि योगीन्द्र ? तमुवाच यतीश्वरः ॥ ५० ॥

पारे समुद्रं नगरी निर्मिता विश्वकर्मणा ॥
लङ्का विभीषणो यस्यामास्ते तां यामि सम्प्रति ॥ ५१ ॥

१. मदीवां–क० ।
२. परियावयेति–क० ।
३. सं सिन्धु–ख० ।
४. पप्रच्छ–क० ।

उड्डीनो हनुमानिव
नानकयोगी ततः पारे ॥
शतयोजनस्य सिन्धो-
रवातरत्तेन सह चावाम् ॥ ५२ ॥

सिन्धुरोधसि विलोक्य ततोऽस्मान्
राक्षसाः समगमन्नतिरौद्राः ॥
मर्दनो भयमवाप चकम्पे
[1]तन्सयानि गदितं यतिनेत्रे ॥ ५३ ॥

उवाच नानकः पश्य कर्तव्यं परमेशितुः ॥
अन्धीभूतास्ततस्तेऽगुर्विभीषणमिदं जगुः ॥ ५४ ॥

आयातः स तु सिद्धिमस्य महतीं श्रुत्वा वृतो राक्षसै-
श्चश्चामरवीजितः शशिनिभं छत्रं किरीटं वहन् ॥
यो नाम्नैव विभीषणो भगवतो भक्त्यातिशान्तान्तरः
शीलं मूर्तिधरं नु नामकयतिं पप्रच्छ कोऽसीति च ॥ ५५ ॥

भक्तोस्मि रामचन्द्रस्य यतिरित्यवदत्स तु ॥
पपात पदयोर्मूर्द्धा[1] स्फुरन्मणिगणश्रिया ॥ ५६ ॥

आकर्ण्येति कथां रम्यां नानकस्य तपस्विनः ॥
बालसिन्धो ? सत्यमेतदिति प्रीत्याङ्गदोऽगदत् ॥ ५७ ॥

सत्यमेतदिति प्रोक्ते[2] तेन प्रेमपरिप्लुतः ॥
पश्चाहान्यंगदस्तस्थौ योगनिद्रामुपागतः ॥ ५८ ॥

---

1. इत्येवास्ति पाठोऽभयत्र । अथापि "तं स थानि" इति भवितव्यम् ।

१. र्घा–क० ।
२. प्रोक्तो–क० ।

व्युत्थितोऽङ्गद इदं निजगाद
ब्रूहि बाल ? किमतः परमासीत् ? ॥
बालसिन्धुरवदत्समनैषीत्
तं निशाचरपतिः स्वनिशान्तम् ॥ ५९ ॥

तात ? रूपरचनापरिपाटी
जातरूपमधिगम्य गृहं[1] तत् ॥
बालसिन्धुरवदत्समनैषीत्
तं निशाचरपतिः स्वनिशान्तम् ॥ ६० ॥

राजोपचारविभवैर्विभीषणकरार्पितैः ॥
रत्नसिंहासनारूढो नानकः पूजितोऽभवत् ॥ ६१ ॥

सौशील्यादेनयोः प्रीतिरेधामास परस्परम् ॥
बलादनुज्ञामादाय तस्य योगी जगाम सः ॥ ६२ ॥

मर्दनेन कथितं कथयस्व
रामभक्त इति तेऽभिहितेन ॥
पादयोः स निपपात महात्मा
कः कदा ? कथमभूदथ रामः[2] ? ॥ ६३ ॥

योगीश्वरेण कथितं शृणु मर्दनेदं
राजाभवद्दशरथो रघुवंशदीपः ॥
साकेतनाम्नि नगरे सरयूतटस्थे
तिष्ठन् शशास सकलां स महीमहीपान् ॥ ६४ ॥

---

1. तात इति सम्बोधने । रूपरचनापरिपाटीजातरूपं तत् गृहम् अधिगम्य इत्यन्वयः ।
2. श्लोक ६३ तः १६८ श्लोकं यावत् प्रस्तावान्तं यावन्नानकेन मर्दनं प्रति कथितं रामचरितं वर्णितमस्ति ।

१. नः पर–क० ।

तिस्रस्तस्याभवन् पत्न्यो रूपशीलकुलोज्ज्वलाः ॥
कौसल्या[1] च सुमित्रा च कैकेयी चेति विश्रुताः ॥ ६५ ॥

अविन्दतस्तामसुतं नृपस्य
विषीदतो भूरि वयो व्यतीतम् ॥
तमृष्यशृङ्गप्रमुखा मुनीन्द्रा
अचीकरन्निष्टिमभीष्टसिद्ध्यै ॥ ६६ ॥

प्रादुर्बभूव पुरुषो दहनादुदग्रो
मूर्ध्ना वहन्परमपायसपूर्णपात्रम् ॥
दिव्यान्नमेतदवनीश निजप्रियाभ्यो
विश्राणयेत्यभिदधौ स तिरोदधौ च ॥ ६७ ॥

भुक्त्वाऽथ तद्गर्भमधारयंस्ता
महोत्सवं भर्तृदशां दिशन्तः ॥
ग्रहैः शुभैः सूचितभागधेया-
नजीजनन्मारुचः कुमारान् ॥ ६८ ॥

क्षीरोदतीरमुपगम्य सुरैः समस्तै-
रभ्यर्थितो दशमुखस्य वधाय विष्णुः ॥
स्वीकृत्य शल्यहरणं शरणं त्रिलोक्या
वंशे रघोरवततार ततश्चतुर्धा ॥ ६९ ॥

कौसल्या सुषुवे रामं सुमित्रा लक्ष्मणं सुतम् ॥
शत्रुघ्नमपि कैकेयी भरतं शुभलक्ष्मणम् ॥ ७० ॥

दशरथः सुतजन्मनि हर्षितो
वसुचयं व्यसृजन्नवनैचिकीः ॥

---

१. शल्या–क० ।

पणवदुन्दुभिकर्करकाहला
ध्वनिरभून्ननृतुर्गणिकागणाः ॥ ७१ ॥

तेजस्विनस्तस्य सुता सुशीलाः
सर्वेऽपि सर्वेतरबुद्धिभाजः ॥
तथापि रामः स्वगुणैरुदारैः
प्रियः प्रजानामभवद्विशेषात् ॥ ७२ ॥

सुबाहुमारीचमुखैर्निशाचरै-
र्मखक्रियाविप्रकरैरुपद्रुतः ॥
अगाधबोधः खलु गाधिनन्दनो
धराधवं राममयाचतावितुम् ॥ ७३ ॥

नेच्छन्नपि स्वगुरुणा कथितानुभावं
प्राणप्रियं दशरथो विससर्ज रामम् ॥
सौमित्रिणा सह गताय बहुप्रभावां १
तस्मै बलामतिबलां स मुनिर्दिदेश ॥ ७४ ॥

तं ताटकाभिपतति स्म मनुष्यभक्षा
तां कौशिकस्य वचनात्स जघान धन्वी ॥
अस्त्राणि गाधितनयः शतसंख्यकानि
संहारमंत्रसहितानि दिदेश तस्मै ॥ ७५ ॥

वेद्यां मुनेरुधिरवर्षमहत्सुबाहुं
मारीचमक्षिपदिषोस्तरसा समुद्रे ॥
रामो नमन्मुनिगणं च तुतोष तस्य
वीर्यं विलोक्य सकलोऽपि तपस्विसंघः ॥ ७६ ॥

जनकेन निमन्त्रितो नय-
न्मिथिलां दाशरथिं स कौशिकः ॥

पथि गौतमकामिनीशिला
बहु मेने रघुवीरमुद्धृता ॥ ७७ ॥

प्राप्ता भूमिभृता क्षितिं विलिखिता सीता सुता विश्रुता
तस्याः शुल्कमपीश्वरस्य धनुषः सज्जीक्रिया नेतरत् ॥
विश्वामित्रमिदं जगाद कुतुकाद्रामो निशम्याद्भुतं
पश्येयं भगवन् भवस्य नृपतौ न्यासीकृतं तद्धनुः ॥ ७८ ॥

अत्रान्तरे कौशिकमागतं स
श्रुत्वा विदेहः स्वयमाजगाम ॥
ननाम चानामयमन्वयुङ्क्त
विसिस्मिये वीक्ष्य च तौ कुमारौ ॥ ७९ ॥

पप्रच्छ सोदश्चितचित्तवृत्ति-
रिमौ सुतौ कस्य शुभौ कुमारौ ॥
मुहुर्मनो रञ्जयती जनानां
रसौ सदेहाविव वीररौद्रौ ॥ ८० ॥

विश्वामित्रोऽन्यगादीदवति दशरथः सागरान्तां क्षितिं यो
यस्यायोध्याभिधाना निवसति नगरी चारु तीरे सरय्वाः ॥
तस्येमौ वंशदीपौ मखविहतिकरान् राक्षसान्नाशयित्वा
श्रुत्वा शैवं धनुस्ते नृप समुपगतौ द्रष्टुकामौ मयेह ॥ ८१ ॥

श्रुत्वा तस्य वचो जगाद जनकः कन्या ममाऽयोनिजा
तस्याः शुल्कमकारि तस्य धनुषो ज्यारोपमात्रं मया ॥
आकर्ण्येति समागतैर्नृपतिभिर्नारोपितं तद्धनुः
सज्यं चेद्विदधीत तद्रघुवरः सीतावरः स्यात्तदा ॥ ८२ ॥

तं कौशिकोऽब्रूत समानयन्तु
जनाः धनुः पश्यतु रामभद्रः ॥

ऊर्जस्वलैः पञ्चसहस्रभृत्यै-
रानाययामास नृपस्ततस्तत् ॥ ८३ ॥

अजगरमिव तद्धनुर्द्रढीयः
शिवकरसाक्षिकगौरवं पुराणम् ॥
स्मितवदन उपाददेऽथ रामः
सपदि बभञ्ज स [1]रञ्जयन् जनौघम् ॥ ८४ ॥

उत्थापनमारोपणमाकर्षणमस्य नो विविदुः ॥
वज्रविदीर्णगिरेरिव किन्तु निपेतुर्ध्वनेर्मनुजाः ॥ ८५ ॥

रामस्य बलमालोक्य विस्मितो मिथिलापतिः ॥
आकारयद्दशरथं विश्वामित्राभ्यनुज्ञया ॥ ८६ ॥

आहूतो मिथिलेशदूतनिवहैः श्रुत्वा सुतस्योदयं
राजा पंक्तिरथो ययावतिरथो [2]विप्रैर्वसिष्ठादिभिः ॥
माद्यन्नंदसहस्रसिंधुरघटादानच्छटादुर्दिनैः
कुर्वन् गाढमकाण्ड एव मिथिला[3] रथ्याशिलाः पिच्छलाः ॥ ८७ ॥

समागमे प्रीतिरभूदुदारा
राज्ञोः सुविज्ञातमहामहिम्नोः ॥
जग्राह पाणिं जनकात्मजाया
रामोऽभिरामो विधिवत् सुलग्ने ॥ ८८ ॥

---

१. रचं नयन्–क० + ख० ।
२. वशिष्ठाभिः–क० ।
३. मिथिथिला–क० ।

लक्ष्मणायोर्मिला दत्ता भरताय च माण्डवी ॥
शत्रुघ्नाय शुभे लग्ने श्रुतकीर्तिरिति श्रुता ॥ ८९ ॥

कटाक्षवडिशैर्बद्धा मिथिलाया मृगीदृशाम् ॥
पस्पंदिरे मनोमीना न मनाग्वरयात्रिणाम् ॥ ९० ॥

आतिथ्येन सुतोषितो दशरथो रत्नैर्हयैर्दन्तिभिः
प्रेम्णा त्यक्तुमनिच्छतोपि नृपतेर्लब्धाभ्यनुज्ञोऽगमत् ॥
मार्गे भीतिमतीव तस्य जनयन् रामो मुनिर्भार्गवः
कोदण्डं परशुं वहन् स्वमहसा क्षत्रं दहन्नागतः ॥ ९१ ॥

रामो राममभाषत त्वमधुना जातो बली क्षत्रियः
कोदण्डस्य गुरोर्मम प्रमथनादेतद्धनुर्वैष्णवम् ॥
मौर्व्या योजनदृष्टवीर्यविभवे युद्धक्षमे मे त्वयि
प्रोद्दामः परशुः पतिष्यति ततः क्षत्रस्य कालानलः ॥ ९२ ॥

आदाय तद्धनुरथस्मितवक्त्रपद्मो
रामश्चकार सगुणं निजगाद चेदम् ॥
नायं शरो मम वृथा कथयस्व लोकान्-
हन्यां तवोत[1]गतिमत्र तपस्विवर्य ? ॥ ९३ ॥

भोगीव भग्नगरलो भृगुजो बभाषे
दत्ता मया क्षितिरियं किल कस्य पाप ?
नास्यां वसामि दिनमेकममुष्य वाचा
लोकांस्ततो जहि गतिं न जयस्तवास्तु ॥ ९४ ॥

तपोर्जितांस्तस्य निहत्य लोकान्
जगाम रामश्च जगाद रामः ॥

---

१. तवोत्तमगति–क० ।

आत्मानमापद्दिगमान्नरेंद्रो
मेने पुनर्जातमिवात्मजं च ॥ ९५ ॥

रूपशीलकुलोपेताः प्रतिगृह्य स्नुषास्ततः ॥
कौसल्याद्या मुमुदिरे महिष्यः कोशलेशितुः ॥ ९६ ॥

लावण्यशीलसुभगा रघुनन्दनस्य
स्वान्ते नितान्तमवसन्मिथिलेशकन्या ॥
रामोऽपि कामकमनीयतनुः क्वचिन्न
विश्लेषमाप मनसो जनकात्मजायाः ॥ ९७ ॥

रामस्य [1]जगति ख्यातैः [2]शौर्योदार्यादिभिर्गुणैः ॥
न पितैव परं प्रीतः किन्तु प्रकृतयोऽखिलाः ॥ ९८ ॥

प्रहितेनाश्वपतिना चिरौत्सुक्येन केकयान् ॥
नीतौ भरतशत्रुघ्नौ मातुलेन युधाजिता ॥ ९९ ॥

पौरजानपदप्रीतिं विशेषाद्वीक्ष्य राघवे ॥
राजा दशरथो ज्यायानभिषेक्तुं तमैहत ॥१००॥

मन्थरा तदुपलभ्य कैकेयीं
दुर्वचं नयमिवावदत्खला ॥
पश्य राममभिषिञ्चते नृपो
दूरदेशमपनीय ते सुतम् ॥१०१॥

१, जगत्ख्यातैः–क० ।
२. शौर्यदर्या–क० ।

राज्यात् परिभ्रश्यति ते तनूजो
मुग्धे ! मदुक्तं यदि नातनोषि ! ॥
वरौ पतिं प्रार्थय पूर्वदत्तौ
निबन्ध्य पूर्वं शपथैरनेकैः ॥१०२॥

वसत्वरण्ये मुनिवेषधारी
चतुर्दशैकेन समास्तु रामः ॥
अन्येन राज्यं भरतो लभेत
सदेशकोशं बलवाहनाद्यम् ॥१०३॥

हितापि रामस्य नितान्तमेषा
दैवात् तदुक्त्या विकृतिं बभाज ॥
नेष्टे जनो नूनमयं मतीनां
विधातुरध्वानमलं पतीनाम् ॥१०४॥

श्वो भाविन्यभिषेकमङ्गलविधौ रामस्य निर्वारिते
शुद्धान्तं स्वमगान्नृपो दशरथो वक्तुं प्रियायै प्रियम् ॥
क्रोधागारगतां तु तामनुनयंस्तत्सत्यपाशैः सितः
श्रुत्वा तन्मुखनिर्गतौ वत वरावानर्च्छ मूर्च्छां भुवि ॥१०५॥

विवासयामास सुतं सुतघ्नो
राजा रुदन् हन्त ! जरापरीतः ॥
तपस्विवेषा विपिनं प्रयाताः
सीता सुमित्रातनयश्च रामः ॥१०६॥

राजाज्ञया तानयत्सुमन्त्रो
रथेन गङ्गां गुहनामधेयः ॥
अतीतरत् तान् सगुहं सुमन्त्रं
त्यक्त्वा भरद्वाजमुपागतास्ते ॥१०७॥

तस्योपदेशादगमत्प्रयागा-
च्छयामं वटं वीक्ष्य तु चित्रकूटम् ॥
नद्या अदूरे कृतपर्णशालो
रामः स रामः स च लक्ष्मणोऽस्थाद् ॥१०८॥

अयोध्यावासिनः सर्वे रामादर्शनदुःखिताः ॥
परावृत्य सुमन्त्रश्च पुरीं म्लानमुखा ययुः ॥१०९॥

निशम्य रामं गतमार्तचित्तः
कौसल्यया सार्धमुवास राजा ॥
वियोगदुःखेन न या सुतस्य
साध्व्याप्युपालब्ध इदं जगाद ॥११०॥

अनुक्तपूर्वं किमिदं ब्रवीषि ?
न कामचारः सुतविप्रवासे ॥
ममैव कालान्तरकिल्बिषस्य
प्रिये ! विपाकः समुपस्थितोऽयम् ॥१११॥

पूर्वं मया यः श्रमणः सुदूरा-
त्कुम्भो वने हस्तिधिया विशस्तः ॥
अन्धेन शप्तोऽस्मि तदीयपित्रा
पुत्रस्य शोकेन मरिष्यसीति ॥११२॥

तन्मे बुद्धिविपर्ययोऽयमभवन्नार्याऽनया वञ्चितो
रामं सर्वजनाभिराममबुधो बालं वनायात्यजम् ॥
हा ! शोकाय नुद प्रसीद सुमते ? तातः परैत्येष ते
वृद्धस्त्वद्विरहादिति प्रविलपन्प्राणान् जहौ पार्थिवः ॥११३॥

वशिष्ठादिभिराहूतो मातामहगृहादथ ॥
न राज्यमैच्छद् भरतो मातरं बह्वधिक्षिपन् ॥११४॥

तैलद्रोण्याः समुद्धृत्य संस्कृत्य पितरं ततः ॥
रुरोद भरतो भूरि वशिष्ठस्तमबोधयत् ॥११५॥

स राजदारः सगुरुः ससैन्यो
जगाम रामं भरतो नु नेतुम् ॥
नासौ परावर्तत पादुके स्वे
भक्त्यार्थितोऽदाद् भरताय भूपः ॥११६॥

ते तु भद्रासने न्यस्य नन्दिग्रामे जितेन्द्रियः ॥
राज्यं स सचिवैः सार्धं मुनिवेषधरोऽकरोत् ॥११७॥

[1]दृष्ट्वाऽत्रिमनुसूयां च दण्डकारण्यमागमत् ॥
विराधमवधीद्रामो रक्षाकामो द्विजन्मनाम् ॥११८॥

मुनीन् सुतीक्ष्णप्रभृतीन् विलोक्य
कुम्भोद्भवभ्रातरमाजगाम ॥
अगस्त्यमागच्छदनेन रामो
दत्तायुधः पञ्चवटीं जगाम ॥११९॥

सौमित्रिणा तत्र [2]निकृत्तनासा
दुष्टा भृशं सूर्पणखोपसृत्य ॥
[3]सद्यो जयामास खरादिसेनां
सा राममासाद्य[4] [5]विराममापत् ॥१२०॥

---

१. त्रिमनसू–क०
२. निकृन्त–क०
३. नद्यो–क०
४. मोसाघ–क०
५. विनाशमागात्–ख०
विरानं प्रापत्–क०

चतुर्दशसहस्राणि यातुधानान्निहत्य सः ॥
सप्रेमसंगतोऽतुष्यत् सीतया लक्ष्मणेन च ॥१२१॥

दशाननः शूर्पणखाप्रयुक्तो
मारीचमायो जयति स्म कृत्ये ॥
भीतोऽपि रामात् स च रावणस्य
भीत्या विचित्रो हरिणो बभूव ॥१२२॥

मारीचो मृगमायया परिचरन्नभ्यर्थितः सीतया
तं रामोऽन्वगमद्विदेहदुहितुर्वाचा पुनर्लक्ष्मणः ॥
शून्ये तामहरत् त्रिदण्डिवपुषा रक्षोधिपो रक्षणं
हत्वा हन्त ! जटायुषं हतरथो यातः ससीतो दिवि ॥१२३॥

नीयमाना दशास्येन रुदती करुणं बहु ॥
वानरान् वीक्ष्य विक्षेप सीता स्वाभरणं गिरौ ॥१२४॥

अशोकवनिकायां सा स्थापिता तमनिच्छती ॥
संवत्सरावधिं[1] कृत्वा रावणेन दुरात्मना ॥१२५॥

रामः परावृत्य न पर्णशाला
स्थितामपश्यज्जनकस्य कन्याम् ॥
रात्रिंचरैर्हन्त ! हृताऽशिता वा
सीतेति सौमित्रिमभिव्यलापीत् ॥१२६॥

गोदावरीतीरदरीवनेषु
विचिन्वतस्तस्य जटायुषोऽक्तम् ॥
निहत्य मां राघव ! रावणेन
सीताहृतायां विचिनोषि वत्स ! ॥१२७॥

I. सरावधिं षण्मासावधिम् ।
१. दिविवि–क०

इत्युक्तवन्तं मृतमेनमाशु
संस्कृत्य रामो दहने दयालुः ॥
हत्वा कबन्धं शबरीमुदीक्ष्य
पम्पाश्च सुग्रीवमुपाजगाम ॥१२८॥

हनूमता कारितयोश्च मैत्री
प्रतिश्रुतं बालिविवासितस्य ॥
रामेण राज्यं तपनात्मजस्य
परीक्ष्य तुष्टस्य बलं हि सख्युः ॥१२९॥

प्रियावियोगेन विदूयमान–
माश्वासयामास ततः सखायम् ॥
सन्दर्शयामास च भूषणानि
सीता निरस्ता निकृती कपीन्द्रः ॥१३०॥

किष्किन्धामभिगम्य बालिनमहन्[1] सुग्रीवघातोद्यतं
रामो राज्यमदात् सुताय सवितुः सम्पातिवाक्यात् प्लुतः ॥
सिन्धोः पारमुपेत्य वाततनयो मुद्रां ददन् मैथिली–
माश्वास्याक्षमुदस्य राममनयत् सीतावितीर्णाम्मणिम् ॥१३१॥

सुग्रीवेण समाहूता नानानगनिवासिनी ॥
आगता वानरीसेना कम्पयन्ती वसुन्धराम् ॥१३२॥

अङ्गदो द्विविदो मैन्दो नलो नीलश्च जाम्बवान् ॥
केसरी पनसस्तीरः स्वस्वयूथैः प्रतस्थिरे ॥१३३॥

वीरैः पर्वतयोधिभिः परिवृता गोपुच्छऋक्षोत्कटा
तूर्णं सागरतीरमेत्य महती सेना निविष्टा ततः ॥

---

१. भट्टत्सु–क०

नीत्या संधिमभीप्सुरुद्धतधिया लङ्केश्वरेणोज्झितो[1]
भ्राता तस्य विभीषणोऽथ शरणं रामं शरण्यं ययौ ॥१३४॥

क्रुद्धयद्राघवबाणभीतिकथितस्वोल्लंघनोपायके
संमत्या च नलं चकार विपुले सेतुं ततः सागरे ॥
रुद्धां नागसहस्रवीर्यविकटैर्लङ्कां विशङ्कायत-
न्नीलाङ्गप्लवलीमुखैर्रघुपतेः संचुक्षुभे तेजसा ॥१२५॥

सुग्रीवः प्रथमं नियुध्य मुकुटं चिक्षेप लङ्कापते-
रासीद्वानररक्षसामविरतं मांसासृजां कर्दमः ॥
यो यो वीर्यमदादपारपृतनो रात्रिंचरो निर्गतः
क्लृप्तोऽभूत्स स वीरवानरभटैः कीनाशदेशातिथिः ॥१३६॥

नीलादिभिः प्रहस्ताद्या हता हनुमता परे
अंगदेन हतावोरा मैन्देन द्विविदेन च ॥१३७॥

बबन्ध बाणैः फणिरूपधारिभिः
सुतो दशास्यस्य तु रामलक्ष्मणौ ॥
गरुत्मतो दर्शनमात्रतो गता
भुजङ्गमास्तौ द्विषतो निजघ्नतुः ॥१३८॥

अन्तर्हितो मेघनादो रामलक्ष्मणवानरान् ॥
विव्याध सायकैस्तीक्ष्णैस्तेऽपतन् मूर्च्छिताः क्षितौ ॥१३९॥

जाम्बवद्वचनाद्वायुसूनुर्द्रोणाद्रिमानयत् ॥
विशल्यकरणीं गंधाद्विशल्यास्ते ततोऽभवत् ॥१४०॥

[2]को वापरः सागरलङ्घने स्याद्
विना हनूमन्तमनन्तवीर्यम् ॥

---

१. ज्झितो—क०

२. कौज्जोबिलः—क० ।

को वा दशास्यस्य तलप्रहाराद्
रणाङ्गणे व्याकुलतां विदध्यात् ॥१४१॥

कुम्भकर्णदशकन्धरादयो
रामबाणविसरैर्विलिम्पिरे ॥
मेघनादमवधीच्च लक्ष्मणो
होमकर्मणि गतो निकुम्भिलाम् ॥१४२॥

लङ्काधिपत्यमतिसृज्य विभीषणाय
सीतां परीक्ष्य दहने विधिवासवाद्यैः ॥
शस्तः कपीन् युधि हतान् मघवद्वरेण
संजीव्य पुष्पकगतोऽथ जगाम रामः ॥१४३॥

सुग्रीवेण विभीषणेन मरुतः पुत्रेण शाखामृगै-
र्जानक्या सह लक्ष्मणेन मुदितोऽयोध्यां गतो राघवः ॥
राज्यं प्राप धरां शशास सकलामासन्नतन्नेतरो
दुर्भिक्षं न न च क्वचित् सुतमृतिस्त्यक्तो न धर्मो जनः ॥१४४॥

अभिनन्दितुमागतादगस्त्या-
द्दशकंठादिहनूमदादिगाथाम् ॥
भरतादिभिरन्वितः सभायां
रघुनाथः श्रुतवान् विसिस्मये च ॥१४५॥

दशसहस्रसमाः सकलां मही-
मशिषदेष निरर्गलशासनः ॥
सुचरितैः सततं रमयन्प्रजा
जनकजां स्वगुणैरनुरञ्जयत् ॥१४६॥

लोकापवादमयशस्करमात्मपत्न्या
भद्रान्निशम्य शपथैरुपरुध्य बन्धून् ॥

प्राचेतसाश्रममनाय यदा तदार्यां
सौमित्रिणा प्रियतमामपि राघवस्ताम् ॥१४७॥

शत्रुघ्नश्च्यवनादिविप्रवचनाद् दाराभिषिक्तो व्रजन्
क्रव्यादं लवणं निहन्तुमवसत् प्राचेतस्याश्रमे ॥
सीता तत्र यमौ सुतौ कुशलवौ सूते स्म तस्माद्गतः
सानन्दो मथुरां न्यवेशयदसौ हत्वा रणे राक्षसम् ॥१४८॥

शंबुकं वृषलं निजेन वपुषा स्वर्गं यियासुं तपः
कुर्वाणं विनिहत्य विप्रतनयं रामस्ततोऽजीवयत् ॥
लेभे चाभरणं प्रसन्नमनसः कुम्भोद्भवादाश्रमे
गोमत्याश्च तटेऽश्वमेधमकरोत् तीर्थोत्तमे नैमिषे ॥१४९॥

निमन्त्रितास्तत्र नृपाः समागता
विभीषणः सूर्यसुतोऽनिलात्मजः ॥
स ऋक्ष[1]गोपुच्छवलीमुखेश्वरा
दिगन्तवास्तव्यमुनीश्वरा अपि ॥१५०॥

वाल्मीकिरागात् सह सीतया मुनिः
कुशीलवौ तस्य निदेशतो मखे[2] ॥
अगायतां रामचरित्रमुत्तमं
शुश्राव तद्दाशरथिः सबान्धवः ॥१५१॥

अष्टादशसहस्राणि सुवर्णानामदात् प्रभुः ॥
न च तौ तदगृह्णीतां सन्तुष्टौ फलमूलतः ॥१५२॥

रामो रामायणाद् बुध्वा तौ च सीतासुतौ कृती ॥
आजुहाव पुनः शुद्धैर्वाल्मीकिं सीतया सह ॥१५३॥

---

१. स ऋृच्छ—क०
२. मुखे—क०

वाल्मीकिः शपथं चकार वचसा पूर्वं ततो जानकी
काषायाम्बरवासिनी वसुमतीं मार्गं ययाचे सती ॥
नागैर्मूर्द्धभिराधृते जनकजां धृत्वा सुवर्णासने
सा निन्यैव तपस्यतो रघुपतेः सद्यः समाजस्य च ॥१५४॥

रुदतश्च शुवे च कुप्यतो
रघुनाथस्य विबोधनं विधिः ॥
विदधेऽथ सुवर्णजानकी
सहितो यज्ञवरैरयष्ट सः ॥१५५॥

गन्धर्वकोटित्रयमाशु हत्वा
निवेश्य सिन्धोः सविधे पुरिद्वे ॥
युधाजितः संमतितः स्वपुत्रौ
रामाऽनुशिष्टो भरतोऽभ्यषिञ्चत् ॥१५६॥

तक्षं तक्षशिलायुं यो पुष्कलं पुष्कलावते ॥
गन्धर्वदेशे राजानौ गान्धारेषु चकार सः ॥१५७॥

अङ्गदं चन्द्रकेतुं[1] च लक्ष्मणस्य सुतौ ततः ॥
रामोऽकरोत् कारुपथे मल्लभूम्यां च पार्थिवम् ॥१५८॥

कालो दूत उपागतो विधिगिरा वैकुण्ठयात्रां मुनि-
र्वक्ष्यन् राममुवाच यो रहसि नौ पश्येत् स वध्यस्तव ॥
तत् स्वीकृत्य निजप्रयाणमचिरादूचे स तं लक्ष्मणो
दुर्वासः प्रहितोऽथ शापभयतस्तस्यागतिं प्रोक्तवान् ॥१५९॥

त्यागोऽपि साधोर्वधतुल्य एव
त्यजामि तत्त्वामिति राघवोक्तः ॥

---

१. कोतुं—क०

तीरे सरय्वाः करणानि रुन्ध्वा
सौमित्रिरंतर्धिमवाप योगात् ॥१६०॥
रामेण राज्यं प्रतिपाद्यमानं
न गर्हमाणो भरतोऽनुमेने ॥
कुशं तदुक्त्या किल कोशलेषु
नृपोऽभ्यषिञ्चल्लवमुत्तरेषु ॥१६१॥
सुबाहुं मथुरायां तु वैदिशे शत्रुघातिनम् ॥
अभिषिच्य सुतौ राज्ये शत्रुघ्नः शीघ्रमागतः ॥१६२॥
मैन्दं तथा द्विविदमृक्षपतिं च रामो
यावत्कलिं कलय जीवितमित्युवाच ॥
आकल्पमत्र निवसेति भुवं जिहासु-
र्वातात्मजं च निजगाद विभीषणं च ॥१६३॥
तीर्थे सरय्वाः किल गोप्रतारे
मग्नो निजं धाम जगाम रामः ॥
प्रजाः समग्रा भरतः परे च
शत्रुघ्नसुग्रीवमुखा ययुस्तम् ॥१६४॥
एकादशसहस्राणि समा राज्यं चकार सः ॥
गतोऽथ वैष्णवं लोकमयोध्या निर्जनाऽभवत् ॥१६५॥
वाल्मीकिमुख्यैः कविभिः कृतस्य
कोशश्चरित्रस्य शतं तु तस्य ॥
एकैकवर्णश्रवणेन यस्य
पापानि नश्यति महान्ति सद्यः ॥१६६॥
सोऽयं रामो मर्दन ! ब्रह्मसाक्षा—
त्सम्यग्वेदे तापनीये[1] निरुक्तः ॥

१. रामतापनीयोपनिषदीत्यर्थः ।

दैवादन्तेऽप्युच्चरन्नाम यस्य
संसाराब्धेः पारमायाति जन्तुः ॥१६७॥

विभीषणो हनूमांश्च तत्प्रेमप्रवणौ सदा ॥
अहं च भक्तो रामस्य येऽपरे च सचेतसः ॥१६८॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
श्रीरामचरितं नाम पञ्चदशः प्रस्तावः ॥

—: ० :—

अथ षोडशः प्रस्तावः

वाग् देवतां स्मरतु [1]जागरणे मनो मे
स्वप्ने च पश्यतु तदीयतनुं मनोज्ञाम् ॥
लीनं सुषुप्तिसमयेऽस्तु तदीयतत्त्वे
वाण्या विवेकमखिलं कलयेच्च विश्वम् ॥ १ ॥

गृहं [2]कियद्दूरमितो ममेति
वीणाधरोऽपृच्छदुवाच योगी ॥
उत्कण्ठितो यद्यसि मर्दन ! त्वं
तदा नयेयं तलवण्डिकां त्वाम् ॥ २ ॥

यदृच्छयेदं गदितं यियासा
न मेऽस्ति सार्धं भवतो पिता हे ! ॥
इतीरितो वाद्यधरेण योगी
जगाद पूर्वापरबोधसिन्धुः ॥ ३ ॥

अहं गमिष्यामि यदेश इच्छे-
दल्पस्य हेतोर्न जहीहि सङ्गम् ॥
तं मर्दनः स्माह शरीरपातः
किं [3]सन्निधत्ते ? ममसर्ववेदिन् ! ॥ ४ ॥

भवेत्कदा कुत्र स [3]सन्निधौ ते
ममेशितुः स्वर्गगतिप्रदस्य ॥

---

१. जागरितं—ख०

२. कियदूर—क०

३. सन्निधौ—ख०

किञ्चैतदाकर्णय दाहनीयो
न भूमिगर्भेऽह्यनुप्रवेश्यः ॥ ५ ॥

दाहेन देहस्य गतिं लभेयं
विशेषतः सौम्य ! भवत्कृतेन ॥
अदग्धदेहा हि सुहृज्जनेन
क्लिश्यन्ति योनीर्विविधा व्रजन्तम् ॥ ६ ॥

ऊचे गुरुस्तं च गभीरबोधो
गान्धारदेशे तव देहपातः ॥
भावी दिने पञ्चम एव भावी
तिस्रोऽवशिष्टाः [1]समुपेत्य प्रापुः ॥ ७ ॥

त्वां तत्र धक्ष्यामि विधानतश्च
स्मरन्हरिं मुक्तिमवाप्स्यसि त्वम् ॥
न मर्दनः त्वं तु विधेहि चिन्तां
ममानुवृत्तिर्विफला भवेत्किम् ? ॥ ८ ॥

ननाम मर्दनस्तुष्टो जगाम यतिनायकः ॥
चतुर्थे दिवसे प्राप दरबेलाभिधं पुरम् ॥ ९ ॥

अत्रैव[2] किं मरिष्यामीत्यपृच्छन्मर्दनस्ततः ॥
योगी जगाद मर्ताऽसि श्वः खर्जूरपुरे खलु ॥ १० ॥

प्रारब्धभोगशेषोस्ति तत्राहारस्तवानघ[3] ? ॥
मुक्तानामपि हेतुर्हि प्रारब्धं देहधारणे ॥ ११ ॥

---

१. समुपेय दायुः–क०
२. वकि–क०
३. तृद्य–क०

पञ्चमेऽहनि खर्जूरपुरं प्राप्यापि मर्दनः ॥
जघास खर्जूरफलं किञ्चिदस्वास्थ्यमाप च ॥ १२ ॥

घटीत्रयं तत्र दिनस्य शिष्टं
जगाद योगी किमु मर्दनेति ! ॥
श्वासा नवैवोर्वरिता नमस्ते
प्रयामि तं मर्दन इत्युवाच ॥ १३ ॥

योगीव जानासि कथं त्वमेत-
त्तेनेति पृष्टः स इदं जगाद ॥
नाभौ मम ग्रन्थिरभिद्यतायं
वायोस्ततो [1]वेद्म्यनुकम्पया ते ॥ १४ ॥

श्वासेषु गण्यमानेषु मया गुरुनिदेशतः ॥
दशमो नागमच्छ्वासः[2] स ममार हरिं स्मरन् ॥ १५ ॥

ईशं ववन्दे शिरसा यतीशो
जगाद चेदं महिमैष कर्तुः ॥
अवादिषं नेश्वर ईक्षितोऽस्ति
त्वमीश्वरोऽस्माकमनावृतोऽसि ॥ १६ ॥

नववस्त्रवृतं वपुस्तदीयं
विधिवद्दाहमवाप योगिवर्यात् ॥
महतामनुकम्पया महत्त्वं
[1]नितरां फल्गुरपि प्रपद्यते हि ॥ १७ ॥

---

1. दृश्यतां सामान्येन विशेषसमर्थनस्यार्थान्तरन्यासस्य गरिमा ॥

१. वेदयनु—क०

२. च्छाशः—क०

न सेतुबन्धो नयनातिथीकृतो[1]
धृतो न रामेशविलोकनोत्सवः ॥
इतीरितो योगिवरो मयाऽवद
त्तदस्ति तीर्थं खलु बाल ? दूरतः ॥ १८ ॥

तथापि व्रज यद्यस्ति तवोत्कण्ठा विलोकने ॥
इत्युक्त्वा नानकोगच्छदहं च तदनुग्रहात् ॥ १९ ॥

सेतुर्दृष्टो नलकृतो महासर्प इवाम्बुधौ ॥
तस्य मौलौ मणिरिव श्रीरामेशो विलोकितः ॥ २० ॥

गोरक्षो मत्स्येन्द्रो भर्तृहरिश्चापि लहुरीयाः ॥
चर्पटनाथो गोपीचन्द्रः सिद्धा विलोकितास्तत्र ॥ २१ ॥

भर्तृहरिस्तमपृच्छत्—
किं ज्योतिः ? सर्वशेखरं ब्रूहि ॥
को वाऽद्वितीय उक्तः ?
कमपारं वक्षते ? सुधियः ॥ २२ ॥

योगी योगं लभते
केन ? कथं याति निर्वाणम् ? ॥
तत्त्वं कुत्रान्विच्छे—
दपगच्छेद्वैतदुर्मतिः[2] केन ? ॥ २३ ॥

कथं तरे दुस्तर[3]सम्भृतिं ? भोः ?
जीवन्मृतः कः खलु जीवलोके ? ॥

१. तिथिकृतो–क०
२. दूरतः–क०
३. संभृति–क०

दीक्षाप्रदः कश्च ? गुरुर्गरीया-
निदं वदेर्नानक ? सम्प्रधार्य[1] ॥ २४ ॥

गुरुस्तमूचे शृणु सर्वशेखरं
निरञ्जनज्योतिरुदीरितं परम् ॥
य एष आत्मा स किलाद्वितीयको
न लब्धपारः स हि सीमवर्जितः ॥ २५ ॥

गुरून्मुखो योगमुपैति योगी
ज्ञानेन निर्वाणमुपैति दान्तः ॥
कोशेषु तत्त्वं मृगयेत शास्त्रै-
र्द्वैतभ्रमोऽयं मननादपैति ॥ २६ ॥

संसारसिन्धोरुपयाति पारं
विवेकतः केवलविष्णुभक्तेः ॥
जीवन्मृतो मानुषदेहधारी
य ईश्वरे प्रेम न संतनोति ॥ २७ ॥

गुरुर्गरीयान्स हि यः स्वशिष्यं
मज्जन्तमुत्तारयते भवाब्धेः ॥

---

१. संप्रधार्य–क०

I. भर्तृहरेः–प्रश्नस्योत्तरं वर्ततेऽत्र नानकेन दत्तम् ॥

प्रश्नाः :— उत्तराणि :—

i. किं सर्वशेखरं ज्योतिः = निरञ्जनज्योतिः ।
ii. कः अद्वितीयः = आत्मा ।
iii. केन योगी योगं लभते केन च निर्माणम् = गुरुणा योगं ज्ञानेन निर्माणम् ।
iv. तत्त्वं कुत्र अन्विच्छेत् = शास्त्रेषु ।
v. द्वैतदुर्मतिः केन अपगच्छेत् = मननात् ।
v. को दीक्षाप्रदः = गुरुः ।
vi. कश्च गुरुर्गरीयान् = यः उत्तारयेत् ।

[1]गोरक्ष ऊचे विजितेद्रियो यः
सत्यव्रतः साधुशिरोमणिः सः ॥ २८ ॥
जीवोऽयमुक्तो वद किं स्वरूपो ?
विस्तार एतस्य विलोक्यते कः ? ॥
केनारभेतायमुपाधिसिद्धि-
मन्तःस्थितः केन विभाव्यते च ? ॥ २९ ॥
किं ज्योतिरुक्तं सकलप्रकाशं ?
कुतोऽयमागच्छति ? कं प्रयाति ? ॥
[1]पिण्डे विलीने कमुपैति जीवो ?
गोरक्षपृष्टो वद नानक ? त्वम् ॥ ३० ॥
ततोवदन्नानकयोगिराजः
प्रत्यक्षिताखण्ड[2]चिदात्मतत्त्वः ॥
सत्यस्वरूपः कथितस्तु जीवः
प्राणास्तु विस्तार इवास्य देहे ॥ ३१ ॥
संस्कारलब्धस्य कलेवरस्य
रसादिमूर्तिं प्रकरोति तेजः ॥
शब्देन चान्तःस्थित एष बुद्ध-
स्तेनैव साकार इव प्रतीतः ॥ ३२ ॥

---

1. भर्तृहरेः पश्चात् गोरक्षः प्रश्नांश्चकार ।

प्रश्नाः :— उत्तराणि :—

i. जीवः कि स्वरूपः = सत्यस्वरूपः
ii. क एतस्य विस्तारः = प्राणाः
iii. उपाधिसिद्धिः केन आरभेत = तेजसा
iv. केन अन्तः विभाव्यते = शब्देन
v. सकलप्रकाशं ज्योतिः कुत आयाति कं च याति = ब्रह्मणः ।

१. पंडे—क० ।
२. खंड—क० ।

ब्रह्मप्रसिद्धं सकलप्रकाशं
ततोऽयमागच्छति तत्प्रया[१]ति ॥
पिण्डे[२] विलीने समुपैति जीवः
पिण्डान्तरं[३] ज्ञानजनिर्न यावत् ॥ ३३ ॥

मनोऽतिघातिर्निगमो घनश्च
गुरुश्च शिल्पी सुमतिश्च मुद्रा ॥
सत्संप्रदायः खलु टंकशाला
क्रीत्वाऽमृतं ब्रह्म निपीय माद्येत् ॥ ३४ ॥

गोरक्ष ऊचे बत! विस्मृतोऽहं
पन्थानमादर्शय मे पुराणम् ॥
तं नानकोऽभाषत भो यतीन्द्र !
गुरोरलभ्यं न किमप्यवेहि ! ॥ ३५ ॥

अवस्थात्रितये पश्यन्नन्तरक्षचतुष्टये ॥
कोशेषु पञ्चस्वन्विच्छन् सप्तप्रकृतिसङ्गतः ॥ ३६ ॥

नवद्वारे पुरे क्रीडन् दशमं द्वारमाश्रितः ॥
शृण्वन्ननाहतं योगी यत्नादमृतमश्नुते[1] ॥ ३७ ॥

युग्मम्

शास्त्रैः पुराणैर्निगमैरधीतै-
र्निःसंशयं तत्त्वमवाप्यते किम् ! ॥

---

1. अनाहतध्वनिश्रवणात्पश्चादपि यत्नादेवामृतं लभ्यते । अनस्तत्रापि योगिना यत्नः करणीय इति व्यज्यते ॥

१. प्रयोति–क० ।

२. पिडे–क० ।

३. पिडान्तरं–क० ।

विना कृपां साधुगुरोः सदैव
[१]मुकुन्दनाम्नामुपदेशकस्य ॥ ३८ ॥

भ्रमन्तु तीर्थानि जयन्तु देवान्
जपन्तु मन्त्रान् [२]गिरिगह्वरेषु ॥
पथो गुरुर्दर्शयिता परस्य
गोरक्ष ! हे भर्तृहरे ! न चान्यः ॥ ३९ ॥

[1]अचलवटाले भावी
सिद्धानां श्वः समागमो भूयात् ॥
[2]शरमुनिजलधिशशाङ्काः
क्रोशा गम्या इतः सौम्य ! ॥ ४० ॥

यदि गच्छसि गच्छ त्वं
नानक ! सिद्धोऽसि सर्वशक्तिरसि ॥
इति गोरक्ष गिरोन्ते
नानक ऊचे विनीतवचाः ॥ ४१ ॥

त्वं व्रज परिणतयोगो
मम तु मनुष्यस्य का शक्तिः ! ॥
उदडायि पादुकां भो-
स्त्वयेति तं स्माह भर्तृहरिः ॥ ४२ ॥

नानक ऊचे सत्यं
तदपि महेशस्य माहात्म्यम् ॥

1. अचलवटालः पर्वतस्य नाम ।
2. १४७५ क्रोशाः ।
१. सुकन्द–क० ।
२. गह्वरे–क० ।

यूयं व्रजत तदाज्ञा
यदि पुनरहमागमिष्यामि ॥ ४३ ॥

उड्डीनास्ते सिद्धा
नानक उदडीयताहं च ॥
अचलवटाले गत्वा-
ऽश्वत्थतले संस्रुतावावाम् ॥ ४४ ॥

पश्चादागत्य गोरक्षो नानकं पूर्वमागतम् [1] ॥
आदेशमूचे तेनोक्तमादेशः परमेश्वरः ॥ ४५ ॥

भर्तृहरिस्तमथोचे
कमिष्टमासेव्य सिद्धतां तनुषे ? ॥
तेनोक्तं जगदीशा-
न्नेष्टोऽन्यः सिद्धिदोस्ति मम ॥ ४६ ॥

पात्राणि नर्तकानामाचक्रुषुः शक्तितः सिद्धाः ॥
तेषु रुदत्सु दयालुर्योगी प्रत्यर्पयत्तानि ॥ ४७ ॥

मेलके वसिते तत्र इत्यभिज्ञाय नानके ॥
प्राणमन् केऽपि केचित्तु दुष्टभावमदर्शयन् ॥ ४८ ॥

मां नानकोऽवोचदितो व्रजावः
पुत्रं ग्रहीतुं खलु मर्दनस्य ॥
तं दर्शयिष्यामि पिता तदीयो
भस्मीकृतो यत्र [१]तमङ्गदेशम् ॥ ४९ ॥

---

1. आर्यायामत्र दृश्यनां ।
नानकसिद्धिः ॥
१. तमंग—क० ।

गान्धारदेशे भवतश्च साधू
तौ पूर्वनिर्वर्तितसंविदौ मे ॥
समागमस्ते न तयोर्विधेयः
[१]प्रतीच्छतोर्मां किल भूरिकालम् ॥ ५० ॥

मर्दनस्य [1]सहजादसंज्ञकः[२]
सूनुरस्ति तलवण्डिकापुरे ॥
एवमुक्तवति मय्यगादसौ
सार्धमेव तलवण्डिकां मया ॥ ५१ ॥

पितुर्मदीयस्य स चन्द्रभानोः
कूपस्य पार्श्वे निशि सङ्गतोऽभूत् ॥
ऊचे मृतौ मे पितरौ प्रवीणो
बोलारराय: पृथिवीपतिश्च ॥ ५२ ॥

लालः पितृव्यो ध्रियतेऽधुना तु
ज्ञाता स चेद्द्वेष्टयितेह मोहात् ॥
अलक्षितोऽन्यैस्तदितः प्रयाहि
तमाह्वय त्वं सहजादसंज्ञम्[३] ॥ ५३ ॥

गते निशाया घटिका चतुष्टये
ततो गतोऽहं सहजादसंज्ञम्[४] ॥
स निर्गतो मामुपलभ्य पादयोः
पपात कालेन विलोक्य विस्मितः ॥ ५४ ॥

---

1. सहजादः मर्दनस्य पुत्रः ।
१. प्रतीछतो–क० ।
२. सज्ञकः–क० ।
३. सज्ञम्–क० ।
४. मह्यम्–क० ।

उवाच नानकाख्येन प्रेषितौ द्वौ तपस्विना ॥
बालसिन्धो ? त्वमायातो [1]मत् पिता कुत्र मर्दनः ? ॥ ५५ ॥

चिरादश्रुतवार्तस्य मर्दनस्य पितुर्मम ॥
दिदृक्षितस्य चास्माभिर्वृद्धस्य वद वार्तताम् ॥ ५६ ॥

अवादिषं शीघ्रमितस्तपस्विनो
निदेशतस्तस्य तु देशमाव्रज ॥
अधीरतां मुञ्च सधीरसत्तम ?
तमस्त्वदीयं सकलं हरिष्यति ॥ ५७ ॥

स दैवशालीं व्यचलन्मया समं[2]
सदैव नाम्नो विनयेन सन्मतिः ॥
उपागतो नानकपादपद्मयोः
पपात पातं हरतोर्भवार्णवम् ॥ ५८ ॥

विलोक्य तं योगिवरोऽभ्यधादिदम्
सुखी भव त्वं सहजाद ? सुव्रत ? ॥
गतः पिता कालगतिं तवोन्मना
मनाङ् न तन्नश्वरविश्वविद्भव ॥ ५९ ॥

आश्वासयन्निह भवन्तमुपागतोऽस्मि
मत्तः प्रसादवसनानि गृहाण सौम्य ? ॥
अन्येन येन मनसस्तव तुष्टिरस्ति
तद्वा वृणुष्व मम वैणिकतोऽसि जातः ॥ ६० ॥

सहजाद इदं जगाद नम्रः
शिशवः किं स्वहितं विदन्ति जाताः ? ॥

---

१. मेपिता–क० ।
२. ममासयं–क० ।

उपचारपरा हि तं जनन्यः
स्वयमुत्प्रेक्ष्य तदीयमाचरन्ति ॥ ६१ ॥

यथा दयामासिथ मे पितुस्त्वं
तथा जनस्यास्य दयस्व साधो ! ॥
तव प्रसादात्स्पृहणीयमीहे
लोकद्वयं शोकनिरासनस्य ॥ ६२ ॥

संक्रामति स्नेहऋणं यथैव
पोष्यस्य पुत्रेष्वपि सज्जनानाम् ॥
प्रसेदिवान् सूनृतमस्य शृण्वन्
जगाद योगी स्मृतपूर्वमेतत् ॥ ६३ ॥

यद्येवमागच्छ मया समं त्वं
दाहस्थली यत्र हि मर्दनस्य ॥
दाहो वृतस्तेन न भूमिगुप्ति-
र्मुनिर्मदीयैवमिति प्रसह्य ॥ ६४ ॥

आनन्दजेनाश्रुलवेन तत्र
जलार्द्रपङ्केरुहरम्यनेत्रः ॥
जगाद नम्रः सहजादनामा
भाग्यं मदीयं सहगामिनस्ते ॥ ६५ ॥

आपृच्छ्य मां तत्र जगाम योगी
मया च सार्धं सहजादकेन ! ॥
विलोकमाना नगराणि नाना
वयं समासादितमूलताताः ॥ ६६ ॥

लुभस्य निकटे देशे नवक्रोशीमिते गतः ॥
नानकः सहजादाख्यामाख्यदेतदुदारधीः ॥ ६७ ॥

गच्छ ग्राममिमं तूर्णं सहजाद[1] बिभीहि न ॥
तेनोक्तं तव पार्श्वे मे कृतान्तस्यापि किं भयम् ? ॥ ६८ ॥

ग्रामे तत्र गतः स वैणिकसुतः पुण्ड्रेण भास्वद्रुचा
मालाभिस्तुलसीमयीभिरभितो मुद्राभिरत्युज्ज्वलम् ॥
नाम्ना सज्जनमैक्षत स्मितमुखं तं कर्मणा दुर्जनं
लुब्धाकं पथिकव्रजस्य कपटैर्नत्या प्रवेश्यालयम् ॥ ६९ ॥

वैष्णवो रामनामाङ्कं वसानो वसनं तनु ॥
आसीनः स बहिर्वेद्यां गृहाद्दूरे निरीक्षितः ॥ ७० ॥

विनीतवेषं रमणीयरूपं
नरं निरीक्ष्ये प्रवणं न कस्य ॥
मनोभवेत्तेन स सत्यरामे-
त्यवादयन्तेन समं विवक्षुः ॥ ७१ ॥

सत्यरामेति शनकैरभिधाय नतस्ततः ॥
वैडालव्रतिकोऽब्रूत कुतो भ्रातरिहागतः ? ॥ ७२ ॥

कोऽसि ? कस्यासि ? विश्रब्धं ब्रूहि विश्रम्यतामिह ॥
सहजादस्ततोवादीत्सहजाद ? शठत्वतः ॥ ७३ ॥

वैदेशिको वैणिकोस्मि नानकस्य महात्मनः ॥
देशान् दिदृक्षुर्भ्राम्यामि वैष्णवांश्च भवादृशान् ॥ ७४ ॥

वस्त्राणि नूत्नानि तनूनि दृष्ट्वा
तनौ स चोरः सहजादकस्य ॥
भृत्यान् स्वकीयान् द्रुतमाजुहाव
जगाद चेदं न परेण वेद्यम् ॥ ७५ ॥

---

१. बहिर्वस्यां–क० ।

महात्मनो वैणिक आगतोऽय-
मन्तर्गृहं [1]तन्नयतामुमाशु[2] ॥
अस्यातिथेयी विधिवद्विधेया
न वाच्यतां येन वयं व्रजाम ॥ ७६ ॥

नीत्वा सत्कृत्य ते तूर्णमन्तर्गृहममुं खलाः ॥
संघट्य च कपाटानि बाहू बध्वा न्यपातयन् ॥ ७७ ॥

संहृत्य वस्त्राणि ततः शरीरा-
त्कौपीनमेकं परिधाप्य जीर्णम् ॥
ऊचुर्धृतं कुत्रचिदस्ति वित्तं
तद्देहि[4] नो चेदिह मारयामः ॥ ७८ ॥

स नानकस्य स्मरणं चकार
जगाद चेदं मनसाऽतिभीतः ॥
यमस्य दूता वत जीवतः किं ?
हा हन्त ! कुर्वन्ति कदर्थनां[1] मे ॥ ७९ ॥

संसारभीतेरपवर्जनाय
श्रितोभवान्नानक योगिवर्य ! ॥
चोरैः प्रणीताभयमृत्युभीतिं
कुतो न दासस्य विनाशयेस्त्वम् ? ॥ ८० ॥

मामुवाच ततो योगी चल बाल ! कृतत्वरः ॥
सङ्कटे सहजादेन स्मृतोऽहं चोरमन्दिरे ॥ ८१ ॥

---

1. सहजादः चोरैर्धृतो नानकं सस्मार ॥
१. तत्र—क०
२. युमा—क०
३. मन्ते—क०
४. तदेहि—क०

गत्वा सज्जनमासोनं महाभागवताकृतिम् ॥
कर्ता कर्तेत्युवाचाऽयं सत्यरामेति सोऽब्रवीत् ॥ ८२ ॥

तं दुर्जनं सज्जननामधेयं
सभाजयामास यतिः स पूर्वम् ॥
दोषान्विदन्तोऽप्यखिलान् खलानां
सन्तः प्रकृत्यैव किलाद्रियन्ते ॥ ८३ ॥

भ्रातः सज्जन ? कोऽपि वैणिक इहायातो न किं निह्नुषे ?
किं लभ्यं मम ? निह्नवेन भवतो भिक्षोर्भुवि भ्राम्यतः ॥
अन्तस्त्वं व्रज बाल ? कालवदनं कुर्याः शठं वैष्णवं
तत्रोत्थं वचनेषु सत्स्वहमगां यत्राऽभवन्मार्दनिः ॥ ८४ ॥

स बद्धबाहुर्विधृतो मलिम्लुचै-
र्गृहीतवस्त्रो मलमल्लकावृतः ॥
विलोक्य मां दीन उवाच चोरव-
द्धृतोऽस्मि चोरैश्च दिगम्बरीकृतः ॥ ८५ ॥

मयोक्तमस्य वस्त्राणि दत्त वैष्णवतस्कराः ॥
तैरुक्तमित्थमेवायमागतो मलमल्लकी ॥ ८६ ॥

आयाहि सहजाद ? त्वमम्बरं तव दुर्जरम् ॥
इत्युक्त्वा स हि नीतोऽभूत् यत्र नानकसज्जनौ ॥ ८७ ॥

वस्त्राणि कुत्रेति विलज्जमानं
तं वीक्ष्य दूराद् गुरुराबभाषे ॥
स उक्तवान् वैष्णवतस्करस्य
भृत्यैर्हृतानि प्रसभं निबध्य ॥ ८८ ॥

आतिथ्यमेष कः कर्तुं प्रवेश्य पथिकान् गृहे ? ॥
सर्वस्वं लुण्ठयत्याशु करोति प्राणसङ्कटम् ॥ ८९ ॥

स्मेरस्तदा नानक आबभाषे
भ्रातः कथं सज्जन ? सज्जनोऽसि ? ॥
असेवितोप्यावरणव्यपायं त्वमञ्जसा मार्गजुषां करोषि ॥ ९० ॥

पक्षैरतिस्वच्छतरैर्मनोज्ञो
ध्यायन्नशब्दं पयसि स्थितश्च ॥
विस्रम्भतो मत्स्यगणानुपेता
न लग्नदं तद् ग्लसतेव कोटः ॥ ९१ ॥

पुष्पैः कोकनदाकारैर्हरन्ती हृदयं चिरम् ॥
फलेषु तूलं दधती शाल्मलिः सेविता मुधा ॥ ९२ ॥

पुराणकूपः कुरुते [1]संवृतो हरितैस्तृणैः ॥
दूरादुदञ्चिताशानां गवां ग्रासमसंशयम्[2] ॥ ९३ ॥

पुण्ड्रं तव स्वच्छतरं ललाटे
माला विशाला हृदि काष्ठमय्यः ॥
ते तूर्ध्ववस्त्राण्यतिनिर्मलानि
मलीमसं कर्म करोषि किं भोः ? ॥ ९४ ॥

अनेन वेषेण विशेषसौम्य-
स्त्वमध्वगान् वञ्चय किञ्च कामम् ॥
सर्वस्य तिष्ठन् हृदयारविन्दे
प्रपञ्चसाची तु न वञ्चनीयः ॥ ९५ ॥

---

1. श्लोक सं० ९१ तः ९६ पर्यन्तं नानकः सज्जननामानं चौरराजमुपदिदेश । ततः स चौरश्चरणयोः पतितो यतेः ॥

१. सम्बृतो—ख०

२. शंसय—क०

सुखावहे सम्प्रति भाति यत्ते
कर्मेह मर्मव्यथनं परस्य ॥
याम्यैः प्रयुक्ता स तु यातनासु
भ्रातर्भवान् वेत्स्यति तस्य तत्त्वम् ॥ ९६ ॥

पादयोः पतितस्तस्य गिरं श्रुत्वेति सज्जनः ॥
उवाच नीचकर्माहं शरणं त्वां समाश्रितः ॥ ९७ ॥

ममैव पुण्यैर्जनुरन्तरार्जितैः
प्रवर्तितः पापहरो भवान् ध्रुवम् ॥
पुनः करिष्यामि न कर्म कुत्सितं
एतत्तु मे क्षाम्यतु दुष्कृतं महत् ॥ ९८ ॥

स वत्सलो दीनजनेषु नानकः
कृतोपदेशस्तमिदं वचोऽब्रवीत् ॥
गुरुस्तवायं सहजादसंज्ञको
धनैरमुं वस्त्रवरैश्च पूजय ॥ ९९ ॥

तदर्थमेवागमनं ममाभव-
द्भवान् कृतार्थः शरणागतो हरेः ॥
कृते हि पापे नु तपन्ति ये परं
स्मरन्ति कृष्णं न च ते दुराशयाः ॥१००॥

ततः सुवस्त्रः सहजादसंज्ञको
यतीश्वरोऽहं च गता जवान्विताः ॥
उपेत्य खर्जूरपुरे च संस्थिताः
कृतं यतो मर्दनदाहचत्वरम् ॥१०१॥

सहजादमभाषत योगिवरो
जनकस्य तवेह हि दाहपदम् ॥

वसतः स्वजनेन सहात्र तवा-
पचितिं कलयिष्यति पौरजनः ॥१०२॥

तेनोक्तमायास्यति मे कुटुम्बं
भवन्निदेशात् तलवंडिकायाः ॥
भवोस्तु दृश्येत कथं मया नु?
भवातपक्लान्तिशरच्छशाङ्कः ॥१०३॥

गुरुणोक्तं यदीच्छा ते तदा द्रक्ष्यसि मां पुरः ॥
प्रत्यक्षे मम भक्तानां चिन्तामात्रमपेक्षितम् ॥१०४॥

गान्धारदेशाय गुरुर्जगाम[1]
तं मुद्गलोऽभाषत विष्णुमित्रः ।
म्लेच्छोक्तिभिर्विश्वविरक्तभित्त-
स्तस्यास्य वाचामिति गुम्फ आसीत् ? ॥१०५॥

किं नामासि ? वदस्व नानक ? निराकारः कथं भक्तितो ?
विष्णोः को गुरुरस्ति ? ते तु वरुणः प्रत्येमि नैतत्तव ॥
नानारूपधरो गुरुर्हि भगवानेकस्तु शिष्याः परे
तेनोन्मीलितलोचना जगदिदं पश्यन्ति यत्तन्मयम् ॥१०६॥

प्रणमन् लब्धतत्त्वः स शिष्यतामगमद् गुरोः ॥
बली गान्धार इत्येवं तस्य नामावदद् गुरुः ॥१०७॥

गान्धारदेशादगमद्देशमन्यं स देशिकः ॥
भ्राम्यन्ति स्वेच्छया सिद्धा जनान्नेतुं कृतार्थताम् ॥१०८॥

---

1. खर्जूर पुरे सहजादं मर्दनदग्धशरीरं दर्शयित्वा सहजादं च तत्रैव स्थापयित्वा गुरु-र्गान्धारं जगाम । तत्र विष्णुमित्रो नामा मुद्गलस्तस्य शिष्यः संजातः । यतिवर-स्तस्य नाम बलीवान्धार इत्यकरोत् ॥

विदरान्नगरात्कश्चिदागतो दक्षिणापथात् ॥
यवनोऽसरफो नाम मित्रं मुदूगलमैक्षत ॥१०९॥

अन्यादृशमिवालक्ष्य तमपृच्छन्महोज्ज्वलम्[1] ॥
कुतस्तव प्रभावोऽयं ? प्रभावा विश्वजित्वरो ॥११०॥

कुतोऽसि ज्ञानगम्भीरो ? निष्कम्प इव वारिधिः ॥
केनोपदिष्टो मन्त्रो[2] वा ? सद्यः सिद्धिकरस्तव ॥१११॥

बली गान्धार ऊचे तं नानकः सिद्ध आगतः ॥
तद्वाक्यश्रवणादेतज्जातं तदनुकम्पया ॥११२॥

तन्निशम्य बभूवासौ नानकं द्रष्टुमुन्मनाः ॥
अनैषीद्वासरांस्तत्र तत्समागमनेच्छया ॥११३॥

भ्राम्यन् देशे कुत्रचिन्नानकस्तु
रात्रौ यामार्द्धविशेषे ददर्श ॥
क्षत्रोद्भूतं षोडशाब्दं कुमारं
स्नानोद्युक्तं शीततोये तडागे ॥११४॥

प्रालेयस्य शिलां विदार्य शिलया तत्तोयसंरोधिनीं
सस्नौ धीरतरः स शीतवहले काले च देशेऽपि च ॥
चर्मोर्णायुपिनद्धसर्वतनुभिर्गेहं क्वचित्संवृते
यस्मिन् दारुणवारुणानिलचलद्दन्तैः स्थितैर्जन्तुभिः ॥११५॥

तं स्नातं नानकोऽपृच्छत्कोसि कस्योपदेशभाक् ? ॥
स ऊचे तव कोऽवार्थः ? पथिकः किं नु पृच्छसि ? ॥११६॥

---

१. महोज्व–क० ।
२. मंत्रो–क० ।

मृगये भ्रातरं सौम्य ? चिरविप्रोषितं मम ॥
इति नानकभाषायामभाषत वटुः पुनः ॥११७॥

किं नामा ? कस्य पुत्रोऽभूद् ? भ्राता ते नानकोऽब्रवीत् ॥
विमलज्योतिरित्याख्यस्ताम्बूलिकसुतः स तु ॥११८॥

भृत्यो जनकराजस्य पुनर्वटुरुवाच तम् ॥११९॥

त्रेतायां जनको राजा त्वं कलौ किल वर्तसे ॥
असंबद्धं वदसि किं ? स्वप्नोन्मादसमुद्भवम् ॥१२०॥

स स्वयं प्रत्यभिज्ञाता वचनाडम्बरैरलम् ॥
नानकेनेति कथिते कुमारः पुनरब्रवीत् ॥१२१॥

तदा ते नाम किमभूदिदानीं किं नु वर्तते ? ॥
भ्रातुश्च तव किं नाम ? कदा मृत्युर्भविष्यति ? ॥१२२॥

भ्रात्रन्तरं च कुत्रास्ति ? नानकः पुनरभ्यधात् ॥
गोवर्द्धनाभिधः पूर्वं योऽहमासं शुभव्रत ? ॥१२३॥

स नानक निराकार इति गीयेऽधुनाजनैः ॥
दीनानाथ दयालुश्च भ्राता त्वमसि निश्चितम् ॥१२४॥

भ्रात्रन्तरस्य जनने तव मृत्युर्भविष्यति ॥
सो पृच्छद्भाविनो भ्रातुः संगमो मे भविष्यति ॥१२५॥

नानकेन तदा प्रोक्ते त्रिकालज्ञानसिन्धुना ॥
तव वार्तां विदित्वा स सत्यवादी भविष्यति ॥१२६॥

गतः परं पदं भ्राता तदा त्वं लप्स्यसे गतिम् ॥
दीनानाथ दयालो ? त्वं दृष्टो विसृजमामतः ? ॥१२७॥

---

1. "ख" इत्यत्र ११९ श्लोकयोः प्रथमद्वितीयचरणयोरभावः ।

दीनानाथस्ततोऽब्रूत धर्मभ्राताऽसि मे गुरुः ॥
आवासे वस मे कश्चित्कालं येन ततोऽपि सः ॥१२८॥

मृतस्य मम संस्कारं करिष्यामि यतो गतिम् ॥
आप्नुयां तव सिद्धस्य हस्तादस्ताघसञ्चयः ॥१२९॥

अब्रूत नानकः पूर्वमावयोः समयोऽभवत् ॥
तद्वशादहमागच्छे बहुकार्याकुलोऽपि सन् ॥१३०॥

त्वां दृष्ट्वा सुखितोऽभूवं सतां मार्गमुपागतम् ॥
गतिस्तु गुरुवाक्येन चित्तस्य विजयेन च ॥१३१॥

दीनानाथ दयालुनाथ कथितं या ते [1]स्रवंती यते ?
मेरोरुत्खनने जगत्त्रयशुचेरास्वादने शक्नुयात् ॥
कश्चित्किन्तु न मानसस्य विजये योगो जगादाग्रहा-
दभ्यासेन विरागतश्च शनकैः शक्यं विजेतुं मनः ॥१३२॥

संसारसिन्धुतरणे तरीरिव सुनाविकैः ॥
सज्जनैर्दीयते [2]युक्तिमुक्तिमिच्छुः श्रयेत तान् ॥१३३॥

ज्ञापयन्ति परमेश्वरं परं
साधवः सपदि दीनवत्सलाः ॥
ईश्वरे त्वधिगते गतं तमो
विभ्रमस्य सकलस्य कारणम् ॥१३४॥

यज्ञास्तपांसि तीर्थानि श्रम एव हि केवलम् ॥
मुकुन्दचरणाम्भोजे नाविच्छिन्ना यतो रतिः ॥१३५॥

अष्टाङ्गयोगाद्वशतामुपैति
चेतो मुरारेः सदुपासनेन ॥

---

१. पीयते—क० ।

२. मुक्तिमुक्ति—क० ।

सतां कृपातोऽभिदधे कुमार—
स्ततः स सार्थीकृतपुण्यभारः ॥१३६॥

साधनानि भवानाह दुष्कराणि बहूनि मे ॥
चरमेण तु मत्कार्यमार्यः तत्रावधार्यताम् ॥१३७॥

दीनानाथदयालुः पात्रं जन्मनान्तरस्य मित्रं च ॥
अनुजग्राह यतीन्द्रः समाधिमाधेहि तमवोचत् ॥१३८॥

कृते समाधौ [1]महसोऽवलोकना-
द्विलीनदुःखत्रयमोहविभ्रमम् ॥
गुणैरसंस्पृष्टममोघवैभवं
चिरं चिदानन्दमहोज्वलं महः ॥१३९॥

व्युत्थितः परमतोषनिर्वृतो
नानकस्य पतितश्च पादयोः ॥
स त्वदृश्यत निवातवारिधे-
र्धारयन्निव गम्भीरतागुणम् ॥१४०॥

त्रिदिनं नानकस्तस्थौ दीनानाथस्य सन्निधौ ॥
आबाल्यात्तस्य वैराग्यं वीक्ष्य सन्तुष्टमानसः ॥१४१॥

बलिं गान्धारनिकटे चतुर्थदिवसे गुरुः ॥
पुनरायान्ननामासावूचे [2]च महती कृपा ॥१४२॥

असीमं च सुखं मेऽभूदवोचन्नानकस्ततः ॥
कृपासुखं च श्रीशस्य मनुष्यो हि द्वयोः क्षमः ॥१४३॥

अद्य श्वो वा रतिर्भावी किं परस्य ? करिष्यति ॥
ततो यवनसंन्यासी गान्धारनिकटे स्थितः ॥१४४॥

---

१. स्वमत्साव–क० । २. च–क० ।

जगाद सरफो नाम परीक्षां [1]विदधद्यतेः ॥
शिरस्त्रं चोलकं चैव तन्तुमालां च नानक ? ॥१४५॥

कटौ परिकरं कन्था [2]पादुकां खर्परं तथा ॥
वहन्ति यतयः कस्मादिदं वद विदांवर ? ॥१४६॥

ऊचे नानकतापसः शृणु शिरस्त्राणं परं बिभ्रते
नोष्णीषं यतयो न वा धनजुषां भारो न ते[3] मस्तके ॥
एवं बोधयितुं हि चोलकधृतिस्तुच्छावृतेर्बुद्धये
माला तन्तुमयीनिबद्धगलतां प्रेम्णा हरेर्बोधयेत् ॥१४७॥

बद्धः परिकरो मुक्त्यै हरिस्मरणशालिभिः ॥
गृहानपेक्षतां ब्रूते कन्थाशीतोष्णरक्षणी ॥१४८॥

कठोरचित्ताः कुमतानुयायिनः
पादानताः पादुकया निरूपिताः ॥
परिग्रहीता न तु यस्य कश्चन
श्रयन्ति तं खर्परवद्यतीश्वराः ॥१४९॥

बाह्यं विरक्तेरिति लक्ष्ममात्रं
साभ्यन्तरीका न[4] च वृत्तिरेव ॥
यद् दृष्टमानुश्रविकं च भोग्यं
तृष्णाक्षतिस्तत्र रतिर्मुकुन्दे ॥१५०॥

विदरनगरात्तत्रायातः [5]किलसरफाभिधो
यतिचरणयोः पातं पातं तदेदमभाषत ॥

१. दध–क० ।
२. पादका–क० ।
३. न तो–क० ।
४. न च न–क० ।
५. किला–क० ।

गुरुरसि यत्ते शिष्यस्तेऽहं प्रभूतमते ! मतः
पुनरपि कदा ! पादौ पश्येयमापददुदासिनौ ॥१५१॥

नानकोथ निजगाद मानसं
दर्शनं तु भविता न चाक्षुषम् ॥
प्रीतिरेव[1] सुखदायिनी परं
तां विना हि विफलं विलोकनम् ॥१५२॥

विदरं[2] नगरं व्रजाधुना
यदि ते दर्शनलालसा परा ॥
सहजाद उदीक्ष्यतां त्वया
मम [3]खर्जूरपुरेस्ति वैणिकः ॥१५३॥

अयं च बलिगान्धारो महापुरुषतां गतः ॥
काले काले त्वया सौम्य! मद्बुध्या वीक्ष्यतां सुखम् ॥१५४॥

'ॐ' इत्युक्ते तेन गान्धारनामा
नम्रः प्रोचे किञ्चिदाज्ञापयस्व ॥
सार्धं गन्तुं श्रीमता कामये च
तं योगीन्द्रः प्रीतियुक्तो बभाषे ॥१५५॥

आज्ञेयमेव मम साधुजनानशेषान्
सम्भावयस्व सततं जगदीशबुद्ध्या ॥
गर्वं कुरुष्व न च कश्चन भो विरक्ते !
त्रैव तिष्ठ मनुजोद्धरणाय धीर ! ॥१५६॥

---

१. प्रातरेव—क० ।
२. विदुरं—क० ।
३. खर्गूर—क० ।

गान्धार ऊचे तव दर्शनस्य
माहात्म्यतः सर्वमिदं ममाऽभूत् ॥
स्थास्यामि ते पादसरोजचिन्ता
संसक्तचित्तः सुजनानुरागी ॥१५७॥

इति श्री जगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
गान्धारगमनं नाम षोडशः प्रस्तावः ॥

—: ० :—

सप्तदशः प्रस्तावः

हंसासनां कुमुदबान्धवखण्डचूडां
कुन्देन्दुकैरवरुचं वचनाधिदेवीम् ॥
ये धारयन्ति मनसा कवयः प्रवीणा-
स्ते किं न शुद्धमनसः सुतरां भवेयुः ? ॥ १ ॥

ततो गतः केकयमण्डलेषु
मया समं नानकयोगिनाथः ॥
अवोचमेनं व्यदधाः [1] कृतार्थं
गान्धारनामानमलं गुरो ? त्वम् ॥ २ ॥

तेनोक्तमेष त्रेतायां मत्सेवामकरोत्पराम् ॥
मयोक्तं म्लेच्छजातीयः किमभूदीदृशो यदि ? ॥ ३ ॥

सारमेयो हतस्तेन तेन स म्लेच्छतां गतः ॥
इत्युक्त्वा नानकोऽवोचद्दीनानाथोऽपि मे सखा ॥ ४ ॥

त्रेतायां सह संवासी कलौ सिद्धिं परां गतः ॥
बिभ्रत्यमरहंसत्वं [2]विवाहादिविवर्जितः ॥ ५ ॥

प्रथमानुभूतगृहगर्तविडम्बाः
परिवर्तमानमनसः श्रमतो हि ॥
हरिभक्तितो गतभवार्णवपाराः
पदमीदृशं वयमिवाकलयन्ति ॥ ६ ॥

---

१. कृतार्थ–ख० ।
२. विऽवा–क० ।

विरक्तेरङ्कुरस्तस्य सहैव वपुषाऽवत् ॥
वचोमृतैर्मयासिक्तो [1]मोक्षं फलमलं ददौ ॥ ७ ॥

मयोक्तमस्मिन्देशेऽपि साधुश्चेदस्ति कश्चन ? ॥
द्रष्टव्यः सोऽपि भवता ततो गुरुरभाषत ॥ ८ ॥

अस्ति साधुर्न विख्यातोऽधुना द्रष्टव्य एव सः ॥
आवामेवं संलपतावागतौ कञ्चिदापणम् ॥ ९ ॥

युवराजखेलयवनस्य च शून्ये
विपणे गृहे यतिपतिर्निषसाद ॥
तमुपेत्य कोऽपि यवनो विजगाद
ननु कौ युवां किमिह वामथकृत्यम् ? ॥ १० ॥

वन्दारू स्वो मुकुन्दस्य कृत्यं मित्रस्य दर्शनम् ॥
नानकेनेति कथिते यवनः पुनरब्रवीत् ॥ ११ ॥

मित्रस्य[2] तव किं नाम ? तत्पितुर्नाम[3] किं वद ? ॥
जातिः का ? येन विज्ञाय वदेयं तव तद्गतिम् ॥ १२ ॥

मानचन्द्राभिधं मित्रं खानचन्द्रश्च तत्पिता ॥
क्षत्रियो नानकस्येति गिरं श्रुत्वा स उक्तवान् ॥ १३ ॥

आगच्छतं मया सार्धं त्वन्मित्रं [4]दर्शयाम्यहम् ॥
आगन्ता स्वयमेवायमिति तं नानकोऽब्रवीत् ॥ १४ ॥

मानचन्द्रमुवाचेदमुपेत्य यवनः स्वयम् ॥
आपणे द्वौ विरक्तौस्तस्त्वां मित्रं स्मरतश्च तौ ॥ १५ ॥

---

१. क्तोक्षं फल–क० ।
२. मिवस्य–क० ।
३. र्माम–क० ।
४. दर्शयामहं–क० ।

त्वां मित्रमाहतुस्तस्मादातिथ्यं न मया कृतम् ॥
स्थाने [1]मुकुलादिफलैस्तौ सम्भावय[2] सत्वरम् ॥ १६ ॥

तं मानचन्द्रोऽभिदधौ न मित्रं
ममास्ति कश्चिन्न तथा विरक्तः ? ॥
तथापि गच्छामि विरक्तभाजः
सम्भावनीयाः किल सर्वथैव ॥ १७ ॥

द्राक्षामुकुलवातादभव्यपालेवतादिकम्[1] ॥
प्रस्थद्वयं गृहीत्वाऽसौ ययौ नानकसन्निधौ ॥ १८ ॥

अदृष्टपूर्वागतरागरोषो
स आपणे प्रव्रजितौ ददर्श ॥
फलानि धृत्वा प्रणनाम योगी
तमभ्यधादाव्रज मानचन्द्र ? ॥ १९ ॥

सत्यः कर्तेति [3]तेनोक्ते मानचन्द्र इदं जगौ ॥
नाहं प्रत्यभिजानामि सङ्गतः कुत्र मे भवान् ? ॥ २० ॥

नाम किं युवयोः साधू ? अथो अभिजनश्च कः ? ॥
मया यदि न दृष्टः स्याच्छ्रुतः स्याद्विषयः स तु ॥ २१ ॥

यतिनाऽभिहितं मम सङ्गमनं
स्वयमेव तव प्रतिभास्यति भोः ? ॥
मम नानक पूर्वनिराकृतिरि-
त्यभिधास्यतु बाल इति प्रथिता ॥ २२ ॥

1. पालेवतादिकम् इति फलाविशेषे ज्ञेयम् ।
१. मुकुला–क० ।
२. संभावय–क० ।
३. तेनोक्ते–क० ।

आयातोऽभिजनादगम्यनगरादोंकारवाच्येरितः
पन्थानं सरलं तव प्रथयितुं निःकण्टकं निर्मलम् ॥
वार्ता न व्यवहारगोचर इयं तं मानचन्द्रोऽप्यधा-
त्सत्येयं वितथा वृथा तदितरा तं योगिराजो जगौ ॥ २३ ॥

कामिन्यः कलयन्तु भूषणगणं काचित्कटाक्षक्रिया
सा भिन्नैव यया प्रसीदति पतिः प्रेम्णा समालिङ्गति ॥
या वेला रमणाभिसारसरसा तामेव सुप्तेऽलसे
तस्मिन्मानिनि निर्गते किमधुना जागर्षि रे यामिनीम् ? ॥ २४ ॥

प्रेमप्रियस्य यदि भामिनि भूषणैः किं ?
स्मेरानने स्मरसि यत्र स तत्र सिद्धः ॥
कान्तस्य नान्तरुषितासि यदि श्रमाय
व्यर्थं बिभर्षि वसनाभरणप्रपञ्चम् ॥ २५ ॥

रासभस्यातिविरसा वाटिकाः फुल्लमल्लिकाः ॥
कुसुमे कुसुमे तत्र मिलिन्दः शर्म विन्दति ॥ २६ ॥

श्रुत्वेति नानकवचो मानचन्द्रेण भाषितम् ॥
तात्पर्यं नावगच्छामि वाचां ते वदतांवर ? ॥ २७ ॥

जीवस्यास्य भवेद्भद्रं येन तद्वद मे स्फुटम् ॥
नानकेनोदितं[1] सौम्य ? शृणु सारार्थसङ्ग्रहम् ॥ २८ ॥

संहृत्य नानाविषयामिषेभ्यो
मनो मुकुन्दस्य पदारविन्दे ॥
निवेशितं प्रेम रसालसं चे-
ज्जीवः कृतार्थो न च शोचनीयः ॥ २९ ॥

---

१. नोदित—ख० ।

मानचन्द्र उवाचेदमुपदेशोऽतिदुष्करः ॥
कपन्ति विषयाश्चित्तमयस्कान्ता अयो यथा ॥ ३० ॥

कृपैव साधिकैतस्य सद्गुरूणां भवादृशाम् ॥
इत्युक्त्वा निपपाताऽसौ नानकस्य पदाब्जयोः ॥ ३१ ॥

हस्तोऽस्य मस्तकेऽन्यस्तो दण्डो दत्तश्च योगिना ॥
अज्ञाननिद्राभङ्गोभूत्प्रभातमिव चाभवत् ॥ ३२ ॥

महापुरुषतां गते मानचन्द्रे जितात्मनि ॥
कर्ता कर्तेति सङ्कीर्त्य जगाम यतिनायकः ॥ ३३ ॥

तुङ्गे शृङ्गे सरसि विमले कुत्रचिद्रात्रिशेषे
सस्नौ योगी तमभिपुरुषः कश्चिदेतज्जजल्प ॥
मज्जन् शीते पयसि वपुषः क्लेशदः किं वृथात्वं ?
जीवान् निघ्नन् स्थलजलचरान् बद्धमिथ्याफलाशः ॥ ३४ ॥

सहस्रेणापि किं शुध्येद् घटैर्मलमयं[1] वपुः ॥
आत्मा तु सततं शुद्धो वालिशाः स्नान्ति तद् वृथा ॥ ३५ ॥

ऊचेऽथ नानकमुनिः खल ! ते खलत्वं
[1]किं वेत्सि धर्ममविलोकितवेदशास्त्रः ॥
उत्प्रेक्षितैश्च पुरुषापसदैर्गृहीतै-
राहारमैथुनपरैर्विहितः कुतन्त्रैः ॥ ३६ ॥

सिद्धिः क्वचिद् क्वचिदसिद्धिरयत्नतोपि[2]
सिद्धिः क्वचित्तु विपरीतमिति प्रसिद्धम् ॥
शक्नोति तेन न परं पुरुषप्रयत्नो
हेत्वन्तरं किमपि वर्तत इत्युपेयम् ॥ ३७ ॥

---

१. द्वटं–ख० ।
१. ञ्चेत्सि–क० ।
२. द्विर–क० ।

तन्न स्वभाव उचितो वदितुं जडः स
नेष्टे विलक्षणकृतौ [1]तदमी [1]अनन्ताः ॥
वाच्याः सचेतन इति प्रतिवक्षि चेत्व-
मीशः स एव पुरुषोऽखिलकर्मसाक्षी ॥ ३८ ॥

बुध्वा विपाकसमयं सफलं ददाति
वेदास्तु तेन गदिताः परमं प्रमाणम् ॥
तर्कोऽप्रतिष्ठित तथा क्रमते न तत्र
दृष्टिर्ह्यदृष्टविषये श्रुतिरास्तिकानाम् ॥ ३९ ॥

हिंसाभयात्तमसि वैधविधेर्विमोके
लुप्येत कर्म सहसा त्रिविधं जनानाम् ॥
आमोदितैश्च निगमैः क्रतवः प्रदिष्टा
हिंसा परा न विपरीतकरा बत स्युः ॥ ४० ॥

कूपखानकवत्तस्माज्जनः कर्मसु वर्तते ॥
तेनैव हन्ति दुरितं श्रेयस्तेनैव विन्दति ॥ ४१ ॥

यूयं किल गुरोर्भक्ताः परं जीवदयालवः ॥
गुरोः शिरोव्रणे जातान् कृमीन् हरथ वा न वा ॥ ४२ ॥

अहंमतिर्जनस्यास्य देहावच्छिन्न आत्मनि ॥
शुद्ध्यशुद्धी ततस्तस्मिन् शास्त्रोक्ते को नु वारयेत् ? ॥ ४३ ॥

ईश्वरा रामकृष्णाद्या वशिष्ठाद्या विवेकिनः ॥
लोकसङ्ग्रहमुद्दिश्य न कर्म विजहुः शुभम् ॥ ४४ ॥

---

1. ३६ श्लोकात् ४४ श्लोकपर्यन्तं नानकः स्नान्तं क्षपणकं वेदप्रमाणानि श्रावयामास । श्रुत्वा च स क्षपणको नास्तिको गिरिं ययौ ।
अत्र बौद्धसंन्यासिन आचरणस्य खण्डनं कृतमस्ति नानकेन । "न स्नीकुर्वन्ति नास्तिका" इत्यनेन बौद्धं नास्तिकं मन्यते नानकः ॥

१. चदमं-क० ।

इति श्रुत्वा गतस्तूष्णीं ततः क्षपणको गिरौ ॥
अप्राक्षं योगिनमहं क एष मलिनाकृतिः ? ॥ ४५ ॥

तेनोक्तमीश्वरं वेदं न स्वीकुर्वन्ति नास्तिकाः ॥
तदन्तर्गत एषोपि मूढो बद्धमुखश्चरन् ॥ ४६ ॥

सञ्चिरन्त इमे व्योम सूक्ष्मैर्भूतैः समावृतम् ॥
बाष्पैस्तन्मरणत्रासाद्बद्धास्याः स्नानवर्जिताः ॥ ४७ ॥

जगाम बालनाथस्य पर्वते नानकस्ततः ॥
बालगुद्रायिनस्तस्माददूरे योगिनो मठः ॥ ४८ ॥

क्रोशत्रयीं भ्रमन्ति स्म शिष्यास्तस्य तु सर्वतः ॥
श्रान्तेभ्योऽन्नानि पानानि यानानि ददति स्म च ॥ ४९ ॥

आवामागत्य तैरुक्तं मठं नश्चलतं यती ॥
चिरं विश्रम्यतां तत्र भोजनाच्छादनार्चितौ ॥ ५० ॥

नानकेन ततः प्रोक्तं न नौ किञ्चित्प्रयोजनम् ॥
अवदन् स्वगुरुं शिष्यानत्रायात उभौ यती ॥ ५१ ॥

विरक्ताविति विज्ञाय तद्गुरुः स्वयमागमत् ॥
उवाच नानकं वीक्ष्य तेजस्विनमनुत्तमम् ॥ ५२ ॥

व्योम्नि भ्रमन्ति धृतवारिभराः पयोदा
[1]चण्डो रवश्चलति[2] विस्फुरतीह विद्युत् ॥
धावन्ति पक्षिपशवः स्वनिकेतनाय
गेहे युवामपि यती वसतं मदीये ॥ ५३ ॥

ऊचे गुरुर्विपिन एव वयं भ्रमाम-
स्तत्रास्मदर्थमकरोत्किल मन्दिरङ्कः ॥

---

१. मन्द्रा—क० ।
२. वोज्वलति—ख० ।

वृष्टिः क्वचिद्भवति दुःसहवारि विद्युद्-
धर्मः क्वचिद्भवति शर्मविनाशकारी ॥ ५४ ॥

बालगुद्रायिना प्रोक्तं सत्यमेतद्यतीश्वर ? ॥
अयत्नोपनतं किन्तु द्विषन्ति न विवेकिनः ॥ ५५ ॥

ततो गतो नानकयोगिवर्य-
स्तथाश्रमे सर्वसमृद्धिरम्ये ॥
समाचिते गोमहिषीमहोक्षै-
रश्वैरनेकैरुपशोभिते च ॥ ५६ ॥

स दर्शयामास चलन् समन्ता-
द्यतीश्वरं स्वस्य परां विभूतिम् ॥
यतीश्वरोऽब्रूत रजोगुणस्य
ह्ययं प्रपञ्चो न मुनेर्मनोज्ञः ॥ ५७ ॥

बालगुद्रायिणा प्रोक्तं नाम किं युवयोर्यती ? ॥
कथितं योगिराजेन बालसिन्धुरहं यते ? ॥ ५८ ॥

नानकोऽहं निराकारस्ततः स पुनरब्रवीत् ॥
तापसो यः सुविख्यातः स एवासि परोऽथवा ॥ ५९ ॥

मया तदुत्तरं प्रोक्तं स एवायं यतीश्वरः ॥
बालगुद्राथूणा नत्वा तदुत्तरमुदीरितम् ॥ ६० ॥

विषवृक्षस्य पत्राणां शाकं गोक्षुररोटिकाः ॥
भुञ्जे विभवविस्तारोऽतिथिसत्कृतये कृतः ॥ ६१ ॥

परोपकाराय कृतः प्रपञ्चो
न योगि[1]बन्धाय भवेत्कदाचित् ? ॥

---

१. वन्धाय—क०

इति स्वबुद्धया[1] प्रमितं मया तु
सर्वास्ववस्थासु दया न दुष्टा ॥ ६२ ॥

योगी जगौ तदनुसात्विक एष बन्ध
उद्बन्धनी कनकरज्जुरपि ह्यभव्या ॥
बद्धो बभूव हरिणी पृथुकोपकारा–
द्राजा चिराय भरतो मनसोत्सुकेन ॥ ६३ ॥

तथापि कल्याणकृतो न दुर्गति-
र्मनो विशुध्येत् सुकृतेन कर्मणा ॥
परा विरक्तिस्तदनन्तरं भवेत्
प्रबोधमोक्षौ न ततो विदूरतः ॥ ६४ ॥

धन्योसि बालगुद्रायिन् ? प्रवृत्तिस्ते परार्थिका ॥
विभवे विद्यमानेपि नेन्द्रियैस्त्वं पराजितः ॥ ६५ ॥

कश्चित्कालं स्थितस्तत्र सत्कृतस्तेन योगिना ॥
ततो जगाम लालस्य वर्द्धकेः सदनं यतिः ॥ ६६ ॥

स्थितः कूपस्य निकटे निशम्य स समागतः ॥
कर्ता कर्तेति संकीर्त्य पादयोर्न्यपतद्यतेः ॥ ६७ ॥

स सत्यकर्तेत्यायाहि गुरुप्रिय इति ब्रुवन् ॥
प्रसन्नस्तस्य भवने न्यावसत् सप्तयामिनीः ॥ ६८ ॥

एकदा लाल आचख्यौ त्वं गुरुः साधुसत्तमः ॥
अतस्त्वां परिपृच्छामि निःशंकः क्षम्यतामिदम् ॥ ६९ ॥

ब्रह्मचारी गृही वानप्रस्थः पाराशरी तथा ॥
चत्वार आश्रमाः ख्याताः उदासी तु क आश्रमः ? ॥ ७० ॥

---

१. बुध्या–क०

गुरुणा नानकेनोक्तं शृणु लाल महामते ! ॥
फलानां भक्षणेनार्थो वृक्षाणां गणनेन किम् ॥ ७१ ॥

ज्ञानस्य सम्पादनमेव मुख्यं
सर्वास्ववस्थास्वखिलैः प्रयत्नैः ॥
दृष्टः क्व वर्णाश्रममात्रवर्ती
ज्ञानी विना साधनसम्प्रदायैः ॥ ७२ ॥

वर्णाश्रमाणामपि जायमानो
मानो हि हन्त्येव फलं बलीयान् ॥
कलौ तु कामादिसमाकुलानां
तद्धर्मसिद्धिः सुतरामशक्या ॥ ७३ ॥

साधनात् ज्ञानिनो जाताः स्त्रीशूद्रा दैत्यराक्षसाः ॥
अनेके पक्षिपशवो मन्महे नियमं हि तत् ॥ ७४ ॥

बन्धनानि सकलानि विधूय
द्वन्द्वदुःखसहनो गतरागः ॥
आग्रहं वसनभोजनवासे—
ष्वुत्सृजन् यतिपते न विमुक्तौ ॥ ७५ ॥

मानापमानचकितस्य मनोहरेषु
बद्धस्पृहस्य विषयेषु न बोधसिद्धिः ॥
लोष्टे मणौ स्रजि भुजङ्गम एकबुद्धे-
र्वर्णस्य वाश्रमधरस्य परस्य मुक्तिः ॥ ७६ ॥

स्नानादिशुद्धिकरणेषु कृताग्रहः स्या-
द्योगे गुरौ सुरवरेषु धराधरेषु ॥
वेदान्तवाक्यपरिशीलनभावितत्त्व-
स्त्वौदास्यमेव विदधीत परप्रपञ्चे ॥ ७७ ॥

अजगर इव कश्चित्तिष्ठति ज्ञानिवर्यो
भ्रमति जगति [1]कश्चित् मूढविक्षिप्तकल्पः ॥
इदममृतमवेत्यानाग्रहाद्भूरिरूप-
स्तमिह परिपुनीते [2]वीक्षतेऽनुग्रहाद्यम् ॥ ७८ ॥

तद्वस्तु नास्तिकमपि त्रिजगत्यसभ्यै-
[3]र्यन्निन्द्यते न विविधैर्वचनप्रपञ्चैः ॥
धूलिं विकीर्य वद तेषु ततस्तु तेषां
स्वार्थः पथा भवति येन तमाश्रयेत् ॥ ७९ ॥

पाषाण्डिनो वेदपुराणबाह्या
न तन्मतं धीर उपाश्रयेत् ॥
मतं पुराणं गदितं पुराणे
मयेदमाविष्कृतमत्र काले ॥ ८० ॥

मुण्डो जटिलो नग्नः कौपीनाच्छादनो वापि ॥
ब्रह्मणि कृतावधानो जगत्युदासीह्युदासी स्यात् ॥ ८१ ॥

वर्णाश्रमाभिमानेन शून्याः सन्त उदासिनः ।
ज्ञानान्तरापकर्तृभ्यः कर्मभ्यश्च बहिः स्थिताः ॥ ८२ ॥

अनुद्धतत्त्वं वैराग्यं ज्ञानसम्पादनश्रमः ॥
व्यवहार उदासित्वं मतमेतदुदासिनाम् ॥ ८३ ॥

क्षमा दया च सन्तोषः सर्वत्रेश्वरदर्शनम् ॥
मैत्री च सर्वजीवेषु संन्यासिव्रतमुत्तमम् ॥ ८४ ॥

---

1. उदासिनः परिभाषते परिभाषया यतिपतिः । श्लोक ८१ तः ८४ पर्यन्तम् ।

१. कांन्यः–क० ।

२. पुनीत–क० ।

३. मंनिग–क०

लालेनोक्तं गुरोः सर्वं लक्षणं त्वयि लक्ष्यते ॥
संन्यासिनः कति विधाः कथमेते भवन्ति च ॥ ८५ ॥

नानकेन तदा प्रोक्तं गुरुणा सर्ववेदिना ॥
संन्यासस्य विधिं लाल ! तद्भेदांश्च निशामय ॥ ८६ ॥

नानादुखःप्रचुरं
वियोगदौर्जन्यकैतवप्रायम् ॥
विश्वं नश्वरमवयन्
[1]सन्यस्येज्ञातनिर्वेदः ॥ ८७ ॥

ब्रह्मचारी गृही वानप्रस्थो भिक्षुरिति क्रमः ॥
अक्रमोऽपि विरक्तत्वं यत्र तत्र [2]परिव्रजेत् ॥ ८८ ॥

विप्रस्यैवाधिकारोऽत्र मन्वादिभिरुदाहृतः ॥
त्रैवर्णिकस्य कथितः सूत्रकारादिभिः स तु ॥ ८९ ॥

ऋणानि [3]त्रीण्यपाकृत्य गृहमेधी परिव्रजेत् ।
अधो व्रजत्यन्यथा तु मनुनेदमुदीरितम् ॥ ९० ॥

प्रजापत्यां विधायेष्टिं दत्वा सर्वस्वदक्षिणाम् ॥
एकदण्डी त्रिदण्डी वा भवेदात्माहितानलः ॥ ९१ ॥

यतिपात्राणि मृद्वेणुदार्वलाबूमयानि च ॥
सलिलं शुद्धिरेतेषां गोवालैश्चावघर्षणम् ॥ ९२ ॥

विधूमे सन्नमुलसे व्यङ्गारे भुक्तवज्जने ॥
वृत्ते शरावसम्पाते नित्यं भिक्षां यतिश्चरेत् ॥ ९३ ॥

---

1 कथं कः सन्यस्येदित्यत्र नानक विचारः ॥

2. सन्यासग्रहणे मन्वादीनां विचारः ॥

3 गृहे एव त्रीणि ऋणानि अपाकृत्य परिव्रजेत् इति मनोरमितम् ॥

एककालं चरेद् भिक्षां न प्रसज्जेत विस्तरे ॥
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥ ९४ ॥

न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ॥
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ? ॥ ९५ ॥

वैराग्यतारतम्येन कुटीचकबहूदकौ ॥
हंसः परमहंसश्च यतिरुक्तश्चतुर्विधः ॥ ९६ ॥

ज्ञानसंन्यासिनः केचिद् वेदसंन्यासिनः परे ॥
धर्मसंन्यासिनः केचित् तद्भेदा विविधा मताः ॥ ९७ ॥

उदासीनः साधकश्च नैष्ठिकश्च वनाश्रयः ॥
विरक्तो ज्ञानसंपन्नः सर्वेष्वेतेषु सत्तमः ॥ ९८ ॥

अथ लालेन गदितं सर्वश्रुतमिदं गुरो ?
शास्त्रानुरूपमुदितं परं पृच्छामि किञ्चन ? ९९ ॥

कपालं जाङ्गालं वामं भैरवं पञ्चरात्रकम् ॥
शैवं पाशुपतं हित्वा मतमेतत् किमाश्रयः ? ॥ १००॥

योगी शशंस भृगुणा किल शप्तमेतद्
दक्षाध्वरस्य हरणे हरपार्षदेभ्यः ॥
प्रायः प्रियं किमपि राजसतामसानां
किञ्चिच्च वेदवचसा वचसाविरुद्धम् ॥१०१॥

निस्तीर्य घोरविपदं किल गौतमस्य
मायागवीमकलयन् पुरतो द्विजास्ताः ॥
स्पृष्टाऽमुना म्रियत गोवधदोषमस्य
संकीर्त्य ते निरगमन् धरणीनिलिम्पाः ॥१०२॥

बुध्वा समाधिविधिना कपटं स तेषां
शापं ददौ भवतु वेदविनिर्गमो वः ॥

तेभ्यः शिवो मतमिदं निजगाद रोषाद्
भ्रश्यन्ति येषु विषयामिषमुग्रचित्ताः ॥१०३॥

अविरोधमनुद्धतं च यावत्
तदुदासीनमतं मया प्रदिष्टम् ॥
अमुना प्रचरन्मुकुन्दभक्तो
लभतामंक्षु विमोक्षमक्षजेता ॥१०४॥

आपृच्छ्य तं गतः पश्चात्पक्षके [1]श्वशुरालये ॥
बहिर्ग्रामं स्थितस्तत्र श्वशुरेण श्रुतो यतिः ॥१०५॥
मूलः संतप्तहृदयोऽप्यजितस्य मते स्थितः ॥
श्वशुरस्तस्य भोज्यं च वस्त्राणि च निनाय तम् ॥१०६॥

दृष्ट्वा तदुक्तं यतिनानकेन
यदेशितुः प्रेमरसो निपीतः ॥
क्षुधा तृषा चास्मि तदैव हीन-
स्तापेन पापेन च दुस्त्यजेन ॥१०७॥

भोज्यैरलं नित्यमुपार्जितैर्यै-
र्न दुःसहः शाम्यति जाठराग्निः ॥
यदर्थमुग्रभ्रुकुटीविटङ्कान्
श्रयन्ति धीरा धनिनो विमूढान् ॥१०८॥

जीवन्ति भूतानि कियन्त्यरण्ये
श्रयन्ति किं तानि कुतश्चिदिभ्यान् ॥
हा हा ! हृता मे मनुजा भजन्ति
नित्यं धनाध्मातधियो दुरीशान् ॥१०९॥

१. पक्षकं–क० ।
२. ससंसप्त--क० ।

तं मूलचन्द्रो निजगाद शीतं
प्रवृद्धमेतद्वसनं गृहाण ॥
ऊचे यतीशोऽम्बरमत्युदार-
मीशो ममाङ्गावरणं चकार ॥११०॥

इयं विशालास्तरणं धरित्री
बाहुर्वरीयानुपधानमेषः ॥
फलं जलं वृक्षसरित्सु सिद्धं
सन्तोषसम्पत्तिजुषो न दीनाः ॥१११॥

भुंक्षे न चाच्छादयसे किमर्थ-
मिहागतोऽसीति ? निगद्य मूलः ॥
गतो विषण्णोऽजितमित्यवादी-
दश्वामुपारुह्य स चाजगाम ॥११२॥

अजितः प्रणम्य तमिदं निजगाद
कुरु भोजनं च वसनानि च धत्स्व ॥
वडवामिमां समधिरुध्य गृहाय
चल साधवः परमनाग्रहशीलाः ॥११३॥

विनीतमेनं गुरुरित्युवाच
यत्रैव तिष्ठामि गृहं तदेव ॥
समागमो वः परमश्च लाभः
सम्भाषणं चापि कृतातिथेयी ॥११४॥

मनो हयं तीव्ररयं मदीय-
मारुह्य धावामि दयामयस्य ॥
न तिर्यगूर्ध्वं जलधेश्च मध्ये
हयी त्वदीयाऽजित ? विक्रमेत ॥११५॥

धर्मशालाऽभवत् तत्र दर्शनायागमम् प्रजाः ॥
माममात्रं स्थितस्तस्यां मामिदं न्यगदद्यतिः ॥११६॥

त्वं बालसिन्धो ! वद पक्षकेऽस्मिन्
कियद्दिनानन्तरमागतोऽस्मि ॥
मयोदितं ब्रूहि निजां त्वमेव
गतिं न जानामि तवाप्रवीणः ॥११७॥

स उक्तवान् षोडशहायनेऽह[1]-
मिहागतो दृष्टविचित्रदेशः ॥
[2]मासद्वयानन्तरमित्युवाच
गुरुः कुरुक्षेत्रयियासुचेताः ॥११८॥

सूर्योऽपरागः किल संनिधत्ते
गताः कुरुक्षेत्रमनेकलोकाः ॥
आवां व्रजावस्तदपूर्वतीर्थ-
विलासमीशस्य विलोकयाव ॥११९॥

परममिति मयोक्ते योगिराजो जगाम
सममहमपि तेन प्राप्य तत्तीर्थमग्रम् ॥
विविधमतयतीनां संहतिस्तत्र तत्र
बहुविषयजनानां यात्रिणामैक्षि संघः ॥१२०॥

मामुक्तवान्मानकयोगिवर्यो
हे बालसिन्धो ! शृणु मन्निदेशम् ॥
प्रस्थप्रमाणं त्वमजस्य मांसं
मृत्स्थालिकामानय [3]सापिधानम् ॥१२१॥

---

१. नेऽस्मिन्--क० ।

२. नंतरमेव--क०

३. सापिधानाम्--क० ।

तदानीतं मांसं पचति मयि [1]चुल्ला गुरुगिरा
विरक्ताः सन्यस्ता कति कति गृहस्था न जगदुः ॥
अरे ग्रस्ते सूर्ये पचसि किमिदं जाल्म ? यदमी
जपन्ति स्नान्त्यन्ये ददति विभवं जुह्वति परे ॥१२२॥

नानकस्तानुवाचेदं क्षुधाऽहमतिपीडितः ॥
तत्या [2]पचामि पललं भोक्तुकामः किमुच्यते ? ॥१२३॥

उद्घूर्णयष्टिभिरमीभिरिदं न्यगादि
म्लेच्छोपि नाद्य सहवासगुणेन भुङ्क्ते ॥
त्वं मांसमत्सि यदि नास्तिक ? मारयामः
सर्वे वयं वदसि चेन्न विनिश्चयं स्वम् ॥१२४॥

नानकेन कथितं विनिश्चयो
बुध्यते मम तदा निशम्यताम् ॥
यष्टिभिर्यदि पराचिकीर्षथ
स्वेच्छया कुरुत पूर्वमेव तत् ॥१२५॥

लोकैरुक्तं नास्ति [3]यष्टेः प्रसङ्गो
वाग्भिस्त्वं चेद्बोधयस्यागतान्नः ॥
दूराद् दृष्टो वीतरागो विभासि
ग्रस्ते सूर्ये मांसमश्नासि कस्मात् ? ॥१२६॥

विनोदी नानकोऽब्रूत प्राणत्राणाय सर्वदा ॥
देशकालद्रव्यगतो निषेधो न प्रवर्तते ॥१२७॥

विश्वामित्रेण मुनिना शुनो जघनमीप्सितम् ॥
भोक्तुं श्वपचगेहस्थं निशीथे चौरकर्मणा ॥१२८॥

---

१. कुल्लौ–क० ।
२. च यामि–क० ।
३. पष्टिप्रासङ्ग–क० ।

मांसस्याशुचितां यूयं कथं वदथ धार्मिकाः ? ॥
देवपित्रतिथिप्रेष्ठं तत्परं यज्ञसाधनम् ॥१२९॥

जीवस्य ब्रह्मणो वाऽत्र याऽभिव्यक्तिरुदीर्यते ॥
प्रायशो मांसपिण्डे सा सर्वव्यवहृतिक्षमे ॥१३०॥

जिह्वामांसमयी वक्त्रे[1] तया हरिगुणान् गृणन् ॥
वैकुण्ठपदमाप्नोति यदुपेत्य न शोचति[2] ॥१३१॥

अयाचितं दीयमानं मांसं मत्स्यमबोधतः ॥
निराकरोति यः कश्चित् ? प्रत्यवैति स निश्चितम् ॥१३२॥

अमृतं मांसमश्नाति शिष्टवर्गोऽप्ययन्त्रितः ॥
देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक् ॥१३३॥

शास्त्रोपबृंहिता वाचः शुश्राव सकलो जनः ॥
धर्षितस्तत्प्रभावेण न कश्चित्किञ्चिदुक्तवान् ? ॥१३४॥

तत्रागतः कश्चन बाहुजोऽभूत्
प्रतिष्ठितो भूपतिलेखकेषु ॥
स नानकं वीक्ष्य वहन्नसूयां
द्वेषं दधौ मत्सरतो महान्तम् ॥१३५॥

[1]श्रीकन्दरस्य पुत्रोऽभूद् [2]वीराहम्खाननामकः ॥
इन्द्रप्रस्थे स्थितो देशनाशाज्ज्वलितशासनः ॥१३६॥

तस्योक्तमासीत्पिशुनेन[3] तेन
धरापते ! नानकनामधेयः ॥

1. श्री कन्दरः–सिकन्दर इति भाषायाम् ।
2. आहं खान इन्द्रप्रस्थस्य राजा ।
१. वक्रे–क० ।
२. नशोचिति–क० ।
३. स्पुशनेन–क० ।

विरक्तवेषः खलु बाहुजोऽस्ति
बहुं वहन् प्रव्रजिताऽभिमानम् ॥१३७॥

पाखण्डवर्त्मा [1]कुहकः स सिद्धिं
मूढेषु काञ्चित्प्रकटय्य तृप्तः ॥
[1]आर्यस्य[2] च म्लेच्छगणस्य चापि
शास्त्रं तिरस्कृत्य यथेष्टचेष्टः ॥१३८॥

त्वं वै नियन्ता सकलप्रजाना-
मुन्मार्गगान् साधिकृतापराधान् ॥
नो चेद्यथेच्छाचरणैः प्रवृद्धै-
र्नश्येत्पुराणो यवनार्यमार्गः ॥१३९॥

स बोधितस्तेन विवृद्धमन्यु-
राध्मात एव प्रथमं स्वऋद्ध्या ॥
आज्ञापयद् भो ! यवनांस्तवार्या-
न्निहानय प्रव्रजितान्निगृह्य ॥१४०॥

सिद्धाभासा वञ्चयन्ते धनिनः सरलानि मे ॥
तात्त्विकी यदि सिद्धिः स्यादिह प्रकटयन्तु ते ॥१४१॥

ततस्तु नगराध्यक्षो विचार्यैकत्र संगतान् ॥
कुरुक्षेत्रे प्रव्रजितानाजहार पदातिभिः ॥१४२॥

प्रतिप्रव्रजितं तत्र धुरद्वं कष्टघर्षणम् ॥
खारीमितं च गोधूमं पेष्टुं म्लेच्छनृपो ददौ ॥१४३॥

---

1. आर्यधर्मस्य म्लेच्छधर्मस्य च तिरस्कारं करोतीति भावः ।

१. कुटकः-क० ।

२. आर्धस्य-क० ।

भयेन भूता अपि यान्ति दूरा-
द्भयेन दाण्डाजिनिकोऽपि साधुः ॥
ये भीषयन्ति स्म जनान् स्वशापै-
स्ते सूक्ष्मपेषं पिपिषुर्भयेन ॥१४४॥

नानकस्य घरट्टस्तु स्वयं बभ्राम शक्तितः ॥
गोधूमस्य ततः सूक्ष्मा समिता गमिता क्षितिम् ॥१४५॥

भक्ताधिकारी धनखानकस्य
पूर्वं य आसीत्स च तापसोऽभूत् ॥
स नानकाख्योऽयमिति प्रतीता-
स्तच्छक्तितः सर्वजना जजल्पुः ॥१४६॥

म्लेच्छराजस्तदाकर्ण्य बन्धयामास नानकम् ॥
निगडेन न मोक्तव्य इत्युवाच च रक्षिणः ॥१४७॥

बद्धेऽपि तस्मिन् भ्रमणं घरट्टे
गोधूमसम्पेषणमाकलय्य ॥
म्लेच्छेशमूचुः सुजनाः समग्रा
न नानको बन्धनमर्हतीति ॥१४८॥

न हीदृशप्रव्रजितावमानो
भवेच्छुभोदर्क इतीरितस्तैः ॥
मुमोच भीतो यवनो यतीन्द्रं
स्थितः स तत्रैव विशृङ्खलोऽपि ॥१४९॥

ऊचे नानकतापसः स्मितमुखो माद्यद्गजानां घटा
नृत्यच्चारुतुरङ्ग[1]राजिरतुला दिव्या रथाः पत्तयः ॥

---

१. तुरंग–क० ।

प्रासादाः शशिशुभ्रतुङ्ग[1]शिखराः कान्ताः कुरङ्गेक्षणा
द्वारे काञ्चनदण्डराजितकराः प्रोद्दामदौवारिकाः ॥१५०॥

कारागारमुपाश्रयन्ति शतशो वृद्धा नृपादिद्विषो
गायन्त्यो गणिका हरन्ति हृदयं काव्यैः कवीन्द्रास्तथा ॥
ताम्बूलैश्च सुचर्वितैरविरलं नापैति रागो मुखात्
किं वक्तीत्यवधाय [2]सम्भ्रमपरैर्लालाटिकैः सेवनम् ॥१५१॥

वासो जर्जरचीरचीवरमयं भैक्षैः क्वचिद्भक्षणं
ग्रामे वा नगरे निवीतनिविडारण्ये घटाद्यावृता ॥
कारायां निगडैर्निबध्य विधृतिः सन्ताडनं तर्जनं
केशश्मश्रुनखास्थितेरनशनैरुत्साहतेजःक्षतिः ॥१५२॥

नानकस्य समसेव समग्रं
क्रीडितं तव महेश यदेतत् ॥
योऽस्मि सोऽस्मि लवमप्यनया ते
लीलया पचय मेमिनवर्षे ॥१५३॥

रुणद्धि न त्वामिह कोऽपि गच्छेः
स्वच्छन्दचारी हि भवान् धरायाम् ॥
मयेदमुक्तं गुरुराबभाषे
विलोक्य तां बालविभोश्चरित्रम् ॥१५४॥

अस्माभिर्यदनुष्ठेयं तद्गन्धर्वैरनुष्ठितम् ॥
क्रुद्धैः सिद्धैर्यदारब्धं तद्विधत्त स्वयं विधिः ॥१५५॥

यवनः सप्तभिर्मासैर्दिनैः सप्तभिरेव च ॥
दैवात्स्मरणशेषां हि दशामासादयिष्यति ॥१५६॥

---

१. तुङ्ग–क० ।
२. संभ्रम–क० ।

मया पृष्टं महायोगिन् ? कथमस्य भविष्यति ? ॥
त्रिकालज्ञेन मुनिना नानकेन तदीरितम् ॥१५७॥

उष्णीषैरतिशोभितानि मणिभिर्भास्वन्ति भास्वत् करै-
रस्पृष्टानि सितातपत्रनिबिडच्छायाश्रयात्यप्यलम् ॥
तानि म्लेच्छशिरांसि मुद्गरकरप्रोद्गूर्णकौक्षेयक-
छिन्नानि क्षितिधूलिभिर्विलुलितान्येष्यन्ति लोष्टोपमाम् ॥१५८॥

[I]असूर्यंपश्यानां कुसुमशयनेषु प्रतिदिनं
निषण्णानां[1] यासामविदितगतिर्याति समयः ॥
यवन्यस्तास्त्रुट्यद्विवृतकुचहारा हरि हरि
प्रयास्यन्ति क्षोणौ क्षतचरणपङ्क्त्यां[2] प्रतिपदम् ॥१५९॥

न स्मरन्ति यदमी जनार्दनं
पापतापहरणं हि तं सताम् ॥
आपदः परिभवन्ति तेन तान्
पूर्वपुण्यलवलब्धसम्पदः ॥१६०॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
कुरुक्षेत्रयात्रानाम सप्तदशः प्रस्तावः ॥

—:०:—

I. असूर्यंपश्यानां = राजदाराणाम् यासां समयोऽविदितगतिर्याति ताः क्षतचरणाङ्क्यां क्षोणीं प्रयास्यन्तीति नानकशापः ॥

१. निषस्सानां–क० ।

२. पङ्क्तयाः–क० ।

अष्टादशः प्रस्तावः

वाग्देवता वसतु मे वदनारविन्दे
वर्णैः कृतैः कतिपयैर्विपुलः प्रपञ्चः ॥
यस्या विवृद्धिमधुनापि दधाति पारं
नासादयन्ति सुधियोऽस्य सुधार्णवस्य ॥ १ ॥

पञ्च मासोत्तरं तत्र [1]बाबरेणाभिरक्षिता ॥
सुरत्राणपुरं वव्रे [2]मुद्गलानां महाचमूः ॥ २ ॥

धनखानो हतस्तेन सहयुध्वा यथाबलम् ॥
शलभा इव सर्वत्र मुद्गलाः प्रसृतास्ततः ॥ ३ ॥

स देशानात्मसात्कुर्वन् सप्तमे मासि मुद्गलः ॥
वीराहंखानमुद्दिश्य [3]पानीयप्रस्थमागमत् ॥ ४ ॥

आरूढः कलभानिवातिबलिनस्तुङ्गांस्तुरङ्गान् भटा
दीर्घास्ताम्रमुखा महाशनजुषः प्रत्यन्तदेशोद्भवाः ॥
ते दैत्या इव दुःसहा रणभुवि प्रख्यातसत्पौरुषाः
संक्षुब्धां क्षितिमाचरन्ननिभृतैः स्वैः स्वैरणीकैरलम् ॥ ५ ॥

[4]यवनीर्हर प्रसर धुन्वतीः प्रजा
धनिनश्च दण्डय पुराणि निर्दह ॥

---

1. बाबरः = मुद्गलराजः ॥
2. मुशलः = मुगल इति भाषायाम् ॥
3. पानीयप्रस्थः = पानीपत इति भाषायाम् ॥
4. ५,६ श्लोकयोर्बाबरसैन्यवर्णनम् । अत्रानुकरोति माघं कविः ।

लुलितांश्चकार विषयाननुक्षणं
परिधाविता सपदि मुद्गलावली ॥ ६ ॥

वीराहंखाननामा प्रणिधिनिगदितं तन्निशम्य प्रकोपात्
वाहिन्यः प्रावृषेण्यप्रसभपरिपतच्छोणवेण्येव वीरः ॥
पानीयप्रस्थ एव प्रथितपटुभटध्वाननिर्धूनिताद्रि
प्राग्युद्धक्रुद्धदन्तावलदलिततरुर्बाबरं प्रत्यगृह्णात्[1] ॥ ७ ॥

सेना सा बाबरस्य प्रसभमभिपतच्छत्रुसैन्यप्रकोपा-
त्कल्पान्तोत्तालसिन्धुप्रतिभटगमना सर्वतः संरुरोध ॥
पादातैरश्ववारैरथिभिरथगजैश्छिद्यमाना क्षणेन
क्षोणी धूलीच्छलात्किं शरणमभिययौ.सृष्टिकर्तारमद्धा ॥ ८ ॥

कोणैराहन्यमानाः प्रलयजलधरध्वानधीराश्च भेर्यः
पाणीन् वीरव्रजस्य त्सरुधृतिरभसोल्लासिनश्चक्रुरुग्रान् ॥
धानुष्कैर्धुनितानां शरनिकरकिरां सर्वतः शिञ्जिनीनां
निःस्वानैः सैन्ययोः किं सनसनितदिशां कोऽपि शुश्राव किञ्चित्?
॥ ९ ॥

अश्वारूढैरत्युदात्तस्वरेण
वीणावादैर्गाति शुभ्रं प्रगीतम्[1] ॥
रोमाञ्चाली कञ्चुकं पर्यधूय-
च्छ्रावं श्रावं भीरवश्चापि शूराः ॥ १० ॥

दन्तैर्दन्तावलानां प्रतिगजहननाहुङ्कृतिप्रोद्धुराणां
पादैः पादातसैन्यं नलिनवनमिवापिंषितां भीतिपाति ॥
हस्त्यारोहानुदस्य स्वयमम[2]लजवं धावतामुन्मदानां
संग्रामे चेतनानां ठनठननिनदैः कर्णरन्ध्रान्यरुन्ध ॥ ११ ॥

---

1. ७ श्लोके अहंखानसैन्यवर्णनम् । दृश्यतां स्रग्धरायां वीरो रसः ।

१. गीतम्—ख० २. मलव्र इति—क० ।

प्राचीमरञ्जयद् देव ! उदयन्नेकतो रविः ॥
प्रतीचीमन्यतो वीराश्वक्रुर्लोहितलोहिनीम् ॥ १२ ॥

आज्ञप्ता बाबरेण प्रसभमसिलतापातिना मुद्गलास्ते
धावद्भिर्घोटकैः स्वैर्नरपतिरुरगान्निन्दयन्मर्दयन्तोः
यातायातैरभीक्ष्णं रणरनसरसाच्छस्त्रपातादभीता
ग्रीष्मग्राहा इवाल्पां सरितमरिचमूमाविलाश्वक्रुरुच्चैः ॥ १३ ॥

स्वसैस्तुषारैर्यवनैः पल्लवैश्च तरस्विभिः ॥
मुद्गलाश्चापि दलिता वीराहंखानसेविभिः ॥ १४ ॥

आयाहि प्रहर प्रतीच्छ जगतीं पश्याधुना नश्यसि
त्रस्यस्यत्र विकत्थनं तव वृथा त्वां रे ! करोमि द्विधा ॥
उद्गूर्णासिकराः करालवदना रक्तारुणश्मश्रवो
जल्पन्तो भुवि भीरुभैरवमिति छिन्ना निपेतुः क्षणात् ॥ १५ ॥

आवृते प्रतिपदं रणाङ्गणे
वाजिवारणनरैः परासुभिः ॥
मांसकर्दमनिमग्ननेमयः
निर्न्यिरे न तुरगैः रथाः क्वचित् ? ॥ १६ ॥

लोहितं गलविलोच्चलद्वह-
[1]द्वज्रधार[2]मचिरेण धारयन् ॥
वारियन्त्रमिव तत्र वीचितं
रुण्डमण्डलमदभ्रविभ्रमम् ॥ १७ ॥

---

१. वज्र–क० ।
२. नचिरे–क० ।

[1]छिन्नबाहुचरणाः क्षतोरसो
भिन्नकुक्षि[2]गलितांत्रवल्लयः ॥
देहि मे जलमिति प्रजल्पतो
वीक्षिता गलचलत्कुशासवः ॥ १८ ॥

चीनखड्गविनिपातपातिते
लोहवर्मणि धरां प्रसर्पति ॥
"मं उणेति" रव आर्त आबभौ
किं नु वीरवपुषोऽपि प्रोद्यतः ? ॥ १९ ॥

पताकिनः संपरिरभ्य शिश्यिरे
मृताः पताकादयिता इवोरसा ॥
अवादिनीर्मानवतीरिवानम-
न्निपत्य भेरीर्वत ! वाद्यवादिनः ॥ २० ॥

सैन्यं स्वं समवेक्ष्य विक्षितभटं वीराहमाख्यो बली
वीरैः सादिभिराहतैरनुदिनं सेनां जगाहे रिपोः ॥
[3]मन्थानाद्रिरिवाममन्थ जलधिं घोरं बलं मौद्गलं
नद्यः शोणितमांसकेशकलिला सद्यस्ततः सुस्रुवुः ॥ २१ ॥

खड्गैः खड्गाभिकृन्तत्सु वीरेषु रणरागिषु ॥
स्फुलिङ्गमाला निश्चेरुः क्रोधाग्नीनां कणा इव ॥ २२ ॥

वीराहमाख्येन निकृत्तकण्ठान्
पश्यन् धरायां शतशः स्वयोधान् ॥
सर्वाभिसारेण ससार रोपात्-
संशप्तकीभूय स बाबरस्तम् ॥ २३ ॥

---

१. भिन्न—क० ।
२. तांश्र—क० ।
३. समन्थाद्रि—क० ।

उदरम्भरयः पलैः प्रजानां
प्रधने तत्र ववाशिरे शिवास्ताः ॥
निधनाय जनस्य यन्मखेभ्यो
निरगुः प्रज्वलिता नितान्तमुल्काः ॥ २४ ॥

[1]षडहं समरो बभूव भूयान्
नरनागाश्वविनाशनः समन्तात् ॥
स्ववपूंषि[2] विहाय यत्र शूराः
सुरनारीपरिरंभसान्नमासन् ॥ २५ ॥

सप्तमेऽहनि परं न बाबरो
दुन्दुभिं विजयवानताडयत् ॥
सर्वतः स्वपतिघातदुःखिता-
स्तत्सपत्नवनिता उरांसि च ॥ २६ ॥

[3]वीराऽहंखानकं हत्वा बाबरः शास्ति मेदिनीम् ॥
इन्द्रप्रस्थे बभूवायं घोषो भेरीपुरस्सरः ॥ २७ ॥

इन्द्रप्रस्थे राजसिंहासनस्थो
राज्ञां राजा बाबराख्यो बभूव ॥
तेनाज्ञप्ता रक्षिणः पूर्वबद्धान्
कारागारे स्थापयित्वा ररक्षुः ॥ २८ ॥

भूयो वद्धं नानकं चाहमाख्यं
नीचैर्दृष्ट्वा यन्त्रणां खिन्नचेताः ॥
आपत्तिः किं भुज्यते ? सर्वशक्ते ?
कारागारे चोरवद्रक्षणं ते ॥ २९ ॥

---

१. षडुहं–क० ।
२. वपुषि–क० ।
३. हंखानकं–ख० ।

नानकोऽवददीक्षस्व हरेर्लीलामलौकिकीम्
पुत्रिकाः सूत्रधारस्य वयं कर्तुर्वशे स्थिताः ॥ ३० ॥

दशमस्त्वमसीति शब्दतो
दशमा[1]भावभवान्यपैति च ॥
उपरोहति किन्तु कालतः
शिरसस्ताडनसम्भवो व्रणः ॥ ३१ ॥

सप्तमे दिवसे नीतं भोज्यं भोज्याधिकारिभिः ॥
बाबरस्य पुरो जाताः कृमयो [2]दर्दुरास्तथा ॥ ३२ ॥

आजुहाव ततः क्रोधात्सूदान् पौरोगवं च सः ॥
श्वानः किमेतदित्यूचे ? कोपरक्ततराननः ॥ ३३ ॥

व्यजिज्ञपन् बद्धहस्तास्ते वयं नापराध्नुमः ॥
बाबरोऽब्रूत दृश्यन्ते कृमयो दर्दुराः कथम् ? ॥ ३४ ॥

ओदनस्य च मांसस्य स्थाने किमिदमाहृतम् ? ॥
तैरुक्तं यदि [3]मन्युर्नस्तदा चित्रवधो भवेत् ॥ ३५ ॥

पार्श्वे स्थितो [4]मीरबिलावलाख्यो–
ध्यक्षः स कारागृहरक्षकाणाम् ॥
उवाच बद्धाञ्जलिरेष [5]मन्तु-
र्नैषां क्रियेयं परमेश्वरस्य ॥ ३६ ॥

तं बाबरोऽब्रूत कुतो ब्रवीषि ?
मया न पृष्टोऽसि कथं च वेत्सि ? ॥

१. भावान–ख० ।
२. दुर्दुराः–क० ।
३. जन्युर्न–क० ।
४. लावराख्यः–क० ।
५. भर्तु–क० ।

सोऽब्रूत भृत्येन हि तेन वाच्य-
मपृच्छतेऽपि[1] प्रसभे सुपथ्यम् ॥ ३७ ॥

अहं हि कारागृहरक्षकाणा-
मध्यक्षता भाग्यवतोऽनुजीवी ॥
बद्धो यतिर्नानकनामधेय-
स्तदीश्वरस्यानुमतं न नूनम् ॥ ३८ ॥

ततो बभाषे यवनाधिराजः
स केन बद्धोऽस्ति ? कुतोऽपराधात् ? ॥
तमब्रवीन्मीरगदासनामा[2]
म्लेच्छः पुराध्यक्षतया प्रसिद्धः ॥ ३९ ॥

वीराहमाख्येन धृतास्तु वन्द्यः
कारागृहे सन्ति चिराय रुद्धाः ॥
तन्निग्रहानुग्रहमीश्वरस्त्वं
विचार्य काले न करिष्यसीति ॥ ४० ॥

तन्मध्यपाती यतिरस्ति कश्चित् ?
परीक्षितो नानकनामधेयः ॥
म्लेच्छाधिपोऽभाषत गौरवेण[2]
तमानय त्वं मम संनिधानम् ॥ ४१ ॥

गतो हुसेनो गतशृंखलं त-
मानम्य बद्धाञ्जलिरित्युवाच ॥
उपेहि भूपालगृहं यतीश ?
विलोकितुं वाञ्छति बाबरस्त्वाम् ॥ ४२ ॥

---

१. च्छयते–क० ।
२. मीरगासेन–क० ।

ततो गतो नानकयोगिवर्यो
मया समं बाबरसंनिधानम् ॥
प्रणम्य तेनानुमते दृशैव
स्थितं स पीठे यतिमित्युवाच ॥ ४३ ॥

त्वं जानासि विरक्तनानकजगत्कर्तारमीशं परं
साक्षान्नश्च महंमदं गतगुरुं तच्छक्तिभिर्बृंहितम् ॥
उक्तं नानकतापसेन भगवानीशो मया ज्ञायते
म्लेच्छानां मतदो महंमद इति ख्यातस्तथा देशिकः ॥ ४४ ॥

ईशो जातिगुणक्रिया विरहितो ज्ञानार्णवो मायया
त्रैलोक्यं विदधाति मायिकगुणैर्न स्पृश्यते च स्वयम् ॥
जीवा ये च महंमदप्रभृतयस्ते तद्विलासास्पदं
चेष्टन्त मतमाकलय्य विविधं कल्पादिकालोचितम् ॥ ४५ ॥

अमी अशुद्धाः सकलास्तु जीवाः
शुद्धः सदा केवल ईश एव ॥
गिरं निशम्येति गुरोः स ऊचे
महंमदोऽस्माकमहो अशुद्धः ॥ ४६ ॥

नानकोऽब्रूत सकला जीवाः शुद्धिं न बिभ्रति ॥
क्लेशकर्मविपाकैश्च परामृष्टास्तथाशयैः ॥ ४७ ॥

व्यक्ताव्यक्तज्ञविज्ञानान्मुक्तिः सांख्यैरुदीर्यते ॥
अस्म्यहं प्रकृतेर्भिन्न इति बुद्धौ न शुद्ध्यति ॥ ४८ ॥

सुखं स्वकीयं विषयोपनम्रं
जीवो विदित्वा विषयेषु सक्तः ॥
स्वतालुभेदोद्भवमेव रक्तं
शुष्कास्थिषु श्वेव लिहन् विमूढः ॥ ४९ ॥

यो यः स्त्रियास्तीक्ष्णकटाक्षबाणै-
विंद्धः स शुद्धः कथमस्तु जीवः ? ॥
शुद्धिः स्वरूपे स्थितिरेव मुख्या
वैमुख्यभाजः स्वसुखात्कथं सा ? ॥ ५० ॥

यातायातपरा जीवा अविद्या कामकर्मभिः ॥
महंमदप्रभृतयो विशिष्य त उपासनात् ॥ ५१ ॥

बाबरेण तदा प्रोक्तं दूरे दृष्टिर्निरावृतिः ॥
तव नानक संयाता ततस्त्वं तत्त्ववित्तमः ॥ ५२ ॥

जगाद तं नानकयोगिमुख्यो
दृष्टिर्मदीया तदनुग्रहेण ॥
तमेव पश्यत्यनिशं महेश-
मखण्डमानन्दमनन्तशक्तिम् ॥ ५३ ॥

संस्कारतः स्वप्नविलोकितानां
यथा स्मृतिर्नो सुखदुःखदात्री ॥
तथा भवो भाति विचित्ररूपः
सुखाय दुःखाय न मे समर्थः ॥ ५४ ॥

तं बाबरोऽभाषत मातुलान्या[1]
रसेन पूर्णं चषकं पिबेदम् ॥
एकाग्रतां यन्मनसः करोति
भङ्गां तदङ्गीक्रियते हि सिद्धैः ॥ ५५ ॥

मया चषकमापीतमिति नानकभाषिते ॥
बाबरोऽब्रूत मिथ्येदं कारायास्त्वमिहागतः ॥ ५६ ॥

---

1. ४९,५०,५१ श्लोकेषु नानको बाबरं जीवस्याशुद्धत्वे प्रमाणानि प्रस्तौति ।

बुद्धौ पात्रे ज्ञानदण्डेन गाढ—
मीशप्रेम्णा वारिणा मर्दयित्वा ॥
पूतां कृत्वा देशिकस्योपदेशा—
द्विश्वभ्रान्तिर्मातुलानी निपीता ॥ ५७ ॥

मत्तो मत्तो नाधिकः कश्चिदस्ति ?
नैवा पेयाद्यन्मदोयं मदीयः ॥
रक्ताक्षः सन् कौतुकं तस्य वीक्षे
विक्षिप्तौघो हस्यमानो हसंस्तान् ॥ ५८ ॥

इति नानकस्य वचनं निशामय-
न्निजगाद बाबरधरामरेश्वरः ॥
भगवानभाषत विरज्य विश्वतो
मम भक्तिकृन्मदितरो न बुध्यताम् ॥ ५९ ॥

([1]त्रिभिर्विशेषकम्)

तमब्रवीद्योगिवरो न बाबर ?
त्वमङ्ग ? जानासि नयन्मतं सताम् ॥
तवापि शास्त्रे सदसन्निरूपणं
कृतं कोराने वचनैर्महेशितुः ॥ ६० ॥

न जातिरीशस्य निरूपिता श्रुतौ
न तस्य चार्यो यवनोऽथवा प्रियः ॥
तनुं वहन् कामपि कर्मलम्भितां
भजेत यस्तन्तु स तस्य वल्लभः ॥ ६१ ॥

I. विशेषकेष्वेषु नानकः कोरानस्य श्रुतेश्च महि[illegible]नमावेदयति बाबरम् । कोरानवेदयो-र्नास्ति कश्चिद्भेद इति । यः कश्चित्कोरानं वेदं वा भजेत आर्यो वा यवनो वा स तस्य वल्लभः । आर्यैर्यो हरिः सेव्यते स एव विभिन्ननाम्ना तुरुष्कैरपि ।

आर्यैर्यथारुचितवशेन शिवो गणेशो
गौरीहरिर्नृहरिरित्यभिधैकभिन्नः ॥
ईशः श्रितः फलति हन्त ! तथा तुरुष्कैः
संसेव्यते स हरिरेव विभिन्ननामा ॥ ६२ ॥

अनादिवासनावेशात्संसारोह्यनुशायिनाम् ॥
विपाकः कर्मणां तेषां जात्यायुर्भोगलक्षणः ॥ ६३ ॥

स्वस्वधर्मानुसरणमरागः संसृतोशनैः ॥
अविरोधो हरेर्भक्तिः[1] सर्वेषां मुक्तिकारणम् ॥ ६४ ॥

अपराध्यति जन्मना न कश्चित्
सकलः प्रेमपरो हरौ कृतार्थः ॥
अयमेव सनातनोऽस्ति पन्था
बहुमानेन विमोहितो विनश्येत् ॥ ६५ ॥

ततस्तमूचे यवनाधिराज
आर्येषु न त्वत्सदृशोस्ति कश्चित् ? ॥
दीक्षिष्यते यो भवतो भवेत्स
समस्ततत्त्वाधिगमात्कृतार्थः ॥ ६६ ॥

त्वं नानक ? ग्राममतीव रम्यं
मत्तोऽथवा देशमुरीकुरुष्व ॥
कृताश्रमः प्रव्रजितव्रजस्य
ददस्व भोज्यं वस वीतचिन्तः ॥ ६७ ॥

ऊचे गुरुस्तं मम भालपट्टे
विलिख्य दत्ता विधिना पुरैव ॥

1. अरागः सन् हरेर्भक्तिमुक्तिप्रदा । न कश्चिज्जन्मनाऽपराध्यति यदि स हरौ प्रेमपरोऽस्ति । स हरिरेवासौ कोरानादौ विभिन्ननाम्ना व्यवह्रियते ।

वाभोज्य सम्पन्न ततोऽधिकस्य
लिप्साऽस्ति मे भूप भवादृशेभ्यः ॥ ६८ ॥

ततः प्रणम्य क्षितिपाल ऊचे
प्रतिग्रहो योगिजनस्य नेष्टः ॥
त्वमात्मविश्रान्तिरनावृतासु
यथा विनोदं विजयस्व दिक्षु ॥ ६९ ॥

जगाम नानको योगी पक्षके नगरे पुनः ॥
अजितस्य रधावस्य कूपस्य सविधे स्थितः ॥ ७० ॥

तलवंडीं यियासामि त्वमाज्ञापय मां गुरो ! ॥
मयेत्थमुक्ते सोऽवादीदिहैव स्थीयतामिति ॥ ७१ ॥

अजितः पपात पदयोर्यतिभर्त्तुः
प्रहरं समाधिनिभृतो न स ऊचे ॥
तत उक्तवान् किमिह वाञ्छसि साधो ?
स जगाद वेद न भवान्न मनःस्थम् ॥ ७२ ॥

शशंस योगी तव चारु दैवं
बोलाररायादधिकोह्यभूस्त्वम् ॥
न ज्ञानमस्योदयमच्छतीरे
तवास्तु दृष्टिर्विगताऽपिधाना ॥ ७३ ॥

प्रकाश आसीदजितस्य भूया-
नलभ्यलाभादिव चास्य तोषः ॥
तं सर्वसंसारविकारकारी
न विभ्रमो व्याकुलयाम्बभूव ॥ ७४ ॥

आनीयमानमजितेन विशिष्य भक्त्या
भोज्यं जघास च गुरुः समयद्वयेऽपि ॥

यन्मूलचन्द्रसदनादपयातमन्नं
तन्न स्वयं विरतवर्य उरीचकार ॥ ७५ ॥

चन्दोराज्ञी मूलचन्द्रस्तन्निशम्य सुलक्षणी ॥
तमागता विमनसो मूलचन्द्रोशपद् बहु ॥ ७६ ॥

तूष्णीं स्थितस्तस्य निशम्य तत्तद्
योगी जगादाजित एतदेत्य ॥
किमाक्षिपस्येत मया च मानं
त्वद्भोजनाच्छादनमस्तदोषम् ॥ ७७ ॥

मूलोऽवदत्सविधमेत्य न वक्ति [1]भूङ्क्ते
नानेन मे [2]ग्रहगृहीतहृदा ततोऽर्थः ॥
स्वीये कुटुम्बमधिगच्छतु गच्छतु द्राग्
अस्मादृशामविषयं विषयं तु किञ्चित् ॥ ७८ ॥

श्रीचन्द्रलक्ष्मीचन्द्रौ मे गृहे सन्तु सुलक्षणी
किमर्थं पीडयस्येनमजितेनेति भाषितम् ॥ ७९ ॥

[3]नान्धे वा बधिरेऽमुस्मिन् जीवत्येऽमुतन्न युज्यते ॥
मूलचन्द्रो जगादेहं स्नेहमुज्जीवयन् यतः ॥ ८० ॥

चन्दोराज्ञी ततोऽब्रूत तापसी विनिगद्यसे ॥
भेददृष्टिर्न ते याता कुटुम्बे नास्ति ते दया ॥ ८१ ॥

सुलक्षणी साश्रुरिदं जगाद
स्पृशन्ति हा त्वां न शुचो मदीयाः ॥

---

1. श्लोके मूलेन कृता नानकं प्रति भर्त्सना CF शाकु०–"मुञ्च वैनां गृहाण वा" इत्यनेन कुटुम्बमधिगच्छतु गच्छतु वा द्राक् इत्यस्य ॥

१. भुंक्ते–क० ।

२. ग्रहग्रहीत–क० ।

३. नांध–क० ।

आनन्दयित्री सुतयोर्ननान्दा
मृता ततस्तौ तरुणौ विषण्णौ ॥ ८२ ॥

प्रख्यायते यो जनतासु सिद्धः
कथं स नेष्टे सुतदारपोषे ? ॥
पित्रोरुपालम्भवचांसि साक्षा-
न्नश्रृण्वतीहं तु जिजीविषामि ॥ ८३ ॥
पत्युश्चिरप्रव्रजितस्य तस्य
सहस्थितिं प्रव्रजिता भव त्वम् ॥
प्रजावतीनामिति सस्मितानां
दुरुक्तिसूची हृदयं भिनन्ति ॥ ८४ ॥

आकलय्य करुणास्तु तद्गिरः
सूरतो यतिपतिर्जगाविदम् ॥
रामदासि ! यदि तत्र दूयसे
तिष्ठ मत्सविध एव शान्तियुक् ॥ ८५ ॥

इदं वचो योगिपतेर्निशम्य
सुलक्षणी प्रीतिमतीव लेभे ॥
नासत्यरम्यौ तनयौ स्वकीयौ
पत्युः पदाब्जे प्रणतौ चकार ॥ ८६ ॥

श्रीचन्द्रलक्ष्मीचन्द्रौ तौ नानकस्यान्तिके स्थितौ ॥
पद्मोद्भवस्य देवस्य कुबेरवरुणौ यथा ॥ ८७ ॥

नवमासोत्तरं तत्र[1] रघावो व्यूढसंज्ञकः ॥
अकस्माचारयंश्छागान[2] रागान्नानकसन्निधौ ॥ ८८ ॥

---

१. रघावी–ख० ।
रघावी–क० ।
२. छागा–क०

गुरोर्निदेशेन तमाह्वयं स
कूपस्य पार्श्वस्थममुं जगाम ॥
पप्रच्छ योगी वद कोऽसि ? सौम्य ?
प्रगल्भबुद्धिः स जगाद बालः ॥ ८९ ॥

व्यूढाभिधः सिन्धुरधावपुत्रः
तिष्ठाम्यहं तापस ? नातिदूरे ॥
आहूतवान्मां किमपेक्ष्य कार्यं ?
यतिर्जगादाथ जगद्गतिज्ञः ॥ ९० ॥

कार्यं विना नाह्वयतीह कश्चि-
त्तच्चापि कार्यं तव भास्यतीति ॥
विसर्जितस्तेन जगाम बालो
योगीश्वरोऽवादि मया तदेदम् ॥ ९१ ॥

अयं किमर्थं भवतानुयुक्तः ?
संस्कारवांश्चेत्किमु वेत्ति नार्थम् ॥
तेनोक्तमेषो नु जिघृक्षितो मे
जन्मान्तरोपार्जितसाधनत्वात् ॥ ९२ ॥

नासीत्प्रकाशो मनसो न वेत्ति
तेनायमर्थं[1] परमं स्वकीयम् ॥
श्वो [2]ज्ञास्यति ध्वस्तसमस्तमोहो
मोहो भवो योऽप्यभवो द्वयं तत् ॥ ९३ ॥

अन्येद्युरागत्य गुरोः पुरोऽसौ
दधार भक्त्या घृतपूर्णपात्रम् ॥

---

1. मर्थः–क० ।
2. यास्यति–क० ।

ननाम साष्टाङ्गमदर्शि तस्मिन्
ननाम मालिन्यमबोधवृद्धम् ॥ ९४ ॥

तमुक्तवान् योगिवरः किमर्थ- ?
माज्यं त्वया प्राज्यमनायि सौम्य ? ॥
बालेन निह्नुय हृते पदार्थे
पित्रोः प्रकोपो भवति प्रभूतः ॥ ९५ ॥

स्नेहं नय स्नेहमहन्तवेह
गुरोर्गिरेति प्ररुरोद बालः ॥
बालः कुतो रोदिति ? बाल पश्य
मया न किञ्चित्परुषं प्रयुक्तम् ॥ ९६ ॥

मामेवमूचे गुरुनानकोह-
मवादिषं कः परुषप्रसङ्गः ? ॥
आहूय सम्भाषित एष धन्य-
स्त्वया कृतार्थी करणाय नूनम् ॥ ९७ ॥

बालस्तदोवाच न बाल ? वेत्सि
प्रज्वाल्य निर्वापयति प्रदीपम् ॥
गुरुस्तदस्यौपयिकं किमेत—
ज्जनानुकम्पा रसरञ्जितस्य ॥ ९८ ॥

किमेष वक्तीति ? गुरुर्बभाषे
मयोदितं ते चरितं त्वमेव ॥
जानासि नान्यः परमेश्वरस्य
त्वं कश्चिदंशः परमेश्वरो वा ॥ ९९ ॥

तवेहितं त्वद्गदितं च वेत्तु-
मपेक्षिता काचन शेमुखी यत् ॥

गुरुः पुनर्व्यूढमिदं जगाद
त्वं सिद्धिमापः सुजनैरपेक्ष्याम्[1] ॥१००॥
स्नानं निशं[2] पश्चिमयाम एव
कुरुष्व नामानि वदस्व विष्णोः ॥
कुर्युः कृतार्था अपि कर्मनित्य-
मनुग्रहार्थं जगतीजनस्य ॥१०१॥

व्यूढेन भाषितमहं तव दर्शनेन
जन्मान्तरोऽस्य सुकृताधिगते न धन्यः ॥
सन्दर्शितो हि भवता भवतापहारी
हारी हरिः कृतधियामपि दुर्विभाव्यः ॥१०२॥

इत्थं व्यूढः कृतः साधुर्जगाम भवनं निजम् ॥
मध्ये मध्ये समागम्य यतीशसविधेऽवसत् ॥१०३॥
दग्धो म्लेच्छो दीक्षितश्चेति कर्म
श्रुत्वा दूरान्नानकस्यातिरुष्टः ॥
तक्षा म्लेच्छः पण्डितो म्लेच्छशास्त्रे
मालो नामागत्य गर्वाज्जगाद ॥१०४॥
दग्धो नानकतापसा यदुतरे[3] म्लेच्छस्त्वयेति श्रुतं
म्लेच्छं किञ्च करोषि शिष्यमिति ते धाष्टर्यं क्वचिद्विश्रुतम् ?
इन्द्रप्रस्थपतेस्तुरुष्कनृपतेस्तद्धर्मवक्तुस्तथा
तच्छास्त्रैकविचारचुञ्चुरधियां भीतिर्न ते काचन ? ॥१०५॥

नानकेन तदा प्रोक्तं स्वस्थस्त्वं शृणु वर्द्धके ? ॥
भीतिर्द्वितीयाद्भवति न तं पश्यामि कञ्चन ?१०६॥

---

१. पेक्षाम्—क० ।
२. निशि—क० ।
३. यदसरे—क ÷ ख० ।

नवसप्तचतुर्दशत्रिवेदा
इति भेदा निजलीलया प्रयुक्ताः ॥
ननु दीपचतुष्टयात्प्रवृत्ति
कलिता ते न किलैकके न लोके ॥१०७॥

धर्माधर्मविभेदात्
कर्मफलं यो न यो विविधः ॥
नट इव नानावेषं
स एव धर्ता ध्रुवं नान्यः ॥१०८

अस्माकं ज्ञानदृष्टिर्या स्वच्छा सा त्वेकदर्शिनी ॥
स हस्तदर्श आदर्शो ह्यबोधोऽदूरदर्शिनाम् ॥१०९

घटमठमणिकनिवेशा-
दल्पमहत्त्वादिभानेऽपि ॥
नभसो न भेदमाहु-
र्जीवस्यैवं विवेक्तारः ॥११०॥

तक्ष्णा तीक्ष्णस्वभावेन पुनर्विप्रतिपादितम् ॥
यद्यसत्यमिदं सर्वमार्यम्लेच्छभिदा कुतः ? ॥१११॥

नानकेन तदा प्रोक्तं चलन्त्या नाविके स्थिताः ॥
ते सत्यं हन्त पश्यन्ति चलतस्तीरभूरुहान् ॥११२॥

ज्ञानिनोऽपि ध्रुवं भेदं वदन्त्यज्ञानिमण्डले ॥
समाजे खलु विख्यानां नासिकावान्न हस्यते ॥११३॥

आविद्यकैर्भवति हन्त ! यतः पदार्थैः
सर्वा क्रिया न तु चितासदृशाम्बरेण ॥
ते भेदभाज उदिता गुणतारतम्याद्
बोद्धाऽपि तद्व्यवहरत्यबुधेन तुल्यम् ॥११४॥

[1]लोकसङ्ग्रहपरा विवेकिनः
कुत्रचिद् व्यवहरन्ति लोकवत् ?
कुत्रचित्त्वधिगतेश्वरे हिता-
[2]स्तद्विलक्षणमुपाचरन्ति च ॥११५॥

न भेदश्चैतन्ये शशमशकमार्जारमृगगे
तदार्ये म्लेच्छे वा सममिति न विद्वेषविषयः ॥
गुणैर्ब्रह्मा विष्णुः शिव इति भिदा न स्वरसतो
न पुत्राद्यैर्भिन्नो भवति खलु तातादिकथनात् ॥११६॥

मालः पपात पदयोर्यतिनानकस्य
प्रोवाच मे गुरुरसि त्वमहन्तु शिष्यः ॥
आर्यस्तथैव यवनः स्वमहत्त्वशंसी
श्रेष्ठस्तयोः क इह ? वानृतवादिनौ द्वौ ॥११७॥

ऊचे गुरुर्गरिमकारणमामनन्ति
लोके स्वजातिमखिला महतोऽभिमानात् ॥
मन्ये मुकुन्दपदयोरनुराग एव
म्लेच्छस्य चार्यनिवहस्य महत्त्वहेतुः ॥११८॥

जातः श्रुतिश्रवणतोप्यपरोक्षबोधो
सम्भावना दिवि हतोऽनुपजातकल्पः ॥
प्रत्यक्षमेतमपहन्तुमपेतशङ्कं
विश्वत्रयं बहुजनुर्जटिलं पटुर्न ॥११९॥

तस्माद्य एव जगदीशपदारविन्दे
चेतः समर्पयति तस्य मनो विशुद्धिः ॥

---

१. संग्रह–क० ।
२. चटंति–क० ।

बोधो विमुक्तिरचिरेण स एव धन्यो
मान्यो द्विजो भवतु कश्चन पुष्कसो वा ॥१२०॥

¹शेषमालः पुनरिदं नमन् नानकमब्रवीत् ॥
सत्यप्रेमा मुकुन्दो यः कीदृशः स ? नरो गुरो ? ॥१२१॥

तं नानकोऽथ निजगाद न हर्षशोका-
वाविद्यकैः प्रभवतो विषयैरमुष्य ॥
ईशे रतो भवसुखाद्विरतो नितान्तं
धत्ते क्वचिन्न सुजनो ममतामहंताम् ॥१२२॥

दयां जीवेषु कुर्वन्ति मानयन्ति च तान् सदा ॥
ईशं पश्यन्ति सर्वत्र गोविन्दशरणा जनाः ॥१२३॥

इति श्रुत्वा शेषमालो नानकस्य पदाब्जयोः ॥
विधाय स्वशिरो भक्त्या जगाम निजमन्दिरे ॥१२४॥

शेषमालसुहृत्कश्चिदुवारेखाननामकः ॥
मित्रात्प्रशंसामाकर्ण्य नानकं द्रष्टुमागतः ॥१२५॥

प्रणम्य तेनोक्तमये ? तपस्विन् ?
म्लेच्छोऽसि वार्षस्य मते स्थितोऽसि ॥
गुरुस्तमाचष्ट सितासिताभ्यां
न कञ्चुकाभ्यां पुरुषो विभिन्नः ॥१२६॥

पक्षी स्वगत्या च पशुः स्वगत्या
नरः स्वगत्या च सरः प्रपद्य ॥
तोयं पिबेत् तृप्तिमपि प्रयाया-
न्नागच्छतः कस्यचिदस्ति तृप्तिः ॥१२७॥

1. शेषमालः = स एव पूर्वोक्तो मालो यो जात्या शेषपुष्कस आसीत् ।

मायामयेन वपुषा पिहितोऽयमात्मा
त्रैवर्णिकोस्मि वृषलोस्मि च पुष्कसोस्मि ॥
स्वप्नानिमाननुभवन्ननु नामदाहं
स्वीयैः कृतं निखननं क्वचिदभ्युपैति ॥१२८॥

आच्छादयन् बृहतिकामसितां सितां वा
चित्रां विचित्ररचनामथवा [1]पिशङ्गीम् ॥
बध्वा गले गुरुशिलां किमुपैति पारं
नावं दृढामभिगतः किमु मज्जतीह ॥ १२६॥

स्वेन स्वेनैव शास्त्रेण [2]स्वस्वेन गुरुणा तथा ॥
आर्यश्च यवनश्चैव स्वकृतेन हरिं व्रजेत् ॥१३०॥

अतो विशेषे मम नाभिमानो
भक्तोऽस्मि रामस्य रमाश्रयस्य ॥
भ्रान्ताः स्वकार्ये कलहायमाना
नाना मताडम्बरवाग्विडम्बैः ॥१३१॥

उवारेखानस्तद्गिरमुपनिशम्येदमगद-
च्छुतो [i]यादृक् [2]तादृक् त्वमसि मम ताः क्वापि ममताः
गताः पादौ वन्दे तव च परिचुम्बामि सततं
न सन्देहो देहो मम शुचिरभून्मानसमपि ॥१३२॥

---

1 उवारेखानं प्रति प्रतिपादितस्योपदेशस्य सारांशः ।
i सितासिताभ्यां कञ्चुकाभ्यां न भवति भेदः पुरुषे ।
ii नरः पशुः पक्षी च सरो गत्वा तदेव तोयं पिबन्ति ।
iii वर्णभेदो बाह्यः ।
iv स्वस्वेनैव शास्त्रेणार्यो यवनश्च हरिं व्रजति ।
v नानामतैः कलहायमाना भ्रान्ता भवन्ति ।

१. पिशङ्गीम्–क० ।
२. शास्त्रेण–क० ।

यियासुमापृच्छ्य[1] तमब्रवीद्गुरु-
र्यते ? यवागूमुररीकुरुष्व भो ? ॥
स उक्तवान्मामनयः कृतार्थतां
कथं यवाग्वैव तवोपकारिता ? ॥१३३॥

व्यलोकि साक्षाज्जगदीश्वरो मया
मलीमसत्वं मनसो गतं मम ॥
कुरुष्व वात्सल्यमितो व्रजाम्यहं
विलोकयिष्ये चारणाम्बुजं पुनः १३४॥

तं नानको निगदति स्म दयैव विष्णो-
र्द्वारान्तरेण स्वजनेषु फलानि सूते ॥
जन्मान्तरेषु सुकृतानि कृतान्यकस्मा-
त्सन्दर्शयन्ति सुरसिद्धमहौषधादि ॥१३५॥

चक्रे प्रशंसां यतिपुङ्गवस्य
गतस्ततः स्वस्य निकेतनं सः ॥
निशम्य [2]तच्चादरमाननाम
क्रोधादिदं [3]म्लेच्छयतिर्जगाद ॥१३६॥

अयवनस्य कुतः क्रियते स्तुतिः ?
परमतत्त्वमसंस्पृशतः सदा ॥
उपलपूजनमस्य परं मतं
तदपि मुक्तमनेन विचेतसा ॥१३७॥

१. पृछ—क० ।
२. ततदादर—क० ।
३. मेलछ—क० ।

उबारेखान इत्यूचे यवनायवनत्वतः ॥
नाभिमानः स्पृशत्येनं लीनमीश्वरचिन्तने ॥१३८॥

शेष आदरमानाख्य एतदाख्यदतः परम् ॥
उत्सारयेयं तं स्थानात्किं गुरुः ? क्रियतेऽल्पकः ॥१३९॥

उबारेखान ऊचे तं तमीश्वरमसंवृतम् ॥
जानामि कस्य वा शक्तिरीश्वरो सारणो भवेत् ? ॥१४०॥

अन्तः सन्तापबहुलश्चुकोपादरमानकः ॥
न किञ्चिदूचे विस्पष्टमुबारेखानगौरवात् ॥१४१॥

अतिसूक्ष्मतरं वस्त्रमुबारेखाननामकः ॥
अन्येद्युरागत्य गुरोरर्पयामास पादयोः ॥१४२॥

ऊचे यतिस्त्रिभुवनस्य पतिः प्रसीदेद्—
वस्त्रं किमेतदुपनीतमतीव रम्यम् ? ॥
जानासि चीरवसना वनवासिनः स्मो
राज्ञामिदं समुचितं सुतरां महार्घम् ॥१४३॥

उबारेखान ऊचे तं [1]राजराजोसि वेश्वरः ? ॥
त्वत्कृपात इदं लब्धं तुभ्यमेव निवेदितम् ॥१४४॥

तदेव सद्वस्तुफलेन युक्तं
यदर्पितं साधुजनाय भक्त्या ॥
नश्यन्ति वस्तूनि सुरक्षितानि
देहानि गेहानि धनानि धीमन् ? ॥१४५॥

नेदं यदि स्वीक्रियसे मदीयं
तदा न नूनं मयि वत्सलस्त्वम् ॥

---

१. राजोथवेश्वरः–क० ।

क्षमेत मे केन महापराधान्
अनेकजन्मोपचितान्महेशः ॥१४६॥

इति प्रार्थयमानेऽस्मिन्नमस्यति पदाम्बुजे ॥
स्वीकृत्य नानको योगी मामुवाच पुरः स्थितम् ॥१४७॥

तुन्नवायमितस्तूर्णं भ्रातर्बाल ? समाह्वय[1] ॥
अस्य वस्त्रस्य कर्तव्यौ प्रवाररुचिरौ[2] यतः ॥१४८॥

ओमित्युक्त्वा गतोऽहञ्च तुन्नवायमुपानयम् ॥
तस्मै प्रणमते वस्त्रं निरदिक्षद्दिशा गुरुः ॥१४९॥

द्वात्रिंशत्करदीर्घं
करद्वयीमेय[1] विस्तारम् ॥
रूपकषोडशसत्या
वस्त्रमिदं लभ्यते सभ्य ? ॥१५०॥

कुर्यां किमस्य ? योगिन् ?
इति परिमायाऽनुपूज्यते तस्मै ॥
[2]प्रावारौ कुरु रुचिरा-
विति यतिराजेन भाषितो भूयः ॥१५१॥

वस्ते वस्त्रमिदं साक्षादीश्वरः कृपया मम ॥
अद्य जाताः कृतार्थोऽहमुबारेखान उक्तवान् ॥१५२॥

नानकेन तदा प्रोक्तं शेष आदरमानकः ॥
यद्यज्जगाद तद् ब्रूहि निःशङ्कं नावशेषय ॥१५३॥

---

1. ३२ हाथ लम्बाई + २ हाथ चौड़ाई इति भाषायाम् ॥
2. रुचिरौ प्रावारौ = खण्डौ ।

१. समाहूय–ख० ।
२. प्रावादौ तु–क० ।

अनिच्छतापि तद्वाक्यं वक्तुं प्रत्यक्षमप्रियम् ॥
उवारेखाननाम्नेदमवादि गुरुगौरवात् ॥१५४॥

जानासि सर्वं किल सर्ववेदिन् ?
तवास्ति लोकेऽविदितो न किञ्चित् ? ॥
धत्ते स तु प्रव्रजिताभिमानं
न कामये प्रव्रजितस्य चर्याम् ॥१५५॥

माया कृतं ते स्तवनं निशम्य
स उक्तवान् किं यवनेतरस्य
स्तुतिं करोषीति ? तदा मयोक्तं
स्पृशत्यमुं कश्चन नाभिमानः ॥१५६॥

प्रकुप्यते नेदमवादि देशा—
दुत्सारयेयं सहसा ततस्तम् ॥
प्रौढिं तदीयामसहिष्णुराख्य-
मुत्सारयेदीश्वरमत्र को वा ? ॥१५७॥

निशम्य नानकेनोक्तं बालसिन्धो ? व्रजाव भोः ? ॥
द्रष्टुमादरमानस्य शक्तिमुत्सारणक्षमा ॥१५८॥

उवारेखाननाम्नोक्तं यास्याम्यहमपि प्रभो ? ॥
नानकेन तदा प्रोक्तं त्वमस्मत्तः[१] पुरो व्रज ॥ १५९ ॥

यतिर्नोचेद्विजानीयाज्जेतुमानीतवानमुम् ॥
तेनोक्तं किं भयं तस्य नानकः पुनरब्रवीत् ॥१६०॥

1. श्लो० १५६ तः १५७ यावत् नानकं प्रति आदरमानकृता समालोचना वर्तते ।
१. स्मन्तः—क० ।

न भयं यतिवेषस्य[1] परं मान्यत्वकारणम् ॥
स ऊचे धर्ममर्यादामीदृशीं पालयेद्भवान् ॥१६१॥

ततो गतो नानकयोगिमुख्यः
स निर्गतोभूच्छिविकाधिरूढः ॥
तस्यानुगैरुक्तमुपैत्ययं त्वां
यो नानकाख्यः प्रथितस्तपस्वी ॥१६२॥

अथादरादादरमाननामा
पथि स्थितो मृदवदरुह्य[2] यानात् ॥
स्वपाणिना पाणिममुष्य धृत्वा
तं पर्यपृच्छत्कुशलं प्रसन्नः ॥१६३॥

योगी जगाद कुशलार्थमुदस्य सर्वं
भ्राम्यन्ति वीतममतायतयः पृथिव्याम् ॥
तेषां भवेदकुशलस्य तु[3] कः प्रसङ्ग
उत्सारणादकुशलं भवतः परं स्यात् ॥१६४॥

कस्मिंश्चिबद्धममतोस्ति[4] भवान् प्रदेशे
तस्माज्झटित्यपसराम वयं वराकाः ॥
देहेपि नैव ममतेति यतीश्वराणा-
माकर्णिता तु सुचिरं[5] महिमप्रशंसा ॥१६५॥

स व्रीडित इवावोचत्कस्त्वामुत्सारयेद् यते ! ॥
केनेदमुक्तमज्ञेन ? विरोधं नौ विधित्सता ॥१६६॥

१. वंषस्तु–क० ।
२. अरुह्य–क० ।
३. नुकः–क० ।
४. वद्धमतोस्ति–क० ।
५. महिमा–क० ।

उबारेखानकेनोक्तं त्वयैवोक्तमिदं वचः ॥
ते नु कं[1] नरकं यान्ति वदन्त्यपलपन्ति ये ॥१६७॥

आदरमानोऽगादीत्प्रव्रजितोहश्च नानकश्चैव ॥
मध्येऽनयोर्निपाते न तव गृहस्थस्य देशरूपः स्यात् ॥१६८॥

शिष्योऽहं सर्वथा जातो नानकस्य तपस्विनः ॥
शृणुयां किमु ! तन्निन्दामुबारेखान उक्तवान् ॥१६९॥

उबारेखानमाचख्यौ नानकः शृणु सन्मते ? ॥
अयं प्रव्रजितो ब्रूते कां वार्तां साधुसम्मताम् ? ॥१७०॥

पप्रच्छ नानकमथादरमाननामा
त्वं ब्रूहि कोऽसि यवनो यवनेऽतरो वा ॥
ऊचे स नास्मि यवनो यवनेतरो वा
शुद्धाचिदस्मि महतस्तमसः परस्तात् ॥१७१॥

आगृह्य सौम्य ? यवनो यवनेतरो वा
कुर्वन्ति हन्त ! कलहं न विदन्ति तत्त्वम् ॥
यो मार्ग एव विवदे स न याति कश्चित् ?
देशं गमिष्यति कथं स सुदूरमिष्टम् ॥१७२॥

ममतामपहाय सर्वतः-
कतमेनापि ? यजेत वर्त्मना ॥
जगदीश ? मुदस्य नश्वरं
भवमज्ञानघनं विमुच्यते ॥१७३॥

आदरमानो पृच्छन्नानक तव किं मतं ब्रूहि ? ॥
आकर्णय मतमेतन्मदीयमिति नानकोऽब्रूत ॥१७४॥

---

१. नर्क–क० ।

सत्यं मतं मम न कश्चन संशयोऽत्र ?
कर्ताखिलस्य जगतो जगदीश एकः ॥
स ह्यूर्णनाभ[1] इव तं तु स्वयं स्वतन्त्रो
विश्वं वमत्यथ च संहरति स्वशक्त्या ॥१७५॥

मायामयं धनकुटुम्बगृहादिमिथ्य।
मत्वा न तत्र नितरां ममतामुपेयात् ॥
सत्ये सुखे भगवति स्वगतो निवेश्य
तद्भेदतोऽधिगतमाधिमुदस्य नन्देत् ॥१७६॥

स्वप्नोपमैः सुतसुहृल्ललनादिपाशै-
रावेष्टितः खलु विचेष्टित उज्झितश्रीः ॥
निर्भिद्य पञ्जरमिव स्वबलान्मृगेन्द्रो
दुर्वासनातिगहनं विहरेत धीरः ॥१७७॥

शेष आदरमानाख्य आचख्यौ नानकं पुनः ॥
ये प्रियाः परमेशस्य तेपि किञ्चिन्नते मते ॥१७८॥
नानको निजगादेदं ये प्रियाः परमेशितुः ॥
परमेशः प्रियस्तेषां तदेव तु सुदुष्करम् ॥१७९॥
पश्यन्ति ये नमस्यन्ति सर्वत्र जगदीश्वरम् ॥
ते प्रिया जगदीशस्य जगदीशश्च तत्प्रियः ॥१८०॥

आडम्बरैरलमलं गमकैर्विरक्तै
वैराग्यवाग्भिरनिशं परमोहिनीभिः ॥
तुच्छं प्रपञ्चमवधीर्यदधीतधीरो
भावं परे महसि साक्षिणि सत्यमद्ध ॥१८१॥

---

1. श्लो० १७४ त १८१ पर्यन्तं नानकथतवर्णनम् यच्छ्रुत्वादरमानश्चकितचकितः संजातः ॥

१. नाम–क० ।

आदरमानेनोक्तं
तव दूरे दृष्टिरापतिता ॥
विजगाद नानकगुरुः
दृष्टिर्मे पश्यतीश्वरं सत्यम् ॥१८२॥

ज्ञानस्य शास्त्रस्य समागमस्य
सतां विरक्तेस्तपसः[1] फलं हि ॥
उपेक्षणं प्राकृतविभ्रमेषु
निरन्तरं तत्परता परेशे ॥१८३॥

[2]अहन्ताममते त्यक्त्वा देवं वेत्ति यथा यथा ॥
तथा तथा क्षीणमलः स एव भवति ध्रुवम् ॥१८४॥

आदरमान उवाच यतीशं
नानक ते दयते स्म परेशः ॥
दर्शनमस्तु सदा भवदीयं
पादसरोजयुगं तव वन्दे ॥१८५॥

क्षमस्व [3]मां तून्मनसं तु नित्यं
दयादृशस्ते मयि दासभूते ॥
उवाच योगी नहि कोऽपि मन्तु-
र्जन्तुः क्वचिन्नोज्झितकर्मतन्तुः ॥१८६॥

अनित्यमेतत्कलयस्व नित्यं
ततो न तस्मिन्ममतां बधान ॥

---

१. तपसा—क० ।
२. अहंता—क० ।
३. मन्तून्मन—क० ।
४. न्नेज्झित—क० ।

दधान ईशे सहजानुरागं
पत्युस्त्रिलोक्याः परमप्रियः स्याः ॥१८७॥

न द्वारि दौवारिकलोकरुद्धा
प्रवेशमिन्द्रादिसुरा लभन्ते ॥
तथापि भक्तस्य भवादृशस्य
विज्ञप्तिपत्रं भगवान् शृणोति ॥१८८॥

न विस्मरन्ति ये विष्णुं क्षणमप्यनुरागिणः ॥
क्षणार्धमपि तान् देवो वशीभूतो न विस्मरेत् ॥१८९॥

शेषो बभाषे योगीन्द्रं सर्वं सत्यमुदीर्यते ॥
उबारेखान आह स्म त्वमस्योत्सारणापरः ॥१९०॥

तमब्रवीदादरमानशेष
एष प्रतीतो न मया विशेषः ॥
आर्यो यथैवोपलपूजकोऽन्यो
वन्योयमप्येवमये ! मृगः स्यात् ॥१९१॥

परावरज्ञाननिधिः परेशे
प्रेम्णा प्रकृष्टेन परिप्रपञ्चात् ॥
नूनं जनोद्धारकरोऽतीर्णो
योगी प्रसीदेन्मम नानकाख्यः ॥१९२॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायामजिताद्युद्धारो नामाष्टादशः प्रस्तावः ॥

—:०:—

एकोनविंशः प्रस्तावः

सा लेखनी कमलकान्तकराग्रसद्यात्
पद्मासनस्य दयितामपि भक्तिनम्रे ॥
शास्त्राभिधं व्यवहितेपि च विप्रकृष्टे
चक्षुर्ययोपजनितं क्रमते जनस्य ॥ १ ॥

ततो जगाम योगीन्द्र उवारेखानतुष्टये ॥
दिनद्वयं गृहे तस्य तस्थौ भक्त्या सभाजितः ॥ २ ॥

पक्षके च गतः साध्व्या[1] सुलक्षण्याभिवीक्षितः ॥
अल्पेष्वहस्वतीतेषु मामुवाचेदमुग्रधीः ॥ २ ॥

अस्ति कश्चिज्जलालाख्यो यवनो यतिरुत्तमः ॥
तं विलोकितुमिच्छामि चल बाल ? विनोदतः ॥ ४ ॥

"ओं" इत्युक्ते [१]मयाऽयासीत् सस्नौ सरिति कुत्रचित् ॥
रात्रिशेषे सैन्धवश्च यवनः स्नानमातनोत् ॥ ५ ॥

गुरोश्च जगदीशस्य स्मरणस्य प्रसङ्गतः ॥
इदं जगाद योगीन्द्रो भक्तिप्रेमरसालसः ॥ ६ ॥

नादो गुरुमुखश्चैव वेदो गुरुमुखस्तथा ॥
ईशो गुरुमुखश्चैव गोरक्षस्तादृशो मतः ॥ ७ ॥

ब्रह्मा गुरुमुखश्चैव पार्वती तादृशी मता ॥
यो दुर्ज्ञेयो दुर्निरूपस्तं गुरुः परिबोधयेत् ॥ ८ ॥

---

1. मार्गे सैन्धवो नाम यवनो रात्रौ स्नाति स्म तं दृष्ट्वा यतिस्तं श्लो० ६ तः ११ पर्यन्तं गुरोर्विषये गुरुमुखस्य च विषये कियतः प्रश्नानश्रावयत् ।

१. मय्यायासीत्–ख० ।

तीर्थप्रभावो गुरुबोधनीयः
कर्माणि नानाफलदायकानि ॥
चिन्तामणिश्चान्तरचिन्त्यमानः
फलेद्यथेष्टं गुरुणोपदिष्टः ॥ ९ ॥

ब्रह्माण्डभेदेन [1]चयेन क्लृप्ता
आकाशपातालभिदा असंख्याः ॥
स ईश्वरः सर्वसुरद्रुमो[2] मे
न विस्मृतः स्याद् गुरुणोपदिष्टः ॥ १० ॥

[I]वेदैः पुराणैरितरैः स्वबुद्ध्या[3]
विकल्पितैर्वादमयैश्च शास्त्रैः ॥
सहस्रधा तं परिवर्णयन्तु
गुरोर्ममोक्तो जगदीश एकः ॥ ११ ॥

इदं श्रुत्वा सैन्धवः स म्लेच्छः क्रुध्यन्विनिर्गतः ॥
किं विलम्बितमित्युक्तो गुरुणा तमभाषत ॥ १२ ॥

नद्यां स्नान् यवनेतरो यतिरभूत्तेन प्रलापः कृतः
पातालानि च [5]तान्यनन्तमखिलं देवाश्च शास्त्राणि च ॥
त्वत्प्रोक्तास्तु चतुर्दशैव मम तच्छ्रुत्वाऽभवद्विस्मय-
स्तस्याचार्य उवाच याहि यतिनं शीघ्रं तमाकारय ॥१३॥

I. नानकमते पातालानि, देवाः, शास्त्राणि च असंख्यानि । जलालमते चतुर्दश एव । इति सैन्धवस्य हृदये विसंवादः संजातः ।

१. च येन–क० ।

२. द्रुसो–क० ।

३. बुध्या–क० ।

४. परमाय–क०

५. खान्व–क० ।

सैन्धवेन समाहूतावावां तद्गुरुमागतौ ॥
नानकः प्रणतस्तेन हस्तालिङ्गनपूर्वकम् ॥ १४ ॥

यदपृच्छज्जलालाख्यस्तस्योत्तरमदाद् गुरुः ॥
प्रससाद स तेनोच्चैः प्रणनाम च सादरम् ॥ १५ ॥

सैन्धवोऽब्रूत युवयोः प्रीतिरासीत्परस्परम् ॥
तदवस्थैव मद्वार्ता यदर्थमहमाह्वयम् ॥ १६ ॥

जालालोऽब्रूत किं ब्रूषे ? सैन्धवः पुनरब्रवीत् ॥
अस्यते तत्त्वविज्ञाने विसंवादो विलोक्यते ॥ १७ ॥

चतुर्दशैवावरणानि पुष्करे
भवद्भिरुक्तान्ययमाह भूरिशः ॥
युवां समर्थौ वितथं ब्रवीति को ?
द्वयोरिति द्वापरमेति मादृशः ॥ १८ ॥

जलाल ऊचे शृणु वत्स ? सैन्धव ?
प्रभोरियं प्राकृतसृष्टिकल्पना ॥
न कश्चिदस्याः परमात्थ बुद्धिमान्
वदन्ति यावद्विदितं विपश्चितः ॥ १९ ॥

इयं हि मायेक्षणतो जगत्पते-
रनन्तरूपं परिमाणमीयुषी ॥
न तत्त्वतः सूरिभिरप्यवेक्ष्यते
भवन्ति शास्त्रे स्वत एव विग्रहाः ॥ २० ॥

तथापि शिष्यानुपदेष्टुमुत्तमै-
र्निजप्रतीत्यानुगता न याः कृताः ॥
तमेकमाश्रित्य विबुध्य संकटा-
त्युमानमुष्माद्विगतो विभुं भजेत् ॥ २१ ॥

यतेत योऽस्यानुगमाय सर्वथा
भवस्य भूयान्समसौ परिश्रमन् ॥
लभेत सिद्धिं नच कश्चन क्षतं
यथा तुषाणामवघातको द्रुमम् ॥ २२ ॥

त्वं मण्डलक्षं खलु वक्षि नानकः
प्रकीर्त्यतां तत्परतः किमस्ति ? भोः ? ॥
यतीन्द्र ऊचे परतस्तथोपरि
स्फुरत्यधो' विष्वगकृत्रिमं महः ॥ २३ ॥

सैन्धवप्रेरितोऽपृच्छज्जलालो नानकं ततः ॥
त्वं किं गुरुमुखेत्यात्थ शिष्यो मम न बुध्यते ॥ २४ ॥

नानकस्तमथोवाच त्वामिह प्रष्टुमागमम् ॥
श्रुतवाँस्तव सामर्थ्यं तपसा विपुलीकृतम् ॥ २५ ॥

जलालो निजगादेदं न यद्यवनशास्त्रगम् ॥
तत्कथं वक्तुमीशेऽहं संस्कृतं पूर्वमश्रुतम् ? ॥ २६ ॥

त्वामेव प्रष्टुमायात इति तं यतिरब्रवीत् ॥
शिष्यो भूत्वा जलालोऽथ गुरुं नानकमुक्तवान् ॥ २७ ॥

गुरुमुखमवगन्तुमेव मक्का-
महमुपयामि ससैन्धवस्त्वमत्र ॥
निवस मम निवर्तनं न यावत्
गुरुरिव शिष्यगणैर्निषेवितो मे ॥ २८ ॥

गते जलाले गुरुमित्यपृच्छं
तामेव मक्कां यदि पूर्वदृष्टाम् ॥
व्रजत्ययं तत्र तदा वदेत् कः ?
ते म्लेच्छशास्त्रेषु परं प्रवीणाः ॥ २९ ॥

गुरुर्जगादेदमयं न सिद्धो
विरक्तिमार्गे प्रविवेश किञ्चित् ॥
शुश्राव तत्र स्थितमेव कंचित् ?
सर्वज्ञमद्यावधि धीर्विहीनः ॥ ३० ॥

आरुह्य पोतं जलधौ जलालः
पारं गतस्तस्य दिनैः कियद्भिः ॥
ददर्श शैले फलिनः सुवृक्षान्
हर्म्याणि रम्याणि शुभांश्च शष्पान् ॥ ३१ ॥

भोक्ता भवेत्कः परिवर्हमेत-
मिति स्वबुद्धया[1] परिभावयन्सः ॥
शैलादपक्रम्य [2]तरङ्गमाला-
मवालुलोके जलधेस्तटस्थः ॥ ३२ ॥

प्रवर्षतो वारिधरान् पयोधौ
विलोक्य संकल्पमकल्पयच्च[3] ॥
स्वातन्त्र्यमीशस्य किमेतदेवं
जले मुधा वृष्टिरियं स्थलेन ॥ ३३ ॥

तस्येति चिन्ता समकालमेव
शशाम वृष्टिः स गिरिं जगाम ॥
शष्पानि यस्मात् पुरुषान् ददर्श
तेजोभिरुग्रैश्चकितस्तदीयैः ॥ ३४ ॥

---

१. बुध्या—क०
२. तरंग—क०
३. मकल्पयित्व—क०

एकं नमस्कृत्य स तस्य पार्श्वे
दृशानि दृष्टे निषसाद देशे[1] ॥
सुवर्णपात्रीषु ततो नभस्तो
भोज्यानि दिव्यानि समागतानि ॥ ३५ ॥

न भोक्तुमैच्छत्स बुभुक्षितोऽपि
तस्मिन् स्थिते तत्र कृता नृशंस्यः ॥
आगन्तुकः संशयितं[2] करोति
भोक्तारमेकोचितभोज्यसिद्धौ ॥ ३६ ॥

गुरोरभुक्त्वैव गतः स पार्श्वं
पृष्टश्च तेनेति जगाद कश्चित् ? ॥
सामर्थ्यतः कस्यचिदागतोऽत्र ?
तं वर्जयित्वा तु न भोक्तुमीहे ॥ ३७ ॥

इदं तदीयो गुरुराबभाषे[3]
कस्यातिथिः ? कस्य च भोज्यमेतत् ? ॥
यस्यातिथिस्तस्य यदीह भोज्यं
मध्ये मुधा त्वं किमु संशयस्थः ? ॥ ३८ ॥

शिष्यो निवृत्तोऽथ जघास भोज्य-
मेकस्य तृप्तिप्रदमप्रदाय ॥
तेषां गतिः ज्ञातुमना जलालो
रात्रौ जजागार बुभुक्षया च ॥ ३९ ॥

---

१. देशं—ख०
२. संशयिनं—क०
३. भावभाषे—ख०

वेलावनामोदभरं दधाने
प्रातस्तने वाति ततः समीरे ॥
निमीलिताक्षः क्षणमेष आसी-
दतर्क्य लीलाश्च तिरोदधुस्ते ॥ ४० ॥

सुप्तोऽस्थितस्तानविलोक्य निद्रां
चिरादुपालभ्य स सिन्धुमागात् ॥
कैवर्तकोलाहलभीतलोकं
पोतं निमज्जन्तमलोकयच्च ॥ ४१ ॥

स्त्रीबालवृद्धतरुणेषु[1] परान् धरत्सु
धीरेषु बाहुतरणाय समुन्मिषत्सु ॥
दोलाधिरूढ इव लोलति तत्र पोते
वात्सल्यतः स विललाप जलाल इत्थम् ॥ ४२ ॥

ऋणं कृत्वा केचित्परिकलितभाण्डास्तदितरे
परिक्रीताः स्वीयेष्ववधिमभिधाय प्रचलिताः ॥
[2]कृतेऽन्येषां काकं शकुनमनुपृच्छन्ति दयिताः
स्मरन्तोन्ये कान्तागणितदिवसाः सन्ति तरुणाः ॥ ४३ ॥

संघातमृत्युमेतेषां करोषि करुणानिधे ? ॥
कथं प्रगीयसे लोकैर्लोकेश ? न विलज्जसे ॥ ४४ ॥

विलपति जलाल एवं
जलादुदश्चद्बहिस्तमायान्तम् ॥
गाधे व्यपेतबाधे
जना जनुर्मेनिरेऽभिनवम् ॥ ४५ ॥

---

१. विद्वलजनेषु–क ± ख
२. कृतान्येषां–क०

सायं समारोहदसौ गिरिं तं
तत्त्वं मुनीनामवसातुकामः ॥
पूर्वं समागत्य तु मन्दिरेषु
निजे निजे ते शयने निषण्णाः ॥ ४६ ॥

तस्यैव पार्श्वे निषसाद गत्वा
यस्य स्थितः पूर्वदिने समीपे ॥
भोज्येवतीर्णे स पुनर्जगाम
गुरोः स देशं दयया तपस्वी ॥ ४७ ॥

उवाच सोद्याप्यतिथिः स्थितो मे
दिनद्वयं षोषित एव पार्श्वे ॥
गुरुस्तमाह स्म तमानयस्व
पश्यामि कस्तेन कृतोऽपराधः ? ॥ ४८ ॥

शिष्येण नीतं तु गुरुर्जलालं
जगाद कुत्र ध्रियसे विरक्त ? ॥
द्वाभ्यां दिनाभ्यामितरत्र जन्म-
न्युपोषितस्त्वं नु कदाप्यमुष्मिन् ? ॥ ४९ ॥

को वापराधो भवता प्रणीतो ?
नाहारमीशो विदधाति येन ॥
न भोजनं भो ? जन ? लभ्यते य-
दीशस्य कोपस्य फलं महत्तत् ॥ ५० ॥

जलाल आख्यदुच्चाख्ये स्थले तिष्ठामि सुव्रताः ॥
इहं दिनद्वयं त्यक्त्वा नोऽपवासः क्वचित्कृतः ॥ ५१ ॥

अहोरात्रे प्रणमता पंचकृत्वो मयेश्वरम् ॥
आगः क्रियेत किमहो ! ईशात्सर्वफलार्थिना ॥ ५२ ॥

वलाहके वर्षति सिन्धुमध्ये
मया तटस्थेन मनस्यचिंति ॥
प्रौढिः परेशस्य निरर्थकेयं
स्थले न किञ्चिज्जल एव वृष्टिः ॥ ५३ ॥

अन्येद्युरालोकि ततः समुद्रे
मज्जच्युतं दीनजनैर्वहित्रम् ॥
दया न दीनेषु दयानिधेर्हा !
मया महेशः पुनरित्यनिंदि ॥ ५४ ॥

इदं यदि स्यादपराधकोटौ
तदा भवन्तः प्रविदन्तु सन्तः ॥
प्रसादकोपावपि दुर्विभाव्यौ
महेश्वराणां खलु मादृशेन ॥ ५५ ॥

दिव्यो मुनिः कोपमुपेत ऊचे
विवासनीयो विमुखो यमीशे ॥
को नाम मेनाचरिते जगत्यां
विरुद्धधीरन्यथयेत मूढः ॥ ५६ ॥

आज्ञां विना तृणमपि द्रुहिणोपि यस्य
न स्पन्दते दुरवरोधविचित्रशक्तेः ॥
तस्य द्वितीय इव कोऽसि कृतेषु मोहाऽ-
न्निर्धारयन्सदसदित्यविलज्जमानः ॥ ५७ ॥

कर्माणि पश्यति जनस्य स सर्ववेत्ता
जन्मान्तरेषु चरितानि विपाकवन्ति ॥
धत्ते फलं तदनुसार वशादसद्वा
सद्वा रिपौ सुहृदि भूय इवात्तदण्डः ॥ ५८ ॥

तं जलालस्तदापृच्छत्को वा गुरुमुखो मतः ? ॥
विमुखो वा ममाचक्ष्व ततः कुर्यां तवोदितम् ॥ ५९ ॥

ऊचे गुरुर्गुरुमखो गुरुतो विदित्वा
देवं तदीयमभिनन्दति सर्वकृत्यम् ॥
शास्त्रं गुरुं च विरहय्य निजेच्छयैव
निन्दां करोति विमुखश्चरितेषु तस्य ॥ ६० ॥

अभ्यधायि जलालेन समाधानं ममाभवत् ॥
स्थापयित्वाऽश्रमेत्येतत्प्रष्टारमहमागमम् ॥ ६१ ॥

मुनिर्बभाषे भवदाश्रमस्थो
जानाति सर्वं मतिरप्रमेय[1]: ॥
जलाल ओमित्यभिधाय यात
आहारमायातमपूर्वमश्नात् ॥ ६२ ॥

व्रजन्ति कुत्रेति ? विलोकमानः
स्थितश्च तस्यां निशि जागरूकः ॥
प्रातः प्रयातेषु[१] च तेष्वकस्मा-
दपेतनिद्रो[२] बुबुधे जलालः ॥ ६३ ॥

न योगसिद्धस्य गतिं विवेक्तु-
मस्मादृशः स्वल्पतपाः[३] प्रयस्येत् ॥
इति स्वबुध्या विमृशन् जलालः
पोताश्रितः पारमुपाजगाम ॥ ६४ ॥

---

1. मतिरप्रमेयः इति "ख" इत्यत्र नास्ति ।

१. युचते–क०

२. पेततन्द्रो–क०

३. स्वल्पतया–क०

स्वल्पाश्रमे मणिरिवाहिफणो यतीन्द्रो
दृष्टो जलालयतिना ज्वलितस्तपोभिः ॥
संस्पृश्य हस्तमिति गौरवतः प्रणम्य
विश्रान्तमेतमिति नानक आबभाषे ॥ ६५ ॥

[1]गुरुमुखाच्च जलाल ? यतेर्भवा-
न्निविदितवान् कथमर्थमुदीरय ॥
कतिपये भ्रमता भवता क्षितौ
जनपदाश्च तदर्थमवेक्षिताः ॥ ६६ ॥

इदं जलालो निजगाद योगिन् ?
न ते मतं किञ्चिदिह त्रिलोक्याम् ॥
शुश्रूषयेऽथापि ममाननाच्चे-
दवेहि सर्वं कथये यथार्थम् ॥ ६७ ॥

मक्काख्यदेवायतनं यियासु-
र्बहिस्ततो द्वीपमुपेत्य कश्चित् ॥
बलावने [2]धक्षिपि तुङ्गशृङ्गं[3]
शैलं समारुक्षुरुदीक्षितुं तम् ॥ ६८ ॥

तस्मिन् गृहाणि रमणीयरुचीनि शय्या
निर्मुक्तशेषधवला विजना विलोक्य ॥
विस्मेरतामुपगतः पुनरेत्य सायं
दिव्यान्मुनीनकलयं शयने निषण्णान् ॥ ६९ ॥

---

१. गुरुमुख—क०
२. धक्षति—क०
३. मुदीक्ष्य तुङ्गम्—क०

पार्श्वे न्यषीदमहमन्यतमं प्रणम्य
[1]मद्वर्जमागतमथाखिलयोग्यभोज्यम् ।।
नीतोस्मि तेन निकटं निजदेशिकस्य
भोज्यं न लब्धमिति मां विमुखं स ऊचे ।। ७० ।।

कः कथ्यते गुरुमुखो विमुखो मयेति ?
पृष्टोऽपराधमधिगम्य ममावदत्सः ।।
संमन्यते[2] गुरुमुखः कृतमीश्वरस्य
तद्गर्हते तु विमुखो गुरुशास्त्रहीनः ।। ७१ ।।

तेषां गतागतविलोकन[१]लालसोहं
मासं चिरं न तु मया विदिता महान्तः ।।
पृष्टाः प्रभावचकितेन न च प्रवृत्तिं
जानन्ति किन्तु तव ते महिमानमङ्ग ? ।। ७२ ।।

जलालमापृच्छच[२] ततो जगाम
यतीश्वरः [२]पथ्यहमित्यपृच्छम् ।।
ते के तपस्विप्रवरा वसन्ति ?
शैले पुनः कुत्र यियाससि त्वम् ?।। ७३ ।।

जगाद योगी शृणु नारदस्य
शिष्यास्तपश्यन्ति समुद्रतीरे ।।
ते लीलया कश्चन पुण्यभाजं
प्रदर्शयन्ति [३]स्वतनूः कदाचित् ।। ७४ ।।

---

1. मां विहायेत्यर्थः ।
2. उदासीनसम्प्रदाये गुरोर्महिमा महानस्ति । तत्र सर्वगुरुर्विष्णुरेव । तस्यामेव परम्परायां गुरुणा विहिता प्रचालिता च लपिगुरुमुखीति ।।

१. साहं–क० ।
२. छय–क० ।
३. तनुं–क० ।

व्रजाम्यहं शेषफरीदपत्तने
विराहमाख्योसि [1]तदासनेऽधुना ॥
स चापि योग्यो जगदीशवन्दनात्
मयानुयुक्तं किमसौ जलालवत् ॥ ७५ ॥

तदाऽब्रवीन्नानकयोगिशेखरो
महज्जलालस्य च तस्य चान्तरम् ॥
तपःश्रमी प्रव्रजितो जलालको[2]
विराहमो लोकपतेः परंप्रियः ॥ ७६ ॥

विपाशाया इरावत्या मध्ये क्रोशद्वयान्तरे ॥
दिनस्य चरमे यामे यतिरागत्य संस्थितः ॥ ७७ ॥

विराहमः शेषफरीदसत्तमः
स्थितस्तदीये [3]गुरुतासने तदा ॥
तदीयशिष्यो नृपतिश्च नीवृतो–
ऽतिभक्तिमान् बालविराहमाभिधः ॥ ७८ ॥

चिन्वन् स समिधस्तत्र गुरुणा विनियोजितः ॥
यदृच्छया नानकोक्तां वाणीं श्रुत्वा समागतः ॥ ७९ ॥

प्रणम्य च स्थितः पार्श्वे जगाद गदतांवरः ॥
यतीन्द्र ! यन्निगदितं [4]तत्पुनर्मत्कृते वद ॥ ८० ॥

पट्टः स्वयं च कलमः किल लेखकः स
यश्च द्वितीयवदसावपि न द्वितीयः ॥

---

१. तदा स नेछुना–क० ।
२. जलात्मको–क० ।
३. गरुरासने–क० ।
४. कंमः–ख० ।

सेव्यः स एव स च सेवकतां प्रपन्नो
बोद्धा स एव [2]विविधश्रुतिभिः स बोध्यः ॥ ८१ ॥

शिष्यो गतो निजगुरोर्निकटं निशम्य
वाणीं यतेरतिमतेः स्तुतिमित्यकार्षीत् ॥
दृष्टोऽद्य नानक इति प्रथितस्तपस्वी
साक्षादसौ भुवनभावन एव नान्यः ॥ ८२ ॥

ऊचे गुरुः स्वगिरमास्व गिरा न वाच्यो
ब्रूमो यथार्थमिति कश्चन नास्ति दोषः ॥
पाषाणमूर्तिपरिपूजनपूर्तिभाज
आर्या महीयसि परस्य महस्य बोधाः ॥ ८३ ॥

एकान्तवासनियतासनसंयतेन
प्रेमप्लुतेन मनसा जगदीश्वरस्य ॥
संस्थापनं हृदयतामरसे रसज्ञा
जानन्ति हन्त! यवनानपरे भ्रमन्तः ॥ ८४ ॥

एक एव जगत्स्वामी तस्यानेकेभिमानिनः ॥
ममैवेति ममैवेति कस्यासौ कस्य नो मतः ? ॥ ८५ ॥

इति मे वचनस्यार्थं यदि ब्रूयात्स चोत्तरम् ॥
तदा तमीश्वरं प्राप्तमहं विद्यां न चान्यथा ॥ ८६ ॥

शिष्यो गतो गुरुवचोऽभिजगाद पार्श्वे
श्रीनानकस्य स उवाच निशम्यतां भोः ? ॥
ग्रामे ममैव सवितेति विदन्ति बाला
सर्वत्रगः स च समस्तजगत्प्रकाशः ॥ ८७ ॥

---

२. विविधैःश्रु०—क० ।

ईशो भेदत्रयातीतः परिच्छेदत्रयातिगः ॥
सर्वस्यापि च सर्वत्र व्योमेवाऽखिलकारणम् ॥ ८८ ॥

अग्निर्यथा जाड्यरुजं[1] निहन्ति
जलं यथा तापमपाकरोति ॥
कल्पद्रुमो एति यथेप्सितार्थं
सर्वस्य दुःखं स तथा [2]छिनत्ति ॥ ८९ ॥

संनिधानमपेक्षन्ते यया वैश्वानरादयः ॥
तथा ज्ञानं विना नैष [3]मृतिजन्मजरां हरेत् ॥ ९० ॥

यवना यवनेतरे[4] तथा
पशवो राक्षसदैत्यदेवताः ॥
तमुपास्य परां गतिं गताः
सकलस्यापि स [5]कामदो मणिः ॥ ९१ ॥

सूनृतान्यथ निशम्य जगाद
देशिकस्य निकटे स निजस्य ॥
आजगाम स [6]विराहिमनामा
दर्शनाय यमिनां प्रवरस्य ॥ ९२ ॥

अवरूढः शिबिकायाः
नानकमवलोक्य दूरतो विनयात् ॥
यवनयतिर्यतिभर्तुः
पपात पदयोः परप्रेम्णा ॥ ९३ ॥

---

१. जाड्यरजां–क० ।
२. छिनत्वि–क० ।
३. मृतिराजन्मजरा–क० ।
४. तरोतथा–क० ।
५. कानदो–क० ।
६. वराहम–क० ।

आलिङ्ग्य स स्वागतपूर्वमेनं
सभाजयामास परं प्रसन्नः ॥
ऊचे स साधो ? सुदिनाह सद्यः
समागमान्ते मम सर्वथैव ॥ ९४ ॥

[1]अकारयत्संस्तरमात्मभृत्यै
विराहिमस्तुङ्गतरे प्रदेशे ॥
तस्मिन् गुरुः पूर्वमुखो न्यषीदत्
पश्चान्मुखो म्लेच्छतपोधनः सः ॥ ९५ ॥

स्मेरो गुरुः प्रणिजगाद विभुर्भवद्भि-
र्निर्धारितश्च[2]स्मरदेशनिवासशीलः ॥
तेनाभ्यधायि यवना निजसम्प्रदाया-
न्मक्कादिदेवसदनाभिमुखं नमन्ति ॥ ९६ ॥

योगीश्वरो न्यगददन्धपरं परे ये
चक्षुष्मतापि हितनेत्रमुपासनीया ॥
नद्यां यथा मृगयते गृहवस्तु कश्चिद्
देवं तथा मृगयसे दिशि पश्चिमायाम् ॥ ९७ ॥

ऊचे विराहिम इदं वद योगिवर्य ?
लभ्येत येन जगतीदयितः स देवः ॥
किं चीवराणि बिभृयां वसनान्युदस्य ?
किं वा व्रजेयमपहाय गृहं वनाय ? ॥ ९८ ॥

जगाद योगी जगदीश्वरस्य
प्रसत्तये न प्रभवन्ति सौम्य ? ॥

---

१. आकारयत्–क०
२. रमदेश–क०

वस्त्राणि चीराणि गृहा वनानि
विरक्ततापा विविधाश्च वादाः ॥ ९९ ॥

अनन्यभावेन स चिन्तनीयो
मनो वशीकृत्य विवर्तमानम् ॥
निघर्षजो दारु यथाश्वपाश-
स्तथा शमं तत्स नयेत्प्रसह्य[1] ॥१००॥

विविक्तदेशे संतुष्य यस्तिष्ठति तदाश्रयः ॥
तमेव भावयन् भक्त्या तस्य श्रीशः प्रसीदति ॥१०१॥

विराहिमो ब्रूत वयो व्यतीतं
नचापरोक्षं परमस्य लब्धम् ॥
कथं विविक्ते स्थितिशालिनो मे ?
जरापरीतस्य तदद्य भावि ॥१०२॥

नानकेन ततः प्रोक्तं यदैव[2] जगदीश्वरम् ॥
जानाति हन्त ! लभते तदैव[3] न विलम्बतः ॥१०३॥

कण्ठस्थितस्य कनकाभरणस्य नैष
दोषोऽन्वियेष पुरुषो यदिदं हि विष्वक् ॥
विस्मर्तुरस्य स तु कण्ठगतं तवेति
प्रोक्ते परेण लभते द्रुतमेव यस्मात् ॥१०४॥

विराहिमोऽभाषत नानक ! त्वया
महेश्वरोऽलभ्यत तेन हेतुना ॥
तमेव मह्यं वद मन्त्रमौषधीं
मणिं प्रणीयार्तजने दयालुताम् ॥१०५॥

---

१. प्रसह्य–क०
२. यदेव–क०
३. तदेव–क०

अब्रूत नानकयतिः शृणु सावधानो
मन्त्रो मणिश्च महदौषधमेतदेव ॥
ईशं परं वशयितुं वशवर्तिचित्तो
न प्रस्मरेत् क्षणमपि क्षणदादिनेषु ॥१०६॥

यूनो यथैव युवतौ युवतीजनस्य
चित्तं च यूनि रमते स्वरसेन शश्वत् ॥
तद्वद्रमेत सततं रमणे रमाया-
श्चित्तं यदीयमपचापलमेष भक्तः ॥१०७॥

सेवेत विश्वपतिमव्यभिचारभक्त्या
यो मानमोहरहितः स्वहितप्रसक्तः ॥
अल्पैर्दिनैर्गुणविकारमतीत्य धीरो
धी-रोधकं विमलबोधसुखं स याति ॥१०८॥

विराहिमोऽपृच्छदुदीयते पुरा
हरेर्दयाभक्तिरुतानपायिनी ॥
[1]विमोहमायाति परस्पराश्रयं[2]
प्रपश्यतो मे हृदयं दयानिधे ? ॥१०९॥

गुरुर्जगादेदमवेहि सन्मते ?
जनस्य पुण्यैर्जनुरन्तरार्जितैः ॥
उदेति भक्तिर्जगदीशितुः प्रिया
ततो दयादत्तमहो ! दयाद्रुतम् ॥११०॥

यवनयतिरुवाच त्वामवेक्ष्यास्मि धन्य-
स्तवचरणसरोजं धारयाम्येष मूर्ध्ना[3] ॥

---

१. विभो हि माया—क०

२. परस्यराश्रयं—क०

३. मूर्द्धा—क०

उदयति जगदीशो मानसे त्वद्वचोभि-
र्मम समधिगतं च प्राचितं[1] ब्रह्मतत्त्वम् ॥१११॥

तव तापहरी वाणी यथा ग्रीष्मेऽमृतच्छटा ॥
भूयोऽपि पुण्ययशसो गृणाति[2] हि भवद्गुणान् ॥११२॥

ऊचे गुरुरतिप्रेष्ठा[3] कामिनां कामिनीकथा ॥
लुब्धानामर्थवार्ता[4] च भक्तानां भगवद्गुणाः ॥११३॥

वृथा प्रलापैरपयाति पुंसः
क्षणं क्षणं स्रोत इवायुरङ्ग ! ॥
मनो वचः कर्मभिरीश्वरस्य
प्रसादनं जन्मनि भूरिलाभः ॥११४॥

केनापि पुण्येन मनुष्यजन्म-
लब्धो[5] हरिर्येन न तोषितोऽभूत् ॥
उच्चाटने हा [6]करटस्य ते न
चिन्तामणिर्मूढतरेण मुक्तः ॥ ११५॥

शेषोऽभाषत मे तीक्ष्णां छुरिकां देहि नानक ! ॥
मया कृत्ते गले साध्वीं सिद्धिं समधिगच्छति ॥११६॥

नानकेन कथितं छुरिकैषा
बुद्धिरेव गुरुणा [7]कथिता सा ॥

---

१. च्याचितं–क०
२. गृणीहि–क०
३. प्रेष्टा–क०
४. मर्थवार्ता–क०
५. लब्धा–क०
६. हाटक–क०
७. णटिता–क०

संछिनत्ति भवकण्ठमकुण्ठ्य-
मोक्षरत्नमथ लुण्ठति लोकः ॥११७॥

शेषेण भाषितमिदं मम संशयानां
विध्वंसनाय विधिना प्रतिपादितोऽसि ॥
केनैतदंधतमसं सकलापिधायि
दीपेन शाम्यति किलाकृतकेन विद्वन् ?॥ ११८॥

प्रोवाच [1]नानकगुरुर्गुरुतत्त्वमिस्रं
ताराशशाङ्कतपनैरपि नापनेयम् ॥
उन्मीलितेन तरसा गुरुवेदवाक्यै-
रध्यात्मदीपमहसा सहसा विनाश्यम् ॥११९॥

उत्थाय शेषः प्रणनाम पादौ
जगाद चेदं किमुदाहरेयम् ? ॥
त्वयि स्थितो वक्ति जगन्नियन्ता
त्वमेव साक्षादथवाऽखिलेशः ॥१२०॥

तपस्विना प्रोक्तमनाद्यविद्या
विधूतबोधः किल जीव एषः ॥
धर्मेण भक्त्या श्रवणादिभिश्च
गुरोर्गिरा ब्रह्मपदं प्रयाति ॥१२१॥

विराहिमेणोक्तमुपाश्रितोऽस्मि
मार्गं त्वया [2]दर्शितमद्वितीयम्[3] ॥
धन्यो गुरुस्त्वं स्वगिरा कुरुष्व
विज्ञप्तिमीशस्य च देहि मह्यम् ॥१२२॥

---

१. गुरुगुरु–क०
२. दर्भित–क०
३. द्वितीयां—क०

गुरुं नमस्कृत्य यमिर्जगाद
महामहिम्नो जगदीश्वरस्य ॥
स्तुतिं च विज्ञप्तिमगाधबोधो
रोधो ययाऽज्ञानकृतः प्रयाति ॥१२३॥

निगमास्तव नन्दिनो मता-
स्तव मायाभवचित्रकारिणी ॥
द्रुहिणादय एव किंकरा-
स्तव को वा परिमाति वैभवम् ॥१२४॥

न तवायुधमस्ति किञ्चन-
त्वमुपादानमपेक्षसे न च ॥
रुचिरं भवसद्म कुर्वतः
स्थपतेः शिल्पमलौकिकं तव ॥१२५॥

[1]श्रुतिशास्त्रवचोभिरुज्ज्वलै[१]-
र्विवदन्ते त्वयि वादिनो बुधाः ॥
इदमित्थमिति व्यवस्थितं
तव रूपं न तु वक्तुमीशते[२] ॥१२६॥

महिमा गहनोऽपि भासते[३]
तव भक्त्या विमलीकृते हृदि ॥
रसरञ्जित एव दृश्यते
मुखमादर्शतलेऽमले किल ॥१२७॥

---

1. १२६ श्लोक तः १५४ पर्यन्तं पुनः १५७ श्लोक तः १८८ पर्यन्तं नानकेन कृता भगवत्स्तुतिः । यां च स्तुतिं श्रुत्वा वराहिमो बालश्च गद्गदौ जातौ ।

१. ज्वलैः–क० ।

२. मीहते–क० ।

३. भास्वते–क० ।

भुवि भारमुदारमाचरन्
असुरैस्तस्य निवर्हणाय च ॥
अवतारमनेकमावहन्
बहुलोलः स्वकृतेन खेलसि ॥१२८॥

कथमीशहिरण्यगर्भयो-
स्तव सूत्रस्य विराज एव च ॥
कथयन्ति कथामविक्रियां
[1]चितिमिच्छं [2]भगवन्तमक्रियम् ॥१२९॥

प्रभवन्ति भिदा उपाधिभि-
स्तव नानेति समादधत्यपि ॥
अनुपाधिमनञ्जनं [3]खवद्-
गतमायं च वदन्ति सूरयः ॥१३०॥

गगनादिभवद्विलासतो
ऽभवदित्याहुरमन्दबुद्धयः ॥
न कदाचिदनीदृशं जगत्
प्रथयन्ति प्रथमे विपश्चितः ॥१३१॥

न चलन्ति तृणान्यपि ध्रुवं
भवदिच्छा[4] विरहाद् वदन्ति ये ॥
अपराधमुदीरयन्ति ते
किमु जीवस्य कृते [5]कुकर्मणि ॥१३२॥

---

१. विनिमिच्छन्–क० ।
२. भवन्त–क० ।
३. रवत् भवद्–क० ।
४. भवदिच्छा–क० ।
५. भर्मणि–क० ।

श्रवणादिभिरात्ममुक्तये
प्रयतन्ते श्रुतिशास्त्रतो यतः ॥
तत एव किलावसीयते
न च बन्धो न च मुक्तिरित्यपि ॥१३३॥

स्वबलेन विबुध्यते कथं ?
श्रुतिकान्तारविमोहितो मुहुः ॥
तव तत्त्वमयं जनो यदा[1]
सदृशोदारदयो न बोधयेः ॥१३४॥

चितिरेव सती सुखात्मिका
न च जीवो न च विश्वविभ्रमः ॥
इति कामगवीमतिश्रव-
त्यमृतं येन पुनर्न शोचति[2] ॥१३५॥

मुरलीं रणयन् मनोरमं
वनमाली शिखिपिच्छलाञ्छनः[3] ॥
नवनीरदकान्तिरित्यहो
मतिधारा भवसंज्वरापहा ॥१३६॥

सगुणं तव निर्गुणं वपुः
प्रमितं मोहमपोहितुं क्षमम् ॥
विकृताऽविकृतासिताऽसिता[4]
तनुते तृप्तिमनुत्तमां[5] जने ॥१३७॥

---

१. 'यदा' इति पाठः 'ख' इत्यत्र नास्ति ।
२. शोचिति–ख० ।
३. लांछनः–क० ।
४. सितासितां–क० ।
५. अनतमां–क० ।

[I]शिवसूर्यमरुद्विनायकान्
भवतां यच्छति [1]वाञ्छितं भवान् ॥
उडुचन्द्रहुताशविद्युत[2]-
स्तपनस्यैव विभान्ति तेजसा ॥१३८॥

कुरुषे किमु कृत्यमीप्सितं ?
तिमिकूर्मादिशरीरसंकटैः ॥
जगदीशजगल्लयोदयौ
भवतश्चेद् भवतः स्पृहावशात् ॥१३९॥

त्वयि बोधपयोनिधौ तते
भवगोलानि भवन्ति बुद्बुदाः[3] ॥
सुयशांसि लसन्ति सन्ततं
नव डिन्डीरचया इवाक्षया ॥१४०॥

श्रुतयः श्वसितानि ते विभो ?
हसितं शक्तिरियं विमोहिनी ॥
जगती विबुधैरतर्किता
तव लीला त्वमगोचरो गिराम् ॥१४१॥

भुवनत्रयपावनी धुनी
प्रथिता ते [4]पदपङ्कजोद्भवा ॥
तव नाम ततोऽपि पावनं
सकृदुक्तं चरमेप्यनेहसि ॥१४२॥

I. मरुद इति पाठः 'ख' इत्यत्र नास्ति ।
१. वांछितं–क० ।
२. विद्युत्तप–क० ।
३. विद्वुदा–क० ।
४. पद इति 'ख' इत्यत्र नास्ति ।

न तपांसि न धर्मसंचयो
न च भक्तिर्न च बोध [1]उद्धुरः ॥
तव नाम तथापि पापिनो
यमदूतानपसार्य[2] तारयेत् ॥१४३॥

शरणागतवत्सलो भवान्
शरणं त्वामहमागतोऽस्मि च ॥
न बिभेमि निजादतो गुरो-
रघराशेर्बहुजन्मसंचितात् ॥१४४॥

हृतचित्तममोघमायया
तव लीलामृगतातनुं गतम् ॥
अयि ! मुञ्च बधान मा विभो ?
करुणाब्धे ? कृपणं कृपास्पदम् ॥१४५॥

निजकर्मफलं पचेलिमं
ननु भुञ्जानमवेक्ष्य मां भवान् ॥
कृपणं कृपणेषु वत्सलो
यमहस्तान्न हरे ? हरिष्यसि ॥१४६॥

मुरलीं मधुरं निनादयन्
वनमाली शिखिपिच्छशेखरः ॥
चरमे श्वसितेऽवशेषिते[4]
निभृतंस्य मनोधिवत्स्यसि ॥१४७॥

---

१. वुद्धरः—क* ।
२. वार्य—क० ।
३. मधुरां—क०
४. शेषते—क०

परिपीडितमेकतो रुजा
यमदूतैरितरत्र भीषितम् ॥
कफकुण्ठितकण्ठमुद्धरेत्
क इवान्योऽनुजनं जनार्दनात् ॥१४८॥

सनकादिसुरर्षिसेवितं
सुरराजस्य जयाय जाग्रतम् ॥
श्रुतिशेखरगीतवैभवं
कमलाकान्तमनन्तमाश्रयम् ॥१४९॥

शरणं करुणाकरो हरि-
र्मम नान्यं कलयामि कञ्चन ॥
गरुडध्वजतो गतिः परा
मम नास्त्येव समस्तजन्मसु ॥१५०॥

नक्षत्रमालाममलां कृतां नानकयोगिना ॥
ये कण्ठे धारयिष्यन्ति तेषां श्रीरनपायिनी ॥१५१॥

अधिगत्य यतीशस्य कृतिमेतां विराहिमः ॥
पारसीकपदैः कृत्वा पपाठ स्वेश्वरं स्मरन् ॥१५२॥

पुनरूचे मुकुन्दस्य गुणान्नानकतापसः ॥
भक्तानां हर्षजननाद् जनतापापविच्छिदः ॥१५३॥

तव शक्तिरकुण्ठितानिशं
त्वमशेषस्य भवस्य [1]कारकः ॥
अवसि प्रविलापयस्यमुं
न च दोषैः प्रयतो विलिप्यसे ॥१५४॥

---

१. कारकः इति ख० पु० नास्ति ।

चतुरश्चतुराननादपि
त्वयि ये प्रेम न तन्वते जनाः ॥
नरके विकिरन्ति तान् भटा
गलसन्दानितलोहशृंखलान् ॥१५५॥

भयतस्तव वाति मारुतो
भयतो धावति भास्करोऽम्बरे ॥
दहते दहनो भयेन ते
न च मृत्युर्भयतः प्रमाद्यति ॥१५६॥

अभयं तव केवलं पदं
भयमन्यत्र तृणेऽपि वेधसि ॥
किमु नृत्यति कूर्दते जनो
यमदंष्ट्राविकटः समाश्रितः ॥१५७॥

मणिभिः कनकैरलङ्कृताः
सुमनश्चन्दनगन्धबन्धुराः ॥
क्षितिपा अपि मृत्युमर्दिता
कृमिविड्भस्म भवन्ति नेतरत् ॥१५८॥

घटिका विलसन्ति गोपिकाः
प्रहरो नृत्यति नन्दनन्दनः ॥
इति एष विमोहिता जना
बत जानन्ति न कृत्यमात्मनः ॥१५९॥

भ्रमणे तु भवन्ति सिद्धयो
यदि चक्राद्यपि सिद्धितामियात् ॥
प्रचरन्ति कचेऽङ्घ्रिधूलयो
निलयेषु प्रहसन्त्यमुं जनाः ॥१६०॥

अतिवाहितवानयं जनः
कति नामेह[1] जनूंषि नो वृथा ॥
धनिनो स्मयन् वदन् कथां
विविधा नृत्यविनोदतत्पर ॥१६१॥

यवनानि खनन्ति भूतले
मृतकं हन्त! दहन्ति चेतरे ॥
किमु यान्ति कृतार्थतामतो
जगदीशप्रणयं विना जनाः ॥१६२॥

यदिदं भुवि जृम्भितं[2] भवे
सुरपूजा निजधर्म सत्तपः ॥
रमते न ततो रमापतिः
स हि सत्यप्रणयप्रियः सदा ॥१६३॥

अहमहमिति धावमान एव
श्रममखिलं विफलं तनोति जन्तुः ॥
अहमहमिति दीर्घरोगरुग्णो
गुरुभिषजं समुपाश्रयेत शान्त्यै ॥१६४॥

मिताहारस्त्यक्त्वा विषयविषपानव्यसनितां
समः शत्रौ मित्रे गुरुनिगमवाक्यव्यवसितः ॥
[3]शनैर्भुञ्जन् चित्रं भगवति सदा सत्यमहिम-
न्यसारात् संसारादुपरतमतिर्नन्दति यतिः ॥१६५॥

शरीरिणो येन चतुर्विधाः कृता
धृतामतिस्तेषु पुनर्यथोचिता ॥

---

१. नामाह–क० ।
२. भृंभितं ।
३. शनैयुंज–ख० ।

न विस्मरत्यन्नजलादिदापने
तमेव विस्मृत्य सुखं क्व प्राप्यसे ॥१६६॥

अधीत्य [1]यच्छकटमपूरिपुस्तकै-
रथद्यथा क्षितिरवगाहिताऽखिला ॥
विडम्बितं भसितजटादिभिर्वपु-
र्वृथैव तत्परिचयमन्तरा हरिः ॥१६७॥

[2]देवेश यस्य दयसे तस्य त्वन्नाम्नि संभ्रमः ॥
तस्य त्वयि दृढा भक्तिः स वैकुण्ठे महीयते ॥१६८॥

तिलकेन किमुज्वलेन मूर्द्ध-
न्युपवीतेन कुलेन निर्मलेन ॥
नरकार्णवतारणस्य भक्त्या
यदि [3]सम्मार्ज्य सितीकृतं न चेतः ॥१६९॥

अखिलमिति यतिर्मुकुन्दभक्त्या
प्रणिगदितं विधृतं विराहिमेण ॥
चरणयुगमपि प्रयातुमिच्छोः
सुजनवियोगविषण्णमानसेन ॥१७०॥

गतं तमामन्त्र्य यतिप्रधान-
मध्वन्यवोचं चरणप्रपन्नः ॥
इतः परं गच्छसि कुत्र योगिन् !
पृच्छामि किञ्चित् तदुदाहरस्व ॥१७१॥

---

१. यछ–क० ।
२. देवेशस्य–क० ।
३. संमार्ज्य–क० ।

श्रोतुर्भवत्स्वैरकथा विलीना
दीना भवे वासनया मतिर्मे ॥
विश्वं विभो नश्वरमीक्षमाणं
न हर्षशोकौ स्पृशतः क्षणं माम् ॥१७२॥

त्रिसरकमवदद् विमोहकारी
क्वचिदज्ञानगभीरिमा गतो मे ॥
अखिलमुपलभे विभुं विशुद्धं
कमपि महेशमशेषशक्तिसिन्धुम् ॥१७३॥

त्वमहमिति भिदा विदारिता मे
तव वचनैर्निशितैरलं विशद्धिः ॥
मम हृदयमहोपलं प्रविष्टा
तदवगतं परमात्मतत्त्वमेकम् ॥१७४॥

तान्येव शास्त्राणि बुधाः पठन्ति
तैरेव यत्नैर्यतयो यतन्ते ॥
ज्ञानादयो यत् क्वचिदेव दृष्टाः
पृष्टस्ततस्त्वं कथयस्व हेतुम् ॥१७५॥

वदन्ति केचिद् वसुदेवसूनुं
सर्वेश्वरं केचन राममेव ॥
अन्ये शिवं केऽपि हिरण्यगर्भं
क उत्तमस्तेषु च कोऽखिलेशः ॥१७६॥

इत्याकर्ण्य मम प्रश्नानानुपूर्व्यादथोत्तरम् ॥
जगाद योगी मधुरं करुणावरुणालयः ॥१७७॥

तलवण्डीं जन्मभूमिं वालसिन्धो ! व्रजाम्यतः ॥
विद्वानप्यखिलं तत्त्वं सुश्रूषुर्मन्मुखाच्छृणु ॥१७८॥

अबोधोरुकपाटस्योद्घाटनी कुञ्चिका मतिः ॥
लभ्यते गुरुणा दत्ता लभ्यते न विना ततः ॥१७९॥

मूलं महद् ब्रह्म जगल्लतायाः
पुष्पैरनेकैरुपशोभितायाः ॥
दधाति दृश्यत्वमदृश्यतां तद्
लीलागृहीताद्भुतसर्वशक्तिः ॥१८०॥

ब्रह्मा विष्णुर्महेशश्च गुणैस्त्रिभिरुपाधिभिः ॥
सृष्टौ स्थितौ च प्रलये कारणं कथ्यते बुधैः ॥१८१॥

उपासकानां रुचयो विचित्रा-
स्ततो निजोपास्यमुशन्ति मुख्यम् ॥
अन्यांस्ततो न्यूनतराननन्य-
भक्ता यदि श्लाघ्यमिदं न निन्द्यम् ॥१८२॥

नानाभिधः सर्वजगन्निवासः
सर्वेश्वरः सर्वसुरेषु चैकः ॥
अन्तर्बहिर्यच्छति वाञ्छितं सः
स्थितः किलाकाश इवावकाशम् ॥१८३॥

लीला यस्य जगज्जनिस्थितिलयः तस्येषितुः का स्तुतिः ?
पौलस्त्यादिवधेन कश्च महिमा ? नूनो मयाम्नायताम् ॥
रामं कृष्णममुं नृसिंहमथवा श्रीपार्वतीवल्लभं
ब्रह्माणं भजतो जनस्य न जनुर्जायेत दुःखाकरः ॥१८४॥

मतमाश्रित्य कलहं कुर्वते भेददर्शिनः ॥
अनन्यभक्तास्ते स्वेशं सर्वतो भावयन्ति ये ॥१८५॥

अहमिति यतिभर्तुर्भारतीमाकलय्य
परममुदमविन्दं वाचमेतामवोचम् ॥

त्वमसि गतमतीनां ज्ञानदातावतीर्णो
मम सफलमकार्षी जन्म योगीश ! सत्यम् ॥१८६॥

नानकेन कथितं त्वयि पूर्णा
श्रीधवस्य करुणाकृतबुद्धे ! ॥
भक्तकल्पतरुमेनमनेनं-
श्चिन्तयन्ति गतचिन्त ! सुखी स्याः ॥१८७॥

अहञ्च यतिराजश्च तलवण्डीमुपागतौ ॥
पितृव्यस्तस्य तं लालः समागम्येदमब्रवीत् ॥१८८॥

भ्राता मृतः सम्प्रति हन्त कालः
प्रजावती चापि तयोः प्रजात्वम् ॥
ममासि बाहुर्वस विश्ववन्द्य !
नन्दामि नित्यं सहवासतस्ते ॥१८९॥

एवं वदन्तं सहसा रुदन्त-
माश्वासयामास यतीश्वरस्तम् ॥
पितृव्यमृत्योर्वशवर्तिविश्व-
माब्रह्मणो हन्त ! पिपीलिकान्तम् ॥१९०॥

यद्वैतमेतत्सकलं वियुक्तं
कालं कियन्तं किल सम्प्रयुक्तम् ॥
आद्यन्तयोर्यन्नियमादशक्य-
प्रतिक्रियं तत्परिदेवना का ॥१९१॥

लालमेवं समाश्वास्य कालं पञ्चदशाहकम् ॥
तत्र स्थितो मया सार्धं पुनरगात् स पक्षकम् ॥१९२ ॥

सुलक्षणी मामवदत् कदाचि-
दम्बानियोगाद् भवितव्यतायाः ॥

निजं गुरुं बाल विमुच्य कश्चित्
काले ममाप्यस्तु स सन्निधिस्थः ॥१९३॥

प्रयाणकालेषु यदप्यवोचं
वियोगवाष्पाङ्कितलोचनोऽहम् ॥
अर्थे कृते देहमहासिषुः स्वं
रघूत्तमाद्या अपि वीतमोहाः ॥१९४॥

त्वयि प्रयाते तव कः पदेऽस्मिन् ?
स्थाता भवच्छिष्यगणार्चनीयः ॥
सशंस योगी लहनान्यनामा
स्थाता पदे मेऽङ्गदनामधेयः ॥१९५॥

फेरोः क्षत्रियवर्यस्य पुत्रो निर्विण्णमानसः ॥
मामुपेष्यति मत्तुल्यः स गुरुत्वं गमिष्यति ॥१९६॥

पुनर्मयोक्तं श्रीचन्द्रः कथं वर्तिष्यते गुरो ॥
पदं न कथमारोहेदौरसस्तनयस्तव ॥१९७॥

योगी जगाद मम वंशभवो भवेऽस्मिन्
पूज्यो भविष्यति न कश्चन संशयोऽत्र ॥
जन्मान्तरश्रमसमर्जितसाधनस्य
दैवं पदस्थितिकरं परमङ्गदस्य ॥१९८॥

ततो नानकमामन्त्र्य तलवण्डीमहं गतः ॥
कालात् कतिपयात् सिद्धं शुश्रुवांस्त्वमुपस्थितः ॥१९९॥

अन्यूनो नानकात् त्वं हि तेनैव परिकीर्तितः ॥
तव तोषाय निखिला कथेयं कथिता मया ॥२००॥

एतावदेव जानामि स्वदृग्भ्यां यद् विलोकितम् ॥
नान्यदाकलये कालात् ततो यत् परतोऽभवत् ॥२०१॥

शुश्रूषुरस्मि भवतो गुरुनानकेन
सङ्गो यथाभवदथांगद इत्युवाच ॥
सन्दर्शितो मम गुरुः [1]कथयानयाङ्ग
गङ्गा पुनाति खलु सज्जनसङ्गमश्च ॥२०२॥

ज्वालां विलोकयितुकाम उपागतोऽहं
श्रुत्वा विरक्तपरमन्वसरं यतीन्द्रम् ॥
पृष्टोभ्यर्धा यमिनन्वयनामनी स्वे
शङ्काकलङ्कमथ शोधितवान् गुरुर्मे ॥२०३॥

विसृष्टोऽपि यतीशेन तत्सेवायै स्थितोऽस्म्यहम् ॥
प्रासदन्मयि योगीन्द्रः सन्तो दीने दयालवः ॥२०४॥

प्रक्षाल्य घासमनयं[2] गुरुसोरभेय्यै
[3]तद्बिन्दुभिर्मम कलङ्कितमुत्तरीयम् ॥
न क्षत्रियोऽर्हति विडम्बनमित्यवोच-
दम्बागुरुर्घुसृणसेचनमित्युवाच ॥२०५॥

सुलक्षणी द्वौ तनयौ पुरस्ता-
दानीय भर्तारमिदं जगाद ॥
सतोः स्वसून्वोरितरस्य सूनुः
कुतस्त्वयाधिक्रियते पदे स्वे ? ॥२०६॥

आस्वच्छबोधवलवस्त्रवृतः पुरस्तात्
तं नानकोऽवददद्दन्तु भवन्त एतत् ॥
शिष्याः सुतौ च वचनं न हि तस्य चक्रु-
रूचे स मां त्वमिदमङ्गद भक्षयेति ॥२०७॥

---

१ वयाङ्ग—ख०
२. मनघं—क०
३. बिन्दभिः—ख०

बाढं गुरो इति वदन्नपसार्य वस्त्रं
तां लप्सिकाममृततुल्यरसामथाश्नाम् ॥
पत्नीं निजां गुरुरवोचदिमौ स्वपुत्रा-
वेषोऽन्यपुत्र इति कुत्र भवेत् प्रसादः ? ॥२०८ ॥

व्यूढ पश्य रजनीप्रहरोऽस्ति
नानको गुरुरिति क्वचिदूचे ? ॥
अर्धरात्र इति तेन तदोक्ते
मामुवाच गुरुरङ्गद ? पश्य ॥२०९॥

पश्यन्निशीथमहमेतदशंखमेनं
निद्राकुलस्य मम भाति निशीथ एषः ॥
शेषः परं प्रहर एव विभो रजन्या
वाचा ममेति च तुतोष गुरुर्विशेषात् ॥२१०॥

व्यूढमूचे नमस्यैतं प्रसन्नेशं विमत्सरः ॥
पश्यत्सु सर्वशिष्येषु प्रणनाम स मां ततः ॥२११॥

बालोऽङ्गदस्य गुरुवत्सलतानिदाना-
न्याकर्ण्य कर्णरुचिराणि चिरादवोचत् ॥
त्वं नानकादनितरोऽसि न संशयोऽत्र
वृद्धस्य मे वद कदा भविताथ मृत्युः ? ॥२१२॥

नानकस्य विरहेण विषण्णं
वृद्धमेनमिदमङ्गद ऊचे ॥
द्वौ तवायुरपरौ खलु मासौ
मा समीपमपहास्यसि मेऽङ्ग ? ॥२१३॥

द्वौ मासौ संस्थितस्तत्र संस्थितस्तदनन्तरम् ॥
बालोऽङ्गदेन पितृवद् गुरुभक्त्याथ संस्कृतः ॥२१४॥

श्रीनानकस्तु यवनान्न किमुतार्यवर्या-
नाख्याय तत्त्वमदुरूहमिहोद्दधार ॥
पाखण्डिनश्च परिभूय मतं स्वकीय-
मद्वैतसारसरसंस्थिरतां निनाय ॥२१५॥

राजानो मतमेतदीयमभजन्नीत्या धरारक्षिण-
श्चातुर्वर्ण्यमयत्नतो मतमिदं लब्ध्वा बुबोधेश्वरम् ॥
यत् सर्वस्य सुबोधमस्त्विति कृतं गीतं च दैन्यैः पदै-
स्तन्मन्त्रत्वमबोधभूतदलने दुर्वारवीर्यन्दधौ ॥२१६॥

तदेषु सिन्धोर्धरणीधरेषु
ग्रामेषु खेटेषु पुरेषु लोकः ॥
ननाम यो नानकनाम गृह्णन्
न नाम तस्य प्रतिकूलमासीत् ? ॥२१७॥

सत्योपयाचनतया प्रथितः पृथिव्यां
श्रीनानको नरवपुः सुर एव साक्षात् ॥
स्मर्तारमुद्धरति स स्म विपत्तिजालाद्
व्यालादुपेत्य पतगेश इव प्रपन्नम् ॥२१८॥

अतीतानागतज्ञानात् निग्रहानुग्रहक्षमः ॥
नानकस्य मते तिष्ठन् सिद्धो भूयादभूज्जनः ॥२१९॥

व्यासो यथा वेदमतीव दीर्घं
विभक्तवान् मन्दमतीनुदीक्ष्य ॥
अद्वैततत्त्वं गहनं वचोभि-
स्तथा सुबोधं विदधे यतीन्द्रः ॥२२०॥

छाया न पीलोः परिवृत्तिमेति
कृतं तथा मिष्टमरिष्टसस्यम् ॥

अश्वत्थपत्रेषु करा‌कृतिश्च
कृतिः क्षितौ सम्प्रति नानकस्य ॥२२१॥

सिद्धैर्भोजनमर्थितं फलमिदं भुंक्ष्वेत्यदान्नानक-
स्तन्माधुर्यमगात्तरूनगमयन् योगीश्वराः शक्तितः ॥
अश्वत्थस्तु करेण तत्र यतिना संस्पृश्य संस्थापितो
यस्यामेतदकारि नानकमता सा विश्रुतास्ते पुरी ॥२२२॥

सिद्धाश्च भक्ता बहवो बभूवुः
को नाम वैकुण्ठमगात् सदेहः ? ॥
सदेहमस्मात्. सुजनैर्नमस्यो
विश्वम्भरस्यावतरो यतीन्द्रः ॥२२३॥

कलिना कवलीक्रियेत तूर्णं
जगती पापमयानुदीक्ष्य लोकान् ॥
यदि नानकयोगिना न युक्ता
सुयशः श्रीरमणस्य गायितं स्यात् ॥२२४॥

वैराग्यं श्रवणादुदेति तदनु प्रेमा रमावल्लभे
ज्ञानं तत्परिशीलनात् कतिपयैर्घस्रैरजस्रोज्वलम् ॥
वाणी नानकतापसस्य विमला तापत्रयोन्मूलिनी
तस्मात् केन न कर्णदुःखदलनी श्रूयेत तच्छ्रद्धया ? ॥२२५॥

अवसितसकलार्थो भक्तिवैराग्यबोधान्
प्रतिजनमविरोधान्नानको वीक्ष्य तुष्टः ॥
अथ रहसि सुषुम्णा मार्गमानीय योगा-
द्विदितसकलतत्त्वः प्राणमाशूत्ससर्ज ॥२२६॥

शंखध्वनिर्नभसि सर्वजनैः श्रुतश्च
पुष्पाणि लब्धमधुपानि च खाच्च्युतानि

श्रीर्लक्षिता धरणिमण्डलमाशु हित्वा
विद्युल्लतेव गगनाङ्गणवञ्जिहाना ॥२२७॥

सकुटुम्बः शिष्यवर्गो विषसाद तदौत्सुकः ॥
श्रीचन्द्रस्तु समागत्य कुतश्चिदिदमब्रवीत् ॥२२८॥

योगीन्द्र ! नानकपितर्यदि सत्यशक्ति–
स्त्वं मे तदा भव मुहूर्तमुपेतजीवः ॥
बालं हि तान्यनुनिशम्य कुतः प्रयासि ?
निष्कारणाकरुणता तव शोभते किम् ? ॥२२९॥

उत्थाय नानकयतिस्तु ततः सचेताः
पुत्रं जगाद जगदाहितपुण्यकीर्तिः ॥
ब्रूया द्विमासमथ वत्स ! यदि द्विवर्षं
तिष्ठेयमत्र तु तदा वशवर्तिमृत्युः ॥२३०॥

दृश्यं समस्तमसदित्यवधेहि वत्स ?
स्वप्नोपमः सुतसुहृत्पितृमातृसङ्गः ॥
शोको न कोऽपि वितथस्य कृते विधेयः ?
कर्तारमस्य जगतः शरणं प्रयाहि ॥२३१॥

वध्यस्व मा त्वमिह संसृतिवागुरायां
भ्रातुर्भविष्यति ततस्तव वंशतन्तुः ॥
अस्मत्कुले धृतजनुर्जनतासु पूजां
लब्धा क्षितौ सुभगसागरमेखलायाम् ॥२३२॥

एवमादिमुदाहृत्य भारतीं सुतसंनिधौ ॥
[1]निपपात तनुस्तस्य मुहूर्तानन्तरं क्षितौ ॥२३३॥

---

1. गुरोर्नानकस्य देहत्यागः ।

नानको मृत इति प्रसृतोऽभूद्
दिक्षु तत्क्षणमथो जनवादः ॥
आगताश्च यवना द्रुतमार्या-
स्तस्थुरस्य कुणपं परिवार्य ॥२३४॥

धरायां निखनिष्याम इत्यूचुर्यवना हठात् ॥
आर्या धक्ष्याम इत्यूचुर्दारुणः कलहोऽभवत् ॥२३५॥

अन्यतो यतिपतिः सशरीरो
म्लेच्छमार्यमपि लोकमपृच्छत् ॥
आचरन्ति कलहं किमथोचु-
र्दाहनं निखननं कलिहेतुः ॥२३६॥

अर्धं विपाद्य यवना निखनन्तु भूमा-
वर्धं दहन्तु च ततः परिशेषमार्याः ॥
न्यायं प्रदर्श्य कलहं विनिवार्य चेत्थ-
मन्तर्दधौ सपदि नानकयोगिवर्यः ॥२३७॥

वस्त्रावृतं तस्य वपुर्विभक्तु-
मेते गता वस्त्रमुदस्य तत्र ॥
नैक्षन्त देहं वसनं विभज्य
क्रियां स्वयोग्यामुभये वितेनुः ॥२३८॥

एवंविधानि चरितानि महाद्भुतानि
नाना चकार किल नानकयोगिवर्यः ॥
शृण्वन्ति तानि कथयन्ति च येऽनुरक्ता
विन्दन्त्यमी इह परत्र च मङ्गलानि ॥२३९॥

तेषां स्वभक्तसुयशः स्वयशःसमेत-
मुद्गायतामतुलभावपरिप्लुतानाम् ॥

श्रीशः प्रसीदति ददाति च वाञ्छितानि
दाता प्रसह्य पुरुषार्थचतुष्टयस्य ॥२४०॥
श्रीचन्द्रस्तपसि मनोदधे विरक्त
आखेटे रसिकतरोऽभवद् दवीयान् ॥
आरूढस्तुरगमतीव वेगवन्तं
श्येनेन प्रतिवनमण्डजान् जहार ॥२४१॥
संगृह्णानि च मांसानि
पक्षावालुञ्च्य पक्षिणाम् ॥
एकदा भ्रातरं भ्राता
ज्यायानिदमुदाहरत् ॥२४२॥
नानकस्य सुतोऽसीति किमनर्थः प्रतन्यते ? ॥
मां स खादयिता प्रेत्येत्याहुर्मांसस्य मांसताम् ॥२४३॥
लक्ष्मीचन्द्र उवाचेदं वेद कर्मगतिं नु कः ? ॥
अहं खादितपूर्वः स्यामेतैर्जन्मान्तरे यदि ॥२४४॥
अहं नृशंसोऽस्मि च पूर्वजस्य
भ्रातुर्न वर्ते किल शासने च ॥
प्रतन्यते निष्कृतिरद्य तस्य
द्वयस्य पश्यन्तु समस्तलोकाः ॥२४५॥
इत्युक्त्वा हयमारोप्य भार्यां पुत्रं च बालकं ॥
स्वयमारुह्य गगनमुज्जगाम जनादसौ ॥२४६॥
श्रीचन्द्रस्तदिदं दृष्ट्वा वेगाद्गगनमागतः ॥
बालकं तं करे कर्षन्नानिनाय वसुन्धराम् ॥२४७॥
स एव धर्मचन्द्राख्यो नप्ता नानकयोगिनः ॥
सन्तानतन्तुरभवद्वेदिनां वंशवर्धनः ॥२४८॥
तस्य माणिक्यचन्द्रोऽभूत् पुत्रो[1] मिहिरचन्द्रकः ॥
व्योमेव सूर्यचन्द्राभ्यामुभाभ्यां कुलमद्युतत् ॥२४९॥

---

१. त्युवो–ख०

माणिक्यचन्द्रस्य सुतोऽपहार-
चन्द्रोऽपरः सूनुरनारचन्द्रः ॥
हितारचन्द्रोपि बभूव तारा-
चन्द्रस्तथैवोदयचन्द्रवर्मा ॥२५०॥

जगचन्द्रश्च मिहिरचन्द्राद्रूपनारायणः ॥
महीपतिः सुतो यज्ञेऽमरचन्द्रादयस्तथा ॥२५१॥

वंशो बभूव विततो महनीयकीर्ते-
रेवं प्रभूतमहिमा भुवि नानकस्य ॥
अस्मिन् जितेन्द्रियजयाः परमार्थनिष्ठा
देवद्विजश्रुतिपराः पुरुषा बभूवुः ॥२५२॥

तापत्रयस्य विगमो
नानकचन्द्रोदयाद्भविता ॥
तमिमं श्रयन्तु सुजना
वाञ्छन्तो नित्यकल्याणम् ॥२५३॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
विश्वविजयो नामैकोनविंशःप्रस्तावः ।

—*—

नानकवंशावली

शिवरामः
|
कालः
|
नानकः
|
श्रीचन्द्रः—लक्ष्मीचन्द्रः
|
धर्मचन्द्रः

मणिक्यचन्द्रः
|
अपहारचन्द्रः, अनारचन्द्र, हितारचन्द्रः, ताराचन्द्रः,
उदयचन्द्रः, जगच्चन्द्रः,

मिहिरचन्द्रः
|
रूपनारायणः अमरचन्द्र इत्यादयः

विंशः प्रस्तावः

ज्ञानाम्बुधिर्वहति वृद्धिमलं तमांसि
नश्यन्ति तापनिचयोऽप्यपयाति यस्याः ॥
राकासुधाकरविलासविदग्धलीला
सा भारती मम मनस्युदयं दधातु ॥ १ ॥

[1]जेतारीणां निर्जितारातिषट्कं
ज्ञाता ब्रह्म ज्ञानदातारमेतत् ॥
भूमेर्भर्त्ता भागमल्लाभिधानो
गङ्गारामं तापसं पृच्छति स्म ॥ २ ॥

आकर्णिता यतिवरस्य कथा समग्रा
बालेन याति गदिता गुरवेऽङ्गदाय ॥
शुश्रूषुरस्म्यथ कथं गुरवोऽङ्गदाद्याः
सिंहासनं समगमन् गुरुनानकस्य ॥ ३ ॥

गङ्गारामस्तमूचे गुरुशरणयतेर्द्वारिकादासनाम्नो
वैशानामीश्वरस्य प्रथममकथयं तां कथां प्रश्नतोऽहम् ॥
तत्रासीद् देवराजः[2] परमकवयिता धारणाशक्तिशाली
स त्वां वक्ष्यत्यशेषं यतिपतिचरितं चारु संस्कृत्य वक्ता ॥ ४ ॥

---

1. अत्र प्रथमान्तं पदं भागमल्लस्य, द्वितीयान्तं गङ्गारामस्य विशेषणम् । इत्थं भागमल्लो गङ्गाराममपृच्छदित्यन्वयः ।
2. नानकचन्द्रोदयस्य रचयितुः कवेर्देवराजस्य विषये केवलमत्र श्लोके ग्रन्थादिश्लोके ग्रन्थान्तश्लोके च स्थूलपरिचयः प्राप्यते ।

१. निधयो-क०

अथ देवराजकविना कथितं
कथिताङ्गदस्य [1]पदलाभकथा ॥
अधुना शृणु क्षितिपतेऽवहितः
षडुरस्य सौस्थितिमधत्त कृती ॥ ५ ॥

अङ्गदं कुहकं त्यक्त्वा शिष्या भवत मे समे ॥
इति प्रव्रजितस्तत्र कश्चित्[2] तत्तेजनं जनम् ॥ ६ ॥

सिद्धाभासो द्रोहमस्य व्यतानी-
दीशेच्छातोऽवग्रहोऽभूच्च घोरः ॥
तत्रस्थेभ्यः सोऽवदद्वृष्टिविघ्नः
साक्षाद् ग्रामादङ्गदोऽयं विवास्यः ॥ ७ ॥

इदं वदत्सु शिष्येषु हसन्नगददङ्गदः ॥
सिद्धोऽयं कृष्यते यत्र वृष्टिस्तत्र भवेद् ध्रुवम् ॥ ८ ॥

लोकस्वार्थपरस्तं च चकर्ष चरणे धृतम् ॥
विनोदिनेव देवेन वृष्टिश्च बृहती कृता ॥ ९ ॥

कश्चित्तस्य करं चकर्ष चरणं कश्चित्परः कन्धरा-
मन्योऽभ्येत्य जटां कटिस्थमपरः सूत्रं परः श्मश्रु च ॥
आकृष्टः स च सीम्नि सीम्नि मरणावस्थामगाद् दुःस्थितः
सद्योऽनर्थमतर्कितं वितनुते साधोर्विरोधः किल ॥ १० ॥

कालो महानङ्गदयोगिनोऽगात्
तपस्यतः सर्वहितस्य तस्य ॥

---

१. यदलाभ—क०
२. द् चेजनं—क०

तं सेवमानोऽमरदासनामा
नामापि न स्वीयसुखस्य दध्रे ॥ ११ ॥

जलेन पूर्णं कलशं गृहीत्वा
चलन्नलं गाढतमे तमिस्रे ॥
गर्ते कुविन्दस्य स तत्र विन्दन्
व्रणं क्षणं संस्थित उत्थितोऽभूत् ॥ १२ ॥

कोऽयं[1] क्षितौ पतित इत्यवदत् कुविन्दो
निःस्थानकोऽमरक इत्यवदत् कुविन्दी[2] ॥
तं चागतं गुरुरवक्किमु तन्तुवायी
त्वां वक्ति भो न किमपीति स भागमल्लः[3] ? ॥ १३ ॥

तस्याङ्गदः परमशीलवशात् प्रसन्न
ऊचे पदे मम निषीद [4]समस्तवन्द्ये ॥
त्वां तन्तुवायवनिता वदति स्म [5]मूढा
निःस्थानकं भव जनस्य समाश्रयस्त्वम् ॥ १४ ॥

आरोप्य तं स्वस्य पदेऽङ्गदोऽगा-
द्यतिं यतीशैरभिलष्यमाणम्[6] ॥
शिष्यैरशेषैर्वरिवस्यमान-
श्चिरं चकाशेऽमरदासनामा ॥ १५ ॥

अभ्यागतानामातिथ्ये लब्धद्रव्यव्ययोऽभवत् ॥
[7]अश्वस्तनिकता तस्य जनेषु प्रथिताऽभवत् ॥ १६ ॥

---

१. कोपं–क०
२. कवन्दी–क०
३. वभाया–क०
४. व्रन्वे–क०
५. मूढा–क०
६. क्ष्यमाण–क०
७. आश्वस्त–क०

भानी कन्या बभूवास्य भानीव द्युतिभाजनम् ॥
अस्यै वरं प्रपश्येति स उपाध्यायमादिशत् ॥ १७ ॥

पप्रच्छ निर्णीतवरं द्विजं स
कीदृक्षमैक्षिष्ट वरं भवान् भोः ? ॥
स रामदासेन सदृक्षमैक्षे
वरं जगादेति धराभरस्तम् ॥ १८ ॥

भाण्डागारिक एकोऽस्य रामदासाभिधोऽभवत् ॥
सुकृती सुन्दरश्चासौ शीलवान् साधुसम्मतः ॥ १९ ॥

पृच्छन्तु रामदासस्य जातिं जातिविचक्षणाः ॥
अस्यै कन्यामहं दास्येऽमरदास इदं जगौ ॥ २० ॥

स पृष्टस्तैरहं सोऽऽपि क्षत्रियोऽस्मीत्यभाषत ॥
विवाहविधिना भानीं कन्यां तस्मै ददौ च सः ॥ २१ ॥

प्रसादितश्च सुचिरं दम्पत्योर्वरिवस्यया ॥
जामात्रे रामदासाय ददौ पदमपि स्वकम् ॥ २२ ॥

जायापती चक्रतुरस्य सेवां
तथापि माहात्म्यमुदस्य दूरात् ॥
वरं वृणीथामिति स प्रसन्नः
कदाचिदूचेऽमरदासनामा ॥ २३ ॥

भान्या प्रोक्तमियं हि वेदिपदवी प्राप्तां गतं तेहणं
तस्माद्भल्लमगादियश्च[1] भवता दत्ताधुना सोडिने ॥
सोडिभ्यो न परं प्रयातु सततं तिष्ठन्ममैवान्वये
याचावो वरमेतमेव न परं देहि प्रसन्नोऽसि चेत् ॥ २४ ॥

---

१. यच्च–क०

अमरदास उवाच न सेवया
विरहितां[1]पपदं विसृजेदिदम् ॥
त्वमिह याचसि चेत् कुल एव ते
भवतु तत्सुखिनो न भविष्यथ ॥ २५ ॥

ततो रामदासो गृहीत्वा गुरुत्वं
गतो [2]भद्रदेशं विशेषेण शिष्यैः ॥
समासेव्यमानो विमानो मनस्वी
य शस्वी न चस्वीकृतो ज्ञानमोहः ॥ २६ ॥

नयनपथमुपेते सर्वपापप्रणाशे
वितरति सकलार्थान् स्नानमात्रेण सद्यः ॥
कतिपयदिवसानां सेवया मोक्षदायि-
न्यमृतसरसि तीर्थे वासमेष व्यधत्त ॥ २७ ॥

तत्र स्थितो निगमगीतमगायदीशं
ज्ञानोपदेशमकरोदधिकारिणे च ॥
प्रारब्धमक्षिपदसौगतरागरोषो
भूत्यो यथैव दिवसक्षयमीक्षमाणः ॥ २८ ॥

शिष्याः सर्वे समभवन् हरिकीर्तनतत्पराः ॥
ध्वनिना तेन संदृष्टा हृष्टाः पुष्टाः सुमेधसः ॥ २९ ॥

वरैरभीष्टैरभिनन्द्य शिष्या-
नुवाच काले गुरुरामदासः ॥
परत्र गन्तास्मि विशोकमोहा
हरिं भवन्तः सततं भजन्तु ॥ ३० ॥

---

१. ताय—क०

२. भद्र—क०

यामिन्याश्चरमे यामे स्नात्वाऽमृतसरोजलैः ॥
योगेन श्वासमाकृष्य रामदासो हरिं गतः ॥ ३१ ॥

विपाशायास्तटे तस्य पुत्रः संस्कारमाचरत् ॥
ज्ञानिनोऽपि क्रिया कार्या कर्तुः श्रेयस्करी यतः ॥ ३२ ॥

तस्याभूवंस्त्रयः पुत्राः सुत्रामसमतेजसः ॥
अतन्द्रः पृथिवीचन्द्रो महादेवोर्जुनस्तथा ॥ ३३ ॥

शिष्याः सर्वे विमनसः पुत्रान् शुद्धिमतोऽब्रुवन् ॥
कोऽध्यास्तां रामदासस्य गुरोर्युष्माकमासनम् ॥ ३४ ॥

उवाच पृथिवीचन्द्रो महादेवश्च सन्मतिः ॥
गुरुत्वमर्जुनायैतद् दत्तं पूर्वं महात्मना ॥ ३५ ॥

एकदा स किलोवाच तनयो मेऽर्जुनाभिधः ॥
त्रैलोक्यवर्तिवस्तुज्ञः स वै माहात्म्यमर्हति ॥ ३६ ॥

ततः शिष्याः साधवश्च ब्राह्मणाश्च तपस्विनः ॥
गुरुत्वतिलकं तस्य चक्रुरुत्सवपूर्वकम् ॥ ३७ ॥

अमृतसरसि बन्धो बन्धुरस्तेन क्लृप्तो
[1]व्यरचि च पुरुगीतैर्ग्रन्थ उत्कृष्टतत्त्वः ॥
पुरमपि कृतमासीद्रामदासस्य नाम्ना
दिशि दिशि च विकीर्णं[2] कुन्दशुभ्रं यशः स्वम् ॥ ३८ ॥

लहौरसंज्ञं सपुरं जगाम
तत्र स्थितः क्षत्रियचन्द्रलालः ॥
स भूमिभर्तुः सकलाधिकारी
जहाँगिरं म्लेच्छनृपं जगाद ॥ ३९ ॥

---

१. यरचि—क०
२. विदीर्णं—क०

इममर्जुनमागतं वधान
प्रथितं शिष्यगणाद्धनं गृहीत्वा ॥
स उवाच निरागसोऽस्य साधोः
किमकाण्डे वद बन्धनं विदध्याम् ॥४०॥

चन्द्रलालस्तमब्रूत बन्धीयामहमेव तम् ॥
लक्षन्दायं च ते दद्यां त्वं तूष्णीमत्र तिष्ठ चेत् ॥४१॥

तथेति तं यवनपतिर्जगाद स
प्रलोभितः परिहृतधर्मपद्धतिः ॥
धराधिपा विगतविवेकबुद्धयो
वसुप्रिया विदधति किं न पातकम् ॥ ४२ ॥

आहूय सादरममुं स तु [1]चन्द्रलालो
गेहे निजेऽथ निजगाद गुरुं जगत्याः ॥
कन्या ममास्ति तनयेन निजेन तस्याः
पाणिग्रहं त्वमुररीकुरु भूर्युदङ्की ॥ ४३ ॥

अस्वीकुर्वन्तमेनं तु [2]सबन्धाववेष्टितम् ॥
मन्यन्ते गौरवं कस्य प्रभुत्वमदमोहिताः ॥ ४४ ॥

अर्जुनोऽब्रूत गोविन्दबालं शिष्या व्रजन्त्वितः
गुरुत्वे हरिगोविन्दं यूयं गत्वाभिषिञ्चत ॥ ४५ ॥

स मत्सुतो दुष्टजनेषु दण्ड-
दाता च निर्यातयिता च वैरम् ॥

---

१. लोलो—क०
२. ववन्ध–क०

विनिग्रहादस्य खलस्य सद्य-
स्तपःक्षयो नाभिमतो यतो मे ॥ ४६ ॥

शिष्यास्तत्र गताः स्थितांस्तदितरानूचे गुरुः सादरं
कार्यं गोमयगोमुखं कुसलिलैस्तद्धाव कार्यं द्रुतम् ॥
शोको मास्तु मनोरथं तु भवतां कर्ता तनूजो ममे-
त्युक्त्वा[1] तैर्विहिते तथा क्षितितले सुष्वाप वस्त्रावृतः ॥४७॥

जहौ प्राणान् योगबलादनायासेन तत्क्षणं
जीवनं मरणं चापि योगिनामैच्छिकं[2] यतः ॥ ४८ ॥

इरावत्यास्तटे तस्य [3]निर्हत्यालंकृतां तनुं ॥
शिष्याश्चक्रुर्यथाशास्त्रं दाहमत्यौर्ध्वदेहिकम् ॥ ४९ ॥

निशम्य हरिगोविन्दः परलोकगतिं पितुः
विह्वलो विललापोच्चैस्तातेति मुहुरुच्चरन् ॥ ५० ॥

स धैर्यमालम्ब्य विदीप्तरोषो
[4]लाहौरसञ्ज्ञं नगरं जगाम ॥
जहाँगिरं प्राप्य जगाद धृष्टो
न्यायोपपन्नं वचनं प्रवीणः ॥ ५१ ॥

निरागसो मे जनकस्य राजन्
यश्चन्द्रलालेन वधो व्यधायि ॥
दत्त्वा विषं तस्य नृपासनस्थो
ददाथ दण्डं न कुतः श्रुतश्च ॥ ५२ ॥

---

१. त्युत्का—क०
२. मैछिकं–क०
३. निर्हत्या—क०
४. लाहोर—क०

यः क्रोधलोभादिविमूढबुद्धि-
धर्मव्यपेतं नृपतिर्विदध्यात् ॥
उद्घोष्यते तस्य फलं प्रसिद्धं
राज्यावसाने नरकेषु वासः ॥ ५३ ॥

यच्चाभ्युपेतं वसु ते प्रदातुं
न तेन तद्दत्तमसत्तमेन ॥
नार्थो न धर्मः फलमस्य जातं
यशस्विनः प्रत्युत तेऽयशश्च ॥ ५४ ॥

जहाँगिरो महीभर्ता तदेदमवदद्वचः ॥
चन्द्रलालेन बद्धस्स तवाश्वासनमिच्छता ॥ ५५ ॥

उवाच हरिगोविन्दो गृहाण बहुलं वसु ॥
सकुटुम्बं चन्द्रलालं मह्यमर्पय भूपते ॥ ५६ ॥

कुटुम्बयुक्तं स तु चन्द्रलालं
नृपेण दत्तं समुपेतकालम् ॥
प्रपीडयामास महेक्षुयन्त्रे
भवत्यनर्थो महतां हि मन्योः ॥ ५७ ॥

निपात्य भवनं तस्य कारयामास वेश्म यत् ॥
श्मश्रुला यवना यत्र सायं प्रातर्नदन्त्यलम् ॥ ५८ ॥

गोविन्दबालमागत्य प्राहिणोद्वसु भूभृते ॥
युयुत्सया कर्तृपुरं नगरं च न्यवेशयत् ॥ ५९ ॥

आगरां हरिगोविन्दो गतस्तत्र जहाँगिरः ॥
स्थितस्तेनैव नगरं लाहौराख्यं सहाव्रजत् ॥ ६० ॥

तत्रायाचन्नृपो द्रव्यं मम नास्तीति सोऽवदत् ॥
निबद्ध इन्द्रप्रस्थं च नीतस्तेन तथागराम् ॥ ६१ ॥

आखेटार्थं गुरुरथगतो रक्षिभिर्नोपलब्ध-
स्तैरन्विष्टो दिशि दिशि पुनर्लक्षितः स्वे निवेशे ॥
भूयो[1] गत्वा निजगदुरिमे तस्य शक्तिं विचित्रां
मन्त्रिश्रेष्ठैः सममकबरस्यात्मजोऽमन्त्रयद् यत् ॥ ६२ ॥

निश्चित्य मन्त्रिभिर्नीतो दुर्गं ग्वालियराभिधम् ॥
ररक्षू रक्षिणो दक्षास्तत्र रात्रिंदिवं च तम् ॥ ६३ ॥

पर्यङ्कतो यवनभूमिपतिः पपात
केनापि पातित इव प्रसभं निशायाम् ॥
प्रातः ददर्श तु स्वयञ्च दशास्ववारा
सार्धं गताः प्रथममेव तु शिष्यवर्गाः ॥
द्वारे निरीक्ष्य नृपतेः स च मत्स्यलक्ष्यं
विव्याध लोहवलजं[2] च शरेण धन्वी ॥ ६४ ॥

विव्याध हरिगोविन्दो मत्स्यलक्ष्यं परिप्लवम् ॥
दुर्गद्वारं लोहमयमिषुणेति नृपोऽश्रृणोत् ॥ ६५ ॥

व्याविध्य हरिगोविन्दमानयेति महाचमूम् ॥
यवनानामतिक्रुद्ध आदिदेश जहाँगिरः ॥ ६६ ॥

सेनया चतुरङ्गिण्या परितस्त्वरितं गताः ॥
गोविन्दबालमरुन्धन् यवनाबद्धदुर्मदाः ॥ ६७ ॥

हरिगोविन्दतनयाः षडासन्नतिविश्रुताः ॥
गुरुदत्तो महाशूरस्तेजस्वी ख्यातपौरुषः ॥ ६८ ॥

तपस्वी सुन्दरतनुर्ज्ञानी तेगबहादुरः ॥
धैर्य्यमल्ल इतिख्यातो णीराय इति विश्रुतः ॥ ६९ ॥

---

१. भूयं–ख०
२. वलयं–क०

श्रीमानटलरायश्च तथा सूरतसिंहकः ॥
सर्वे जितेन्द्रियाः शूराः क्षत्रधर्मपरायणाः ॥ ७० ॥

गुरुदत्तोऽथ निजया सेनया सह निर्गतः ॥
अह्वा जघान [1]सकलान् यवनान् रोधकारिणः ॥ ७१ ॥

चारैर्निवेदितमिदं यवनेश्वराय
सैन्यं समग्रमवधीद् गुरुदत्तनामा ॥
स धृष्टधातुरचितान् दृढसप्तपट्टा-
नेकेन विध्यति शरेण धनुर्धरोद्धः[2] ॥ ७२ ॥

जहाँगिरो नाम महीमहेन्द्रः
क्रोधेन रक्तेक्षण आबभाषे ॥
प्रयातु सेना महती ममैनं
दुरासदं क्षत्रमुनिं निहन्तुम् ॥ ७३ ॥

सेनापतिर्मीरपदप्रसिद्ध
आदाय सेनां महतीं जगाम ॥
गोविन्दबालं परिहृत्य पुत्रैः
सार्धं गुरुः कर्तृपुरं ससार ॥ ७४ ॥

रुद्धे कर्तृपुरे म्लेच्छैर्हरिगोविन्द आपतत् ॥
सेनया चतुरङ्गिण्या पुत्रैः पार्थसमैः समम् ॥ ७५ ॥

चतुर्भिर्दिवसैस्तेन वाहिनी सापि सातिता ॥
पातिता भूधराकारा करिणो बाणवृष्टिभिः ॥ ७६ ॥

मुक्त्वा जहाँगिरनृपस्तमुदीतमन्युः
पारीन्द्रखानमवदत् पृतनाधिनाथम् ॥

---

१. निमिषेण–क० ।
२. द्धः–क० ।

शूरैः प्रयाहि परिदृष्टपराक्रमैस्त्वं
तं बाहुजं जहि नहि प्रसहेम स त्वाम् ॥ ७७ ॥

पारीन्द्रखानो यवनध्वजिन्या
गत्वा द्रुतं कर्तृपुरं रुरोध ॥
गुरुः स्वपुत्रैः सहितः ससैन्यो
दैन्योज्झितो योद्धुमगादनेन ॥ ७८ ॥

समरो बभूव समरोषयोस्तयो-
र्यवनार्ययोर्निशि दिवा निरन्तरः ॥
परिपन्थिनामथ विमथ्य वाहिनीं
गुरुरामदासः पृतनापतिं प्रति ॥ ७९ ॥

शिशिक्षे हरिगोविन्दादस्त्रविद्यां पुरा चिरम् ॥
पारीन्द्रखान तां सर्वां दर्शयेति गुरुर्जगौ ॥ ८० ॥

द्रोणार्जुनाविव धनुर्धरताधुरीणौ
शस्त्रास्त्रवर्षतुमुलं दधतुर्मृधन्तौ ॥
छित्त्वा शरानथ गुरुः करवालपातात्
पारीन्द्रखानयवनं विदधे द्विधा तम् ॥ ८१ ॥

अवरुह्य हयात् खड्गे संयोज्य वपुषोऽस्य तु ॥
कलिमां पठ पारीन्द्रेत्यूचे संजीव्य तं गुरुः ॥ ८२ ॥

पारीन्द्रखानयवन इत्यूचे तं पुरः स्थितम् ॥
अधुना तरवारिस्ते कलिमा स ततोऽहसत् ॥ ८३ ॥

पप्रच्छ पितरं तत्र गुरुदत्तः कृताञ्जलिः ॥
पारीन्द्रमुपगम्याशुं भवता हसितं कुतः ॥ ८४ ॥

तेनोक्तं मम शिष्योऽयं मह्यं द्रुह्यति निर्भरम् ॥
संजीव्य हसितं तेन मया तत्फलदर्शनात् ॥ ८५ ॥

कतिपये यवनास्तु पलायिता
यवनराजमिदं जगदुर्गताः ॥
तव चमूर्निहता हतनायका
स तु निशम्य न किञ्चिदभाषत ॥ ८६ ॥

संमन्त्र्य पुत्रैर्गुरुदत्तमुख्यै-
स्त्यक्त्वा गुरुः कर्तृपुरं जगाम ॥
शतद्रुतीरे [1]कहलूरदेशं
न्यवेशयत् कीर्तिपुरं प्रवीणाः ॥ ८७ ॥

उवास सुखिनस्तत्र जलपर्वतदुर्गमे ॥
अभिषेणयितुं योग्ये यवनैर्न कदाचन ॥ ८८ ॥

तं सर्वे पर्वतावासा [१]राजानमुपतस्थिरे ॥
निर्वैरः सर्वभूतानां पूतात्मा हसितोऽभवत् ॥ ८९ ॥

शिष्याः केचन पश्चिमादुपगता देशादवोचन् वत[२]
ईरानाभिधदेशतो हयवरो [३]युष्मभ्यमभ्याहृतः ॥
सोऽकस्मादटकैर्भटैरपहृतो म्लेच्छेश्वरस्योद्धतै-
र्दुर्गे तं च लहौरवर्तिनि धृतं[४] प्रत्याहर त्वं गुरो ॥ ९० ॥

---

1. कहलूरो नाम देशः ।
१. राजान उपतस्थिरे—क०
२. चवता—क०
३. युष्मभ्युम—क०
४. विधृतं—क०

कश्चित् कफल्लक इवातितरां समग्रे
चौर्ये [1]चिराय चतुरो विधिचन्द्रनामा ।।
आहूय तं गुरुरिदं निजगाद चौर्य-
पापानि मार्जय चिरेण समर्जितानि ।। ९१ ।।

लाहौरदुर्गेऽपहृतो मदीयो
म्लेच्छाधिराजेन हयो निबद्धः ।।
तमानय त्वं विधिचन्द्र बुद्ध्या
क्षमोऽसि वेषं विविधं विधातुम् ।। ९२ ।।

तथेति तेनोक्तमथ व्यधायि
वेशो महानश्वदमप्रणेतुः ।।
कशाकरः ख्यापितशालिहोत्रो
लाहौरदुर्गं प्रविवेश यत्नात् ।। ९३ ।।

दुर्दमं हयमन्यैस्तं ख्यातो दमनकर्मणि ।।
जहाँगिरस्य नृपतेर्दमयामास शासनात् ।। ९४ ।।

दान्तो हयस्तेन न भूरिकालाद्
म्लेच्छाधिपस्तस्य तुतोष तस्मात् ।।
आज्ञापयच्चारय राजमार्गे
हयं भयं यत्र गजादितः स्यात् ।। ९५ ।।

द्वित्राण्यहानि तुरगं स तु चारयित्वा
प्रत्याहरन्नल [1]इत्राश्वरहस्यशौण्डः ।।
[2]किं प्राप्नुवन्तु [3]कुहयास्तमनुद्रुता ये
काकाः कथं नु गमने गरुडं लभन्ताम् ।। ९६ ।।

---

1. रहस्यशौंढः---रहस्यज्ञाता ।
१. विराय—ख०
२. मित्रामुवन्तु—क०
३. कुपुयस्त—क०

चतुर्भिः प्रहरैरश्च आनीतो गुरवेऽर्पितः ॥
उच्चैःश्रवा इवापूर्वः सर्वेषां कौतुकप्रदः ॥ ९७ ॥

गुरुस्तं दानमानाभ्यां कृतज्ञः समतूतुषत् ॥
वशश्च विधिचन्द्रस्य चन्द्रवद्विमलम्बभौ ॥ ९८ ॥

सभायां जायमानायां वार्तायामेकदा गुरुः ॥
सस्मार नानककथां प्रसङ्गादागतां हृदि ॥ ९९ ॥

शिष्या ऊचुः स्थापितास्ते भवता स्थानरक्षिणः ॥
योगिभिर्मारिता योगैः केचित् केचित् पलायिताः ॥१००॥

स्थाप्यतामपरस्तत्र तैरधृष्यो दुरासदैः ॥
नूनं पाटितकर्णास्ते स्वीचिकीर्षन्ति तां पुरीम् ॥१०१॥

गुरुरूचे प्रभातेऽहं वीक्षिष्ये यमिहोत्थितः ॥
तमेव प्रेषयिष्यामि तेषां शल्यं सुदुर्द्धरम् ॥१०२॥

अन्येद्युरुत्थितः प्रातर्गुरुर्हरिगुरुं स्मरन् ॥
ददर्श बहिरागच्छन्नलम्मतमुपस्थितम् ॥१०३॥

प्रससाद जहास चातिमात्रं
स शिरस्तं प्रददौ च सूत्रमालाम् ॥
निजगाद गुरुर्मयाभिषिक्त-
स्त्वमिदानीं व्रज योगिनां जयाय ॥१०४॥

अलम्मतो गुरुं नत्वा चामराभ्यां सुवीजितः ॥
जगाम नानकमतां सतां संघेन संगतः ॥१०५ ॥

आगतं योगिनो दृष्ट्वा परिवारेण भूयसा ॥
तमपृच्छन् प्रव्रजितः कस्मिन्नस्ति भवान् पथि ॥१०६॥

तूष्णीमेव ततस्तस्मिन् प्रविष्टे सदनं बलात् ॥
नानकस्य मतस्थोऽयमिति तेष्वतस्थिरे ॥१०७॥

मूलकर्म विविधं व्यदधुस्ते
तत्र च स्वपिति शस्त्रमशुश्वन् ॥
हन्तरीतिरिव दैवहतानां
तत्क्रिया विफलतामखिलाऽगात् ॥१०८॥

राजानमूचुः स्थलमस्मदीयं
हरत्ययं कश्चन नानकीयः ॥
निर्णेतुमागत्य समाधिनिष्ठं
दूरादलम्मतमसौ ददर्श ॥१०९॥

उपरतसमाधिमवदत् प्रणम्य राजा कृताञ्जलिर्हि यत् ॥
स्थलमेतद्भवदीयं किमुतैषां भिन्नकर्णानाम् ॥११०॥

अलम्मतेन गदितं नानकस्य गुरोः स्थलम् ॥
आप्तोक्तं प्रत्ययः कोऽत्र पुनस्तेनेदमीरितम् ॥१११॥

पादुका कुब्जयष्टिश्च पात्रं कूपेऽस्ति नो गुरोः ॥
नृपेण दर्शयेत्युक्ते दर्शयामास सोऽखिलम् ॥११२॥

भिन्नकर्णनिवहो नृपमूचे
निर्णयोऽस्तु कृतकैः कथमेतैः ॥
मेदिनी वदति यस्य तु साक्ष्ये
भूपतेः स्थलमिदं हि तदीयम् ॥११३॥

ततः सर्वेषु शृण्वत्सु मेदिन्या उत्थितो ध्वनिः
नानकस्य मही मेयमियं सिद्धमता मता ॥११४॥

अलम्मतोऽब्रवीदेतदिदं भूयो निरीक्ष्यताम् ॥
योगी वदति मेदिन्यामवकाशे निवेशितः ॥११५॥

खनकैरथ मेदिनी विदीर्णा
ददृशे गर्तगतस्ततश्च योगी ॥

कुपितो नृपतिर्जगाद पापाः
स्थलमर्हन्ति कुयोगिनो न धूर्ताः ॥११६॥

अलम्मतं प्रतिष्ठाप्य महान्तं यत्र भूपतिः ॥
आदिशद् द्वादशग्रामान् सत्कर्तुमतिथीन् सदा ॥११७॥

अलम्मतस्य शाखैका नानकस्य मतेऽभवत् ॥
उदासिनास्तदीयाश्च प्रचरन्ति समन्ततः ॥११८॥

गुरुदत्ताय दत्तोऽस्य श्रीचन्द्रेण प्रसादतः ॥
वामूहसननाम्नोऽपि पन्थाः प्रादुरभूद्यतेः ॥११९॥

विधिचन्द्रचोरवरिवस्यया गुरुः
प्रससादत् चेदमवदत् कृतस्मितः ॥
अधुनापि चौर्यमनुतिष्ठति क्वचित्
स परोपकारफलकं तदुक्तवान् ॥१२०॥

रात्रौ कुत्र कृतं चौर्यमिति पप्रच्छ तं गुरुः ॥
सोऽवदत् सन्धिवेधेन प्राविशं सदनं महत् ॥१२१॥

तस्मिन्नान्यचरावन्धौ दरिद्रौ विप्रदम्पती ॥
अविवाहादसीदेतां कन्याया युवतेर्भृशम् ॥१२२॥

विदारयन्ती हृदयं तयोस्तु
गिरा गिरीणामपि ता निशम्य ॥
वैश्यस्य गेहादपहृत्य तूर्ण-
मदां सहस्रद्वितयं दयालुः ॥१२३॥

प्रससाद गुरुः शिरस्यधाद्
विधिचन्द्रस्य करं कृपाकरः ॥

प्रकृतिः स निजां परित्यज-
न्नचिरात् साधुरभूद् हताशुभः ॥१२४॥

मृगयां गुरुदत्त आश्रयन्न-
वधीद्विप्रगवीं मृगभ्रमात् ॥
अवलोक्य च तामजीवयत्
पितरं सर्वमुपागतोऽवदत् ॥१२५॥

पिता भृशं कोपमुपागतोऽवदत्
कुतस्त्वया सिद्धिरियं प्रदर्शिता ॥
द्विजेरिता गोवधनिष्कृतिः कृता
कुतो न होमव्रजभूरिदानतः ॥१२६॥

नृपर्षयः पूर्वमतीव शक्तयो
बभूवुरुच्छास्त्रमतिं न चक्रिरे ॥
कदाचिदंहस्युदिते समाचरन्
व्रतं वसिष्ठप्रमुखद्विजेरितम् ॥१२७॥

त्यजाम्यहं त्वामहमेव वा त्वया
विसर्जितः किञ्चन यामि काननम् ॥
स्वतन्त्रतामाचरता त्वया मना-
गहं न पृष्टः पितृगौरवादपि ॥१२८॥

गुरुदत्तस्तु निर्विण्णः पितुरग्रे कृताञ्जलिः ॥
तत्याज देहमध्वभ्यो रात्रिवासगृहं यथा ॥१२९॥

हाहाकारो बभूवाथ गुरुदत्तो निघ्नतामुरः ॥
विलप्य हरिगोविन्दो जगाद भृशदुःखितः ॥१३०॥

परुषं न कदापि पुत्र हे
शिशुतातस्तव भाषितं मया ॥

इदमद्य विनिर्गतं मुखाद्
मम कस्मात् सहतां भवान् कृती ॥१३१॥

अनुनेतुमतोऽनुगम्यते
प्रियपुत्रं न मया कुतोऽधुना ॥
हरिरायमधास्व मे [१]पदं
गुरुदत्तस्य शृणुसि संमतः ॥१३२॥

स्वपदं हरिरायाय पौत्राय प्रददौ गुरुः ॥
इन्द्रप्रस्थेश्वरोऽस्मभ्यं द्रुह्यतीति स उक्तवान् ॥१३३॥

अकुतोभयोऽसि हरिराय विद्वषो
विलयं व्रजंस्त्विति गुरुस्तमब्रवीत् ॥
सरितस्तटे व्यधितकन्दरानसून्
विजहौ स तत्र किल सप्तमे दिने ॥१३४॥

सिंहासने[1] सदसि संस्थितिमाततान
सद्भिः सदा परिवृतो हरिरायनामा ॥
वस्त्रैर्महार्हमसृणैरधिराजयोग्यैः
संशोभितो मुकुटकुण्डलकङ्कणाद्यैः ॥१३५॥

ग्रन्थपारायणं प्रातः सायं शुश्राव सत्कथाम् ॥
कदाचिन्मृगयां यातो जग्राह न मृगान् हनन् ॥१३६॥

अश्ववारसहस्राभ्यां निर्जगाम समन्वितः ॥
हरिरायो न मांसाशी पुपोष हरिणान् धृतान् ॥१३७॥

अजगरमवलोकयाञ्चकार
क्वचिदाखेटगतो वृतः स शिष्यैः ॥

---

1. "क" इति ग्रन्थे लुप्तः (फटा हुआ) ॥

१. घुटं–क०

क्षतसकलतनुं पिपीलिकाभिः
सपदि चकर्त शिरोऽस्य चार्धचन्द्रात् ॥१३८॥

पृष्टं शिष्यैरेषजन्मान्तरे क-
स्तेन प्रोक्तं पण्डितोऽदत्तविद्यः ॥
शिष्याः सेवां चक्रुरप्राप्तविद्या-
स्तेत्रात्स्नन्ति क्रव्यमव्यग्रमस्य ॥१३९॥

(विमानैस्तैजसान् लोकानेष याति प्रशान्तधीः) ॥
शास्त्राभ्यासप्रभावेण मच्छस्त्रमरणेन च ॥१४०॥

कदाचिदूचे स्वजनान् सभायां
सुखं स्थितः शाहजहाँ महीशः ॥
मयेप्सिता वारणकुम्भमुक्ता
नवं च मासप्रमितं लवङ्गम् ॥१४१॥

हारीतकीया खलु चेतकीति
षडंगुलारे न च ते करस्था ॥
अन्वेषितं मन्त्रिवरैश्चिराय
द्वीपान्तरेऽपि त्रितयं न लब्धम् ॥१४२॥

अथावदत् कोऽपि विशेषवेत्ता
समस्तमास्ते हरिरायपार्श्वे ॥
लिख त्वमस्मै विनयेन पत्रं
स दास्यति प्रीतिवशान्न भीतेः ॥१४३॥

प्रतिष्ठितः कोऽपि समाजगाम
पत्रं तदीयं परिगृह्य दत्तः ॥
तद्वाचयित्वा हरिरायनामा
जगाद देयं यवनाय नैतत् ॥१४४॥

---

१. नवंम्य—क० ।

तथा यथासौ विनयाभिधोऽयं
महामनोभिर्दुरपास एव ॥
ददौ ततस्तत्त्रितयं वदान्यै-
र्देयसदा आत्मापि न याजकेभ्यः ? ॥१४५॥

मुक्ताः शरच्चन्द्रमनोभिरामा
नवं च मासप्रमितं लवङ्गम् ॥
तोलैश्चतुर्भिर्दशभिश्च पथ्या
मिता धृत्ता सर्वरुजां निहन्त्री ॥१४६॥

विलोकितं सर्वमिदं नृपेण
नतश्च पश्चादुपविश्य चोक्तम् ॥
अहं महीशो ननु नाममात्रं
रत्नस्य पात्रं यतयः किलैते ॥१४७॥

दारासक्तहेन सुतेन तस्य
तदेदमुक्तं वद तातमैवम् ॥
ये संस्थिता नानकसाहमार्गे
[1]तत्तेभ्य ईर्ष्याऽतुलसिद्धिमद्भ्यः ॥१४८॥

ज्वालां दिदृक्षुर्भगवान् गिरिर्ययौ
परः सहस्रान् पथि वीक्ष्य मानवान् ॥
पप्रच्छ कं द्रष्टुमिमे व्रजन्ति भो
जगद्गुरुं ते' हरिरायमब्रुवन् ॥१४९॥

स च प्रचलितो द्रष्टुं संकल्प्येति स्वमानसे ॥
सत्यं जगद्गुरुं वन्द्यां पश्येयं चेच्चतुर्भुजम् ॥१५०॥

---

१. गुरुते—क० ।

चतुर्भुजं धारयन्तं शंखं चक्रं गदां धनुः ॥
ददर्श हरिरायं स मेलकेन समं गतः ॥१५१॥

उवाच चकितो दासं मां कुरुष्वेति संततः ॥
हरिरायेण गुरुणा तत एतदुदीरितम् ॥१५२॥

श्रीचन्द्रसिद्धमवलोकय देव-गेहं
गत्वा गुरुं मिहिरचन्द्रमपि प्रसिद्धम् ॥
यातः स तौ समवलोक्य निजं सुशिष्यं[1]
मां कल्पयेति विनयावनतो जगाद ॥१५३॥

श्रीचन्द्रेण तदा प्रोक्तस्तस्मै मिहिरचन्द्रकः॥
उदासिदीक्षामदिशच्छिरस्त्रं सूत्रमालिकाम् ॥१५४॥

उवाच हरिरायस्य समीपमुपयाहि भोः ॥
मम तस्य च मा भेदं विद्धि तद्भावितं कुरु ॥१५५॥

आयान्तमेतममलं हरिराय आख्य-
दायाहि भक्त भगवन्नधुना कृतार्थः ॥
प्राचीं दिशं व्रज कुरुष्व गुरुस्थलानि
श्रीनानकस्य मतवार्तिभिरास्थितानि ॥१५६॥

स्मरिष्यसि यदा मां त्वं तदा द्रक्ष्यसि तत्र च ॥
ततो गतोयं पूर्वस्यां निजं पन्थानमातनोत् ॥१५७॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
सिबिमोचनं नाम विंशः प्रस्तावः ॥

---

१. सुजिष्यं–क० ।

एकविंशः प्रस्तावः

वाग्देवता वसतु मानसपङ्कजे मे
दोषान् विधूय ददती विमलां मनीषाम् ॥
चिन्ता न मे भवति काचन यत्प्रसादा-
दामुष्मिकी च [1]विषयोऽपरमैहिकी च ॥ १ ॥

दारासकूहस्य गुरुर्बभूव
यो मीरशाहेति यतिः प्रसिद्धः ॥
तेनैकदोक्तं हरिरायतुल्यो
म्लेच्छेषु चार्येषु न कोपि सिद्धः ॥ २ ॥

दारासकूहाय ददौ स्वराज्यं
प्रीतः परं शाहजहाँ महीशः ॥
अयं गुणी काव्यकलानुरक्तो
न निर्भरं प्रौढिमवाप तत्र ॥ ३ ॥

पत्रं लिखित्वा विससर्ज भक्त्या
दारासकूहो हरिरायनाम्ने ॥
आगन्तुमीशे नहि राज्यरोधात्
क्षणे क्षणे त्वां नितरां दिदृक्षुः ॥ ४ ॥

दयैव ते दर्शनदानहेतु-
र्भवस्य भीतिं मम संहरस्व ॥
इदं विलोक्य प्रतिपत्रमस्मै
दिदेश दिव्यं हरिरायनामा ॥ ५ ॥

---

१. विषमापर–क० ।

भीतिर्न ते कस्यचिदस्ति साधो-
राखण्डितं[1] स्वर्गसुखं तवास्मि[2] ॥
तदेव राज्यं सुधियो गणन्ति
कियद्दिनं किन्तु भुवि प्रभुत्वम् ॥ ६ ॥

दारासकूहः प्रससाद यत्र
विलोक्य वात्सल्यमहो मयीति ॥
जगाद तुष्टो हरिराय आगात्
गोविन्दवालं तदनन्तरं च ॥ ७ ॥

अवरङ्गजेव उग्रो
दारासाहं व्यवासयद्राज्यात् ॥
गोविन्दवालमागा-
द्धरिराय चेदमयमूचे ॥ ८ ॥

अखण्डितं राज्यमदाद् भवान् मे
किमेतदासीदसमञ्जसं नु ॥
गुरुस्तमूचे परलोकसौख्यं
राज्यं मयोक्तं भवता न बुद्धम् ॥ ९ ॥

करोति राज्यं मुखकालिमानं
जहौ किल क्षुद्रमहीपतीनाम् ॥
राज्यं यदा वाञ्छति तं विजित्य
दधन् तदा ते समरेण सौम्य ॥ १० ॥

नो चेद् विरक्तो वस मे समीपे
विरक्तिभाजां नहि कोऽपि शत्रुः ॥

---

१. अखण्डियं—क० ।
२. तवास्ति—क० ।

दारासकूहस्तमभाषतैवं
न कामयेऽहं मुखकालिमानम् ॥ ११ ॥

स्थितश्च तत्रैव तदीयशत्रोः
सैन्यानि तं धर्तुमथागतानि ॥
अहं पलाये सरितं तरीतुं
सैन्यं न शक्येत तथा विधेहि ॥ १२ ॥

उत्केत्ययासर्पदसौ भयेन ॥
रुरोध सैन्यं हरिरायसेना ॥ १३ ॥

आग्नेययन्त्रैः पृतना महांषी
स्थितः सहस्रद्वयवाजिवारैः ॥
नीत्वा पुरः कीर्तिपुरं कुटुम्बं
जित्वा स सेनां स्वयमप्ययासीत् ॥ १४ ॥

सेना विनाशितं श्रुत्वा हरिरायेण सङ्गरे ॥
अवरङ्गाख्यनृपतिर्नाख्यत् किञ्चिदमर्षतः ॥ १५ ॥

दारासकूहं स निहत्य यत्नाल्
लिलेख पत्रं हरिरायनाम्ने ॥
राज्यं वितीर्णं भवता प्रसह्य
दारासकूहाय किमेतदासीत् ॥ १६ ॥

सिद्धिस्त्वदीया सकलापि बुद्धा
तूर्णं मदभ्यर्णमतस्त्वमेहि ॥
तस्योत्तरं सोऽपि लिलेख तस्मै
'तस्मै वितीर्णं परलोकसौख्यम्' ॥ १७ ॥

स्वस्यापि तस्यापि विशिष्य रात्रौ
ज्ञाता गतिं त्वस्य यमेव सुप्तः ॥

न चागमिष्यामि तवान्तिकेऽहं
नार्थस्त्वया कोऽपि यतो ममास्ति ॥ १८ ॥

उद्धारभारं शिरसि स्वकीये
दारासकूहं तु नृपासनस्थम् ॥
ददर्श रात्राववरङ्गजेबः
स्वप्नेपरं जागरितो रुरोष ॥ १९ ॥

सैन्यं समाहूय जगाद रोषा-
दानीयतां भो हरिरायनामा ॥
चचाल सैन्यं निशि मार्ग एव
यदृच्छया[1] सैन्यपतिर्ममार ॥ २० ॥

अन्यं पुनः सैन्यपतिं ससैन्यं
स प्रेषयामास महीमहेन्द्रः ॥
मृतः स मार्गे दश सैन्यपालाः
कालाननग्रासपदं प्रपन्नाः ॥ २१ ॥

पत्रं लिलेख कपटादवरङ्गजेबो
नम्रत्वगर्भमथ दर्शनलालसात्वम् ॥
तत्तस्य वीक्ष्य बहुधा हरिरायनामा
पुत्रं निजं प्रहितवान् सविधे तदीये ॥ २२ ॥

स कर्ता पुरुषो नाम रामरायापराभिधः ॥
गुरुणा हरिरायेण निगद्येति विसर्जितः ॥ २३ ॥

पत्राणि तस्य बहुधा समुपागतानि
त्वं तत्समीपमुपयाहि बिभीहि नैव ॥

---

१. पदच्छया—क० ।

पृच्छेत् स यत्तदभिधेहि न नानकस्य
वाणीं त्वमन्यथयितासि च मत्सहायः ॥ २४॥

उदासिभिः श्रेष्ठतमैर्ह-
स्त्यश्वरथपतिभिः सहितः ॥
स ययौ तूर्ण-
मिन्द्रप्रस्थं तदाज्ञया ॥ २५ ॥

आरामे स्थापितं तं च म्लेच्छराजः समभ्यधात् ॥
स विषं वस्त्रमददाद् वपुर्येन विपाद्यते ॥ २६ ॥

न किञ्चिदभवत्तस्य तस्मिन् वाससि धारिते ॥
चित्रीयामास सामर्थ्यं तदीयं वीक्ष्य भूपतिः ॥ २७ ॥

अन्येद्युराराममुपेत्य कश्चित्
संछाद्य कूपं वसनेन तत्र ॥
आहूय दूतैरथ रामराय-
मस्मिन्निषीदेति जगाद भूपः ॥ २८ ॥

भूयः कूपे स्थितं तं च रामरायमुदीक्ष्य सः ॥
चकितश्चिन्तयामास म्लेच्छतां नीयतामयम् ॥ २९ ॥

आदाय भोज्यमगमद् यवनोऽतिविद्वाँ-
स्तं स्वैपदे गतमिदं निजगाद नम्रः ॥
भूयेन ढौकितमिदं भवतेऽदनाय
नो नानकस्य यवनायवनत्वभेदः ॥ ३० ॥

रामरायस्तमब्रूत मुद्रेयं मोच्यतां त्वया ॥
तथाकृतेऽन्नमभवद् मालतीपुष्पसन्ततिः ॥ ३१ ॥

अन्नं पुष्पत्वमापन्नं दर्शयामास भूपतेः ॥
स नीत्वा नृपतिः सिद्धं दुर्दमन्तममन्यत ॥ ३२ ॥

आमन्त्र्यमातिथ्यममुष्य कर्तुं
सोपस्करं प्रेषयति स्म भूपः ॥
छागं च यागं विदधद्भिरिष्टं
रागं पुरस्कृत्य परैश्च लोकैः ॥ ३३ ॥

रामरायोऽवदच्छिष्या छत्रिमान् मांसभक्षिणः ॥
छागस्य मांसमश्नीत संगृह्णीत च कीकशम् ॥ ३४ ॥

यवनैर्नृपतेरुदीरितं
कथमार्यः खलु सिद्धिमर्हति ॥
नृपकार्मणकृन्न चेदयं
मृतमुज्जीवय नामजं तदा ॥ ३५ ॥

गुरवे म्लेच्छराजस्य रामरायोऽददात् पुरः ॥
जंघामेकामजस्यास्य पाकस्योपस्करं परम् ॥ ३६ ॥

रामरायो जगामाथ संसदं म्लेच्छभूपतेः ॥
स उत्थाय ननामामुं दत्त्वाऽऽसनमिदं जगौ ॥ ३७ ॥

हृदयं सदयं भवादृशां
भवतीति श्रुतमन्वहं मया ॥
अनको नु कथं निपातितः
कृपणोऽहं तु मतीश्वरः परान् ॥ ३८ ॥

मूलकर्मेव ताः पूर्वं सिद्धयो दर्शितास्तु याः ॥
अजो जीवति चेन्मन्ये भवन्तं सिद्धसत्तमम् ॥ ३९ ॥

महानसे मे स्थितमानयन्तु
छागं जगादेति तु रामरायः ॥
तं राजकीया द्रुतमानयंश्च
निगद्यमूचे यवनाधिराजः ॥ ४० ॥

एकया विकलोऽयं किं जङ्घया सिद्धसत्तम ॥
स ऊचे गुरवे दत्ता तव तां सन्दधातु सः ॥ ४१ ॥

व्रीडित इवावनीशो
धनमस्मै भूरि वितताR ॥
न स्वीचकार किञ्चित्
स तेन तुष्टो नृपोऽवादीत् ॥ ४२ ॥

यत्र प्रसीदसि भवे द्रुतमाश्रमे ते
तत्र त्वदीयमवधेहि च किङ्करं माम् ॥
चन्द्रावलीति विदितं चकमे सखेटं
तत्र स्थितं क्षितिभुजावरिवस्यमानः ॥ ४३ ॥

दिदृक्षितो म्लेच्छनृपेण काला-
दभ्याययौ तं खलु रामरायः ॥
ययौ समं प्रीतिवशादथेन्द्रं
प्रस्थं नृपालेन तथा गरां च ॥ ४४ ॥

अमुं सभायामवरङ्गजेबो
[1]विस्तम्भवार्ता स्विदमावभाषे ॥
साधुः परं नानकशाह सिद्धः
कथं त्वया रायवनं निनिन्द ॥ ४५ ॥

म्लेच्छस्य मृत्तिकां मृद्नन्[2] कुम्भकारः करोति हा ॥
घटं भाण्डानीष्टिकाश्च पचत्यग्नौ प्रदीपिते ॥ ४६ ॥

वराकी रोदितीवासौ स्फुलिङ्गैरश्रुभिश्चतैः ॥
जगत्कर्तैव जानाति विपाकं कर्मणां परम् ॥ ४७ ॥

---

१. निस्तम्भ–क० ।
२. मृद्नी–क० ।

विधर्ममृत्तिकां[1] मृद्भ्रिति पाटोस्ति भूपते ॥
इत्युक्तो रामरायेण जोषमासीद्धराधिपः ॥ ४८ ॥

श्रुत्वेति सर्वं हरिरायनामा
लिलेख सिद्धिं किमदर्शयस्त्वम् ॥
चकर्थ वाणीं किमु नानकस्य
विभिन्नपाटां यवनस्य भीत्या ॥ ४९ ॥

ज्वलन्ती मृत्तिका तस्मै सिद्धितः किं न दर्शिता ॥
सिद्धिः क्वचित् क्वचिद् भीती रीतिरेषा सतां नहि ॥ ५० ॥

मदुक्तं न कृतं कश्चित् ततस्त्वां विजहाम्यहम् ॥
यथेच्छं गच्छ वा तिष्ठ स्वतन्त्रो यत्र कुत्रचित् ॥ ५१ ॥

न त्वया मे कश्चिदर्थो व्यर्थस्वाकृतभीतिना ॥
जनकाज्ञातिरस्कारः प्रीतिना प्रियनीतिना ॥ ५२ ॥

व्यमनायत वीक्ष्य तन्नितान्तं
पितृपत्रं स इति प्रतीतरोषम् ॥
विमृशन् बहुधोपपत्तियुक्तं
न समासाद यदुत्तरं तु लेख्यम् ॥ ५३ ॥

अश्वं ययाचे नृपतिस्तदीयं
स उक्तवानानय मन्निवेशात् ॥
आनीयमानोऽश्ममयो बभूव
तिष्ठत्यसौ साम्प्रतमागरायाम् ॥ ५४ ॥

मक्काया बदराण्यदान्नरपतिः श्रीरामरामाय तं
स प्रोवाच न कीरचञ्चुदलितान्येतानि सम्यञ्चि भोः ॥

---

१. मृतिकां–क० ।

हस्तं संसदि सम्प्रसार्य बदराण्यत्युत्तमान्याहरत् ।।
पूर्वेभ्यो मधुराणि भूमिपतये सामाजिकेभ्यो ददौ ॥ ५५ ॥

इतः परं कीर्तिपुरं यियासा-
भ्यनुज्ञया ते नृप भूयतां भोः ।।
नित्यं जगादेति तु रामरायः
स्नेहान्न तत्याज महीमहेन्द्रः ॥ ५६ ॥

अवरङ्गजेबनृपति-
र्निरगान्मृगया विनोदमुपभोक्तुमनाः ॥
अवलोकयन् विपिनवृक्ष-
लता गुरुरामरायमनयच्च समम् ॥ ५७ ॥

मृगयारसेनगहनं गहनं
स जगाम दूरमपहाय चमूम् ॥
अथ वात्यया जलमुचां पटलै-
र्विदिता दिशो न तिमिरावरणा ॥ ५८ ॥

सेनोपलायतहता करकानिपातै-
स्ते स्फूर्जथोश्च करिणस्तुरगाभ्यधावन् ॥
एको भयेन च हयेन कदर्थितोऽभूद्
वर्षोपलव्रणितसर्वतनुः क्षितीशः ॥ ५९ ॥

ददर्श विद्युदुन्मेषादेष क्वापि कृतस्थितिम् ॥
रामरायं न तत्राभूद् दुर्दिनं करका तडित् ॥ ६० ॥

तत्रागतं नृपतिमित्यवदद् गुरुस्तं
सेना क्व ते त्वमसि किं विकलान्तरात्मा ॥
आयाति कोऽपि समयः क्षितिपाल यत्र
व्यर्थीभवन्ति सकलान्यपि साधनानि ॥ ६१ ॥

अहमस्मीश्वराधीनो
मदधीनोऽधुना भवान् ॥
मां विसर्जय भूपाल
गन्तुं कीर्तिपुरं ततः ॥ ६२ ॥

स्वस्थीकृत्य नृपं नित्ये रामरायो निकेतनम् ॥
प्रीत्या विसर्जयामास नृपो दत्त्वा धनं बहु ॥ ६३ ॥

रामरायो न जग्राह धनं तुष्टोऽवदन्नृपः ॥
कृपया नस्त्वदीयानां पुनर्दर्शनमस्तु ते ॥ ६४ ॥

अथागतः कीर्तिपुरस्य पार्श्वे
पत्रं स्वपित्रे स लिलेख भीतः ॥
मह्यं यथाज्ञा भवति त्वदीया
तथा विधास्यामि कृतापराधः ॥ ६५ ॥

हरिरायेण लिखितं त्वं पश्चादेव गच्छ भोः ॥
सिद्धयो दर्शिताः कस्माद् वाणी किं परिवर्तिता ॥ ६६ ॥

लाहौरनगरायायं परीवृत्य [1]गतस्ततः ॥
हरिरायेण संत्यक्ताः शिष्यास्तदनुयायिनः ॥ ६७ ॥

शिष्यान् समाहूय ततः सभाया-
मङ्के दधानो हरिकृष्णसंज्ञम् ॥
पुत्रं गुरुत्वेऽभिषिषेच तस्य
चकार भाले तिलकं प्रसन्नः ॥ ६८ ॥

पूजा कृता शिष्यगणैः स्वयं च
जगाद शिष्यानखिलानुदीक्ष्य ॥

१. नतः—क० ।

मत्तो न भिन्नो हरिकृष्णनामा
गुरुर्भवद्भिः खलु भावनीयः ॥ ६९ ॥

एकोत्तरेण स च कुम्भशतेन कृत्वा
स्नानं कुशास्तरणभाजि निविश्य भूमौ ॥
सत्यं हरिं भजत भो विषयामृषेति
शिष्यान् वदन् विसृजति स्म वपुर्विरज्य ॥ ७० ॥

न रामरायं हरिराय आत्मनः
यदेकनिष्ठं हरिकृष्णमासयत् ॥
इदं निशम्योत्कमनाजनानना-
न्मही महेन्द्रो हरिकृष्णमाह्वयत् ॥ ७१ ॥

इन्द्रप्रस्थस्य गमने भवतां सम्मतिः कथम् ॥
इत्युक्त्वा हरिकृष्णेन शिष्याः सर्व इदं जगुः ॥ ७२ ॥

बालोऽपि त्वं गुरुत्वेन सर्वेभ्यः स्थविरोऽध्यसि ॥
विमृश्य बुद्ध्या निजया मनःपूतं समाचर ॥ ७३ ॥

मात्रा समं स सम्मन्त्र्य तया सह समागमत् ॥
इन्द्रप्रस्थं नृपाज्ञप्तो राजा कश्चित्तमानयत् ॥ ७४ ॥

स स्थापयित्वा स्वगृहे तमूचे
राज्ञीं निजां कौतुकचुम्बितः ॥
बालोऽष्टवर्षोऽयमिहागतो यः
स सर्वचित्तज्ञ इति प्रवादः ॥ ७५ ॥

राज्ञा तस्येदमुदितं दासी वेषा विसाम्यहम् ॥
यद्यायाति मम क्रोडं तदा चित्तज्ञ एव सः ॥ ७६ ॥

अङ्के तस्याः समागत्य हरिकृष्णः स्वयं स्थितः ॥
राजा प्रतीतस्तद्वीक्ष्य म्लेच्छराजमवेदयत् ॥ ७७ ॥

श्रुत्वा जगाद यवनाधिपतिः सभाया-
मानीयतां द्रुतमसौ हरिकृष्णनामा ॥
वस्त्राणि यानि वितराणि शिरस्तमेकं
गृह्णीत तेषु स भवेद्यदि चित्तवेत्ता ॥ ७८ ॥

रामरायः स्थितस्तत्र नृपाज्ञातस्तमानयत् ॥
स्वक्रोडेनैव स नृपा सभैवाभ्युत्थिताभवत् ॥ ७९ ॥

नौकाकारेषु पात्रेषु बालः पञ्चशतेषु सः ॥
शिरस्त्रं स्वीचकारैकं पूर्णेषु विविधैः पटैः ॥ ८० ॥

वार्ता प्रष्टुमना बह्वीर्विसस्मार जनाधिपः ॥
हरिकृष्णं विलोक्यैव तूष्णीकः समपद्यत ॥ ८१ ॥

रामरायो निनायाथ हरिकृष्णं तदास्पदम् ॥
दिनेष्वतीतेषु पुनर्यवनेशस्तमाह्वयत् ॥ ८२ ॥

मातुः समीपमुपगम्य गुरुर्जगाद
दासीमिदं वद जनं न सकल्पदेहः ॥
आर्तो यतोऽयमतिदारुणशीतलाभि-
र्म्लेच्छं दिदृक्षुरहमस्मि पुनर्न यस्मात् ॥ ८३ ।

घोरो ज्वरो बभूवास्य शीतलाः सर्वदेहगाः ॥
दाहो महानतितरां तोदः सूचीव्यधोपमः ॥ ८४ ॥

रामरायो विलोक्येदं म्लेच्छराजमभाषत ॥
नृपोऽवरङ्गजेवाख्यः स्वयं तं द्रष्टुमागतः ॥ ८५ ॥

त्वां द्रष्टुं यवनपतिः समाजगाम
श्रुत्वेति स्वजनवचो गुरुर्जगाद ॥
न म्लेच्छं मरण उपस्थिते विलोके
लोकेऽस्मिन् हरिरवभासते दशोर्मे ॥ ८६ ॥

माता रुदत्यभिदधौ सुतशोकतप्ता
हा हा त्वरा तनय ते मम पातकेन ॥
को वा भविष्यति गुरुर्भवतः प्रयाणे
धीरे त्वयि प्रणिहितो जनकेन भारः ॥ ८७ ॥

स मृतः पुनरुत्थाय मातरं समबोधयत् ॥
आगमापायवान् मातः संसारः सारवर्जितः ॥ ८८ ॥

द्रष्टासि मे रूपमिदं शोकं न कुरु निष्फलम् ॥
वकाले नगरे योग्यो गुरुरस्ति गरीयसी ॥ ८९ ॥

रुदत्सु सर्वलोकेषु मृतं विज्ञाय भूपतिः ॥
उदश्रुनयनो दीनः शोचन् स्वगृहमाययौ ॥ ९० ॥

कश्चिद् गुरुं धीरमल्लं कश्चित् तेगबहादुरम् ॥
अणीरायं परो मेनेऽटलरायमथेतरः ॥ ९१ ॥

शिष्यं सूरतसिंहं च श्रद्धया कोऽप्यमन्यत् ॥
अव्यवस्थेत्थमभवद् वकाले कालसम्भवा[२] ॥ ९२ ॥

युग्मम्

कश्चित् सांयात्रिकः पोते भाण्डभूरिधनं नयन् ॥
निमज्जत्युदधौ तस्मिन् प्रति शुश्राव शङ्कितः ॥ ९३ ॥

गुरो त्वदीयमाहात्म्यात् पोतस्तरति चेन्मम ॥
[१]पञ्चशत्या तु दीनारैः पूजां कर्तास्म्यसंशयम् ॥ ९४ ॥

स तीर्णपोतो व्यवहृत्य भाण्डं
[३]वकालमागत्य गु रूननेकान् ॥

---

१. दीनार पञ्चशत्पोते—क० ।
२. कालेन कृता अव्यवस्थाऽभवदित्यन्वयः ।
३. वकालो ग्रामनाम ।

उदीक्ष्य पञ्चैव ददौ सुवर्णा-
न्यवेक्षितुं तेषु गुरुत्वशक्तिम् ॥ ९५ ॥

पञ्च पञ्च सुवर्णानि स्वीचक्रुः सर्व एव ते ॥
ऊचे पञ्चशतीं यच्छ शिष्यं तेगबहादुरः ॥ ९६ ॥

कीदृशीमिति तेनोक्ते गुरुः शिष्यमभाषत ॥
त्वयैव स्वीकृतां दातुं पोते मज्जति सागरे ॥ ९७ ॥

प्रसन्नः स ददौ पञ्चशतीमुच्चैरभाषत ॥
शिष्यैरेको गुरुर्ज्ञेयः सर्वैस्तेगबहादुरः ॥ ९८ ॥

सर्वेऽप्यपूज्यन्त परं गुरुत्व-
प्रयुक्तपूजास्ततमेकमापुः ॥
देशान्तरेभ्यो धनिकैः प्रणीता
आपो यथा सागरमत्युदारम् ॥ ९९ ॥

समृद्धिमेतस्य न धीरमल्लः
सेहे जगादेत्यवरङ्गजेबम् ॥
त्वं सार्वभौमोऽसि न चातिशेषे
द्रव्यागमं तेजबहादुरस्य ॥१००॥

आहूय तं ब्रूहि दिगन्तरेषु
शिष्यात् कुतो लुण्ठसि कुण्ठशक्ते ॥
आख्यायसे यत्र नतयो बलेन
गुरुः समस्तेषु जनेषु भोगिन् ॥१०१॥

स कां दर्शयिता सिद्धिं विषयास्वादलम्पटः ॥
धनं गृहाण तं बध्वा शास्ता पाखण्डिनां नृपः ॥१०२॥

आह्वायमेतं प्रणिधाय दूतान्
म्लेच्छाधिपस्तत्र स तैर्न लब्धः ॥

गतोऽवसञ्जङ्गलदेश एव
बहूनि वर्षाणि समं स्वकीयैः ॥१०३॥

तत्रापि चारैरधिगम्य सेनां
निनाय नेतुं यवनाधिराजः ।
स तीर्थयात्रामधिकृत्य यात-
स्तीर्थान्यटित्वाथ जगाम काशीम् ॥१०४॥

गतस्तुतः पाटलिपुत्रमत्र
पुत्रोऽस्य जातः सुदिने सुलग्ने ॥
गोविन्दसिंहो जनको जगाद
भावी सुतो नानकवन्महात्मा ॥१०५॥

म्लेच्छक्षयं तूर्णमयं विधाता
धाता पताकां गुरुनानकस्य ॥
विहाय तं पाटलिपुत्र एव
बकालकं तेगबहादुरोऽगात् ॥१०६॥

अवरङ्गजेवनृपतेः पृतना
तमुपानिनाय धृतमेकपदे ॥
अथ चारके नियमितं नृपति-
र्वत चोरवच्चिरमरक्षदमुम् ॥१०७॥

अब्रूत दूतवदना जगतीगुरुस्त्वं
सिद्धिं प्रदर्शयति यां तपसोपलब्धाम् ॥
नो चेदुपेहि यवनस्य गतं ततं यद्
लोके महम्मदमुखात् स्वयमीश्वरेण ॥१०८॥

मितिराममनात्यं स प्राहिणोन्नृपसन्निधौ ॥
उवाच गच्छ वक्तव्यं यत्ते स्फुरति मानसे ॥१०९॥

स गत्वा निजगादेदं न नीचो यवनात्परः ॥
श्वासेषु संचरत्स्वार्यः कथं यवनतामियात् ॥११०॥

कलेः सहायेन महंमदेन
कृता यथेच्छाचरणाजना यत् ॥
तदेव युष्माकमतीवरम्यं
मतं ततं धिग्भुवि पामराणाम् ॥१११॥

न च मूढतमोस्माकं त्वादृशामसतां पुरः ॥
ऐन्द्रजालिकवत्कर्तुं [1]कौतुकैककदर्थनाम् ॥११२॥

कर्कशानीदृशान्याह सस्मभूरीणि भूभृते ॥
न बिभ्यति नृशंसेभ्यो जना ये जीवनिःस्पृहाः ॥११३॥

आर्याणां धर्महन्ता स प्रकृत्या दारुणो नृपः ॥
आरया मारयामास मितिरायं विपाटयन् ॥११४॥

कारागारे रक्षितोस्थाद् गुरुश्च
म्लेच्छेशोऽगाद्दक्षिणास्यै दिशे च ॥
मार्गे दुष्टैः सूचितो नेतुमेनं
क्रूरान् दूतान् प्रैषयद् दुर्निवारान् ॥११५॥

अथ पाटलिपुत्रस्थं पुत्रमुद्दिश्य पत्रिकाम् ॥
लिलेख सर्वं विज्ञाय त्यागीतेगबहादुरः ॥११६॥

गीता न गोविन्दगुणा वृथैव
जनुर्गतं संप्रति चेतयस्व[2] ॥
चेतो मुकुन्दं भज सर्वकालं
भीतः क्वचिन्नोज्झति[3] वारि यद्वत् ॥११७॥

---

१. कौतुरैकवर्थ–क० ।
२. चेतयत्वमु–क० ।
३. नोज्झित०–क० ।

बलं विगलितं सर्वं विहितं बन्धनं दृढम् ॥
ग्राहग्रस्तगजस्येव साम्प्रतं शरणं हरिः ॥११८॥

सखायो विगताः सर्वे सार्थोऽपार्थः कृतस्तु यैः ॥
अस्यां विपदि नाथो मे रघुनाथो न चेतरः ॥११९॥

पठित्वा पत्रमलिखत् पित्रे पाटलिपुत्रतः ॥
गोविन्दसिंहः सुकृती परलोकं यियासवे ॥१२०॥

बलं ते विपुलं सिद्धं बन्धनं निधनं गतम् ॥
उपाया निरपायास्ते सहायास्त्वादृशाः पितः ॥१२१॥

यशो न नश्वरं क्वापि साधूनां धवलं भुवि ॥
गुरुगोविन्दविजयस्तन्मन्त्रजपसम्भवः ॥१२२॥

वाचयित्वा पुत्रपत्रमूचे तेगबहादुरः ॥
शिष्या सर्वेऽपि गोविन्दसिंहं भज ततो गुरुम् ॥१२३॥

नानकेन गुरुणा गरीयसा
बाबराय किल राज्यमर्पितम् ॥
नाशयामि यवनानहं न तत्
स्वं शिरस्तु विसृजामि सिद्धये ॥१२४॥

कारागारे कोऽपि राजा निबद्ध-
स्तं चाहूतं खड्गजिष्णुर्जगाद ॥
खड्गेन त्वं छिन्धि तूर्णं शिरो मे
तेन प्रोक्तं पाप मे तन्न कुर्याम् ॥१२५॥

श्रीकृष्ण इव पार्थाय तस्मै ज्ञानमुपादिशत् ॥
गुरुस्ततः सुखड्गेन शिरश्चिच्छेद भूपतिः ॥१२६॥

और्ध्वदैहिकमेतस्य चकार विधिवत् स च ॥
आनेतुमागता दत्तास्ततो यवनभूपतिः ॥१२७॥

अदृष्ट्वा रक्षिणोऽपृच्छत् क्व स तेगबहादुरः ॥
तैरुक्तं तव हिर्यातः किमन्तरभवत्स तु ॥१२८॥

द्वित्रैः शिष्यैर्निर्गदितं परलोकं गुरुर्गतः ॥
गोविन्दसिंहः श्रुत्वेमां वार्तामार्तो रुदद्भृशम् ॥१२९॥

जगाद चेदं नो शिष्या द्वित्रा पित्रा समं मृताः ॥
अधुनालक्षशिरसां पाते राज्यमिदं भवेत् ॥१३०॥

दशामरिष्यंश्चेच्छिष्या जनकेन समं मम ॥
अभविष्यदसंदेहं नानकस्यैव डिंडिमः ॥१३१॥

पुरे स्थितः पाटलिपुत्रसंज्ञके
चत्वारि वर्षाणि जनेन सत्कृतः ॥
गोविन्दसिंहो निजगाद मातरं
स्वमेव देशं जननि व्रजाम्यतः ॥१३२॥

तयेदमुक्तमुत तत्र न व्रज
क्लेशान् बहून् म्लेच्छकृतां न भुज्महि ॥
सुखं स्थिताः पाटलिपुत्रपत्तने
वसेऽत्र देशे कुजनैरुपद्रुते ॥१३३॥

गोविन्दस्तत एतदुक्त्वा
नायं हि देशः कुहकैर्निषेवितः ॥
अतो वयामोऽभिजनं निजं जनं
विलोकयामः सरलत्वभूषणम् ॥१३४॥

नानकमतानुपेतः
पाटलिपुत्रं विहाय सकुटुम्बः ॥
कीर्तिपुरं स गतो भूद्
माखो वालं च निःशङ्कः ॥१३५॥

गिरेरधस्तान्नगरीमानन्दपुरनामिकाम् ॥
निवेश्य स चिरं तस्थौ तत्रैव स्वजनैर्वृतः ॥१३६॥

शिरः केनचिदानीतं शिष्येण स्वपितुः पुरा ॥
स्थापयित्वा स कृतवाँस्तत्रैवायतनं महत् ॥१३७॥

शिष्यानाहूय सकलानेकदैवं गुरुर्जगौ ॥
अधुना परिशिष्टं मे वैरनिर्यातनं पितुः ॥१३८॥

शिष्यैरुक्तं वयं सर्वे सज्जा सज्जनसत्तम ॥
सर्पा इव प्रयास्यामो यवनान् यवनानिव ॥१३९॥

गुरुर्विप्रान् समाहूय मन्त्रशास्त्रविदः शुचीन् ॥
चक्रे देव्या पुरश्चर्या पञ्चवर्षाणि दारुणम् ॥१४०॥

होमे समाप्ते निरगात् कुण्डादुद्दण्डचण्डिका ॥
सखड्गा तडिदुद्योता होतारो मूर्च्छितास्ततः ॥१४१॥

गोविन्दसिंहो नैवेद्यं ददौ देवी जगाद तम् ॥
खड्गं गृहाण तां या च या च ते कामना भवेत् ॥१४२॥

वक्तुं न शक्तो नयने निमीलिते
गोविन्दसिंहो निषसाद भूतले ॥
देवी ततोऽन्तर्विममाय भूसुरा
गोविन्दसिंहोऽपि विमोहतां गतः ॥१४३॥

निर्वाप्य होमदहनं पयसा गुरुस्तु
भस्मानि कुण्डनिचितानि समुद्धार ॥
खड्गो द्विधार उदगादथ कुण्डमध्यात्
तत्क्षालनो द्रवजलं च ददौ स्वकेभ्यः ॥१४४॥

यैर्यैस्तज्जलमापीतं ते सिंहादतिविश्रुताः ॥
नीलवस्त्राः केशधराः सिंहदर्पास्तरस्विनः ॥१४५॥

यवनेषु निसर्गनिर्दया
द्विजगोरक्षणदक्षिणाश्च ते ॥
बलिनः शितचक्रधारिणो
धरणीं स्वामभिमेनिरेऽखिलाम् ॥१४६॥

अवरङ्गजेबनृपतिर्निशम्य
तद्गुरुमाजुहाव निजदूतवक्रतः ॥
स लिलेख दुर्जन कथं पितृद्रुहः
पतितस्य तेऽन्तिकमहं व्रजानि रे ॥१४७॥

क्रुद्धेन तेन पृतनाः ! प्रहिता महोग्रा
युद्धं बभूव तुमुलं गुरुवाहिनीभिः ॥
सेना पलायत हता यवनस्य भीता
भूयः समागतवती वत भूतनाथ ॥१४८।

जुज्झारसिंहो रणजित्सिंहः सिंहपराक्रमः ॥
फतेसिंहोऽस्य पुत्रोऽभूज्जोरावरसिंहनामकः ॥१४९॥

जुज्झारसिंहं रणजित्सिंहं गुरुरभाषत ॥
समराय युवां यातं घातं च कुरुतं द्विषाम् ॥१५०॥

सिंहैः सह गतौ योद्धुं तौ मित्रावरुणाविव ॥
दिनार्द्धेनाहतान् शत्रून् दैत्यानिव महाबलान् ॥१५१॥

विजित्य गृहमायातौ पितरं तौ प्रणेमतुः ॥
तेनोक्तं कथमायातौ पुनर्यातं हरन् रिपून् ॥१५२॥

पुनर्गतौ तौ यवनाननेकान् विनिहत्य च ॥
अपरावर्तिनौ वीरव्रतेन स्वर्गमायतुः ॥१५३॥

गोविन्दसिंहमात्रा
श्रुतमुक्तं हा ! हतौ पौत्रौ ॥

प्रहितौ त्वयैव योद्धुं
पुत्रस्नेहं परित्यज्य ॥१५४॥

कोरानमुत्थाप्य वदामि कुर्यां
न छद्म मे संनिधिमाव्रजत्वम् ॥
आकारयिष्यन्निति सार्वभौमो
गोविन्दसिंहः प्रजिघाय पत्रम् ॥१५५॥

मात्रा च शिष्यैरखिलैस्तदोक्तं
युक्तो विरोधो न महीश्वरेण ॥
संघे हि गत्वा शपथेन यस्मा-
द्भवन्तमाकारयति क्षितीशः ॥१५६॥

गोविन्दसिंहोऽभिदधौ शतद्रौ
धनानि मे प्रक्षिपतोऽखिलानि ॥
उपानहोऽत्यन्तपुरातनीश्च
चीराणि पेटीषु च निक्षिपध्वम् ॥१५७॥

द्वादशसहस्रमगमन्
मञ्जूषाः पूरिताः पुरतः ॥
जननी सुतौ च सैन्यं
शिष्याः पश्चाज्जगामायम् ॥१५८॥

मार्गे कुतश्चिद्यवनस्य सेना
समागता तस्य लुलुण्ठ सर्वम् ॥
बद्धाश्च सर्वे नगरे सरिन्दे
माता मृता वज्रकणं निगीर्य ॥१५९॥

जोरावरसिंहनामानं फतेसिंहं च तत्सुतम् ॥
बद्ध्वाऽवरङ्गजेबस्य म्लेच्छाः संनिधिमानयन् ॥१६०॥

वनं गतौ दाशरथी इवामू
कान्तौ नितान्तं स निरीक्ष्य भूयः ॥
उवाच बाला च परा धृता[1] मे
न तेन पार्श्वं पितुरेव याताम् ॥१६१॥

तत्र स्थितः क्षत्रिय एवमूचे
बालाविमौ व्यालशिशू इवोग्रौ ॥
धरापतेः कारयितुं प्रणामं
नृपोऽवदन्मानगतं कुमारौ ॥१६२॥

ताभ्यामुक्तं नमावो न म्लेच्छं किन्त्वादिपूरुषम् ॥
सरिन्दे नगरे कुड्ये नृपस्तौ प्रत्यवापयत् ॥१६३॥

अगमद्यावनी[2] सेना गुरुं हन्तुमतः परम् ॥
पलायन्तोऽखिलाः सिंहाश्चत्वारिंशत्सती तदा ॥१६४॥

युद्धं कुर्वन्नपययौ गुरुरल्पबलः शनैः ॥
आससाद महोदग्रा सेनाधर्तुमनाश्च तम् ॥१६५॥

शुष्कां नदीं गुरुरुवाच ममापयाताः
सर्वे सहाया सुहृदो यदि साम्प्रतं मे ॥
साहायकं कुरु नदी परिपूरिताभू-
न्म्लेच्छस्य सैन्यमवरुद्धमुवास तीरे ॥१६६॥

सहायशरदित्येषा ख्यायते साम्प्रतं च सा ॥
वर्षास्विव तरङ्गानापूर्यते सकलैर्जनैः ॥१६७॥

गुरुः पर्वतमारूढः पर्वतीयैः परिच्छदः ॥
यवनैर्लुण्ठितश्चास्य न धनं काप्यदृश्यत ॥१६८॥

---

१. धुता-ख० ।
२. यवनी-क० ।

द्वाविंशतिरवारुन्धन् सामन्ताः पर्वते च तम् ॥
श्रीकृष्णमिव गोमन्ते जरासन्धानुयायिनः ॥१६९॥

अष्टादशसहस्राणि सैन्ये यस्याभवन् द्विपाः ॥
समागम्याथ तं हन्तुं गन्तुं तं चक्रमे गिरिम् ॥१७०॥

गोविन्दसिंहस्य शरो बिभेद
क्रोशद्वये लक्ष्यमलक्ष्यमाणम् ॥
अथार्धचन्द्रेण स वीक्ष्य दूरा-
च्चकर्त सामन्तशिरः शरेण ॥१७१॥

अन्यस्याभिमुखं यातुः शरेण स शिरोऽच्छिनत् ॥
निहताः सप्त सामन्ता गुरुणा सप्तभिः शरैः ॥१७२॥

पयस्तान् पाययामास रात्रौ शिष्यान् पिपासितान् ॥
धैर्यं दत्त्वा गुरुर्देवीं ध्यात्वेदं निजगाद च ॥१७३॥

त्वामम्ब सर्वानमरान्विहाय
समाश्रितोऽहं कृतभूरिभावः ॥
विपद्गतं मां त्वमुपेक्षसे चेद्
वदस्व मातः कतमा गतिर्मे ॥१७४॥

सप्तसिंहान्समादाय मध्येसेनं गुरुर्गतः ॥
गोविन्दसिंहो व्रजतीत्यवदत् कोऽपि पामरः ॥१७५॥

तस्मै स्वहस्तवलयं ददौ मणिगणोज्वलम् ॥
पुनस्तथैव वदते द्वितीयं वलयं ददौ ॥१७६॥

तथैव तारमवदत् पामरो डामरो गुरुः ॥
क्रोधेन खड्गमादाय तं विधाय द्विधा गतः ॥१७७॥

सेना पर्वतमारूढा गूढाः सिंहाः स्थितास्तु ये ॥
देवा इव त्रयस्त्रिंशन् ते निहत्य बहून् मृताः ॥१७८॥

बहिर्यवनसेनाया यातो ज्ञातो न केनचित् ॥
गुरुस्तं कालिका देवी प्रत्यक्षं स्वमदर्शयत् ॥१७९॥

अथ म्लेच्छस्य सेनायो काली व्यालीमतस्फुरम् ॥
अन्योन्यं युध्यमानास्ते रात्रावल्पेऽवशेषिताः ॥१८०॥

प्रातर्गोविन्दसिंहस्तु दृष्टो यवनयोद्धृभिः ॥
चमकोराभिधे दुर्गे स्थितः पश्यन्न संभ्रमम् ॥१८१॥

तत्सर्वं सार्वभौमाय तदीया लिलिखुस्तदा ॥
पुनरन्या महासेना तेनाज्ञप्ता समागमत् ॥१८२॥

चमकोरदुर्गमरुधन् योद्धुं क्रुद्धा महाम्लेच्छाः ॥
द्वौ सिंहौ द्वौ म्लेच्छौ निजौ गृहीत्वा गुरुर्निरगात् ॥१८३॥

नीलवस्त्रः कुन्तकरो गाहमानः सवाहिनी ॥
पृष्टो जनैरपूर्वेण तेजसा शङ्कितैस्ततः ॥१८४॥

म्लेच्छाववदतामेष यवनानां गुरुर्महान् ॥
उच्चैस्तिष्ठति शिष्याणां भ्रामयस्यजिघृक्षया ॥१८५॥

गोविन्दसिंहो व्रजतीति पामरो
जगाद तस्मै वलयं ददौ गुरुः ॥
पुनस्तथैव प्रवदन्तमाश्रुतं
निहत्य खड्गेन भुवि न्यपातयत् ॥१८६॥

आदत्तां वलये म्लेच्छौ गुरुः सेनामलंघत ॥
अन्विच्छन्तो गुरुं पञ्च सिंहाः पश्चादथागमन् ॥१८७॥

ज्ञातास्ते यवनैर्युद्धमुद्धारंश्चक्रुरुद्धताः ॥
अलभत रिपून् हत्वा स्वर्गस्त्री[2] परिरम्भणम् ॥१८८॥

1. श्लो० १८८ तः १९० पर्यन्तं गुरोर्गरिमाणमावेदयति कविः ।
2. स्वर्गस्त्रीपरिरम्भणमलभत = स्वर्गं गतः ।

मार्गं रुध्वापरा सेना निविष्टा तां गतो गुरुः ॥
सेनापतिरपृच्छन्तं म्लेच्छाववदतामिदम् ॥१८९॥
उच्चस्थो नो गुरुरयं तेनोक्तं भोक्तुमर्हति ॥
भोज्यं मत्संनिधौ सिद्धं म्लेच्छाववदतां ततः ॥१९०॥
नायं किञ्चिद् दिवा भुंक्ते भगवद्भजने रतः ॥
लवङ्गमेकमश्नाति यामिन्यां सततं यमी ॥१९१॥
पुनर्जगाद सेनेशो मम कौतूहलं महत् ॥
गुरुर्धनुःशरौ धत्ते कथं क्षिपति सायकम् ॥१९२॥
गुरुणा गुणमारोप्य क्षिप्तस्तत्र शिलीमुखः ॥
क्रोशे निपतितो गत्वा स चित्रित इदं जगौ ॥१९३॥
कृपां विधाय महतीं गुरुस्तपतु[1] मेऽन्तिके ॥
म्लेच्छाभ्यामुदितं याति मृगयार्थं वनेऽधुना ॥१९४॥
रात्रावागत्य भक्तस्य तव स्थास्यति सन्निधौ ॥
गते गोविन्दसिंहेऽथ सेनापतिरभाषत ॥१९५॥
नूनं गोविन्दसिंहोऽयं च्युतः करतलान्मम ॥
वनं प्रयातु पृतना मदीया तं नियच्छतु ॥१९६॥
ब्राह्मण्या भवने गत्वा गुरुर्भोजनमाचरत् ॥
सप्तसिंहाः समागच्छन् कुतश्चित् तं मदोद्धताः[2] ॥१९७॥
सप्तसिंहा गतां सेनां यावनीमच्छिदन् शरैः ॥
यवना भवनायैव हतशेषाः पलायिताः ॥१९८॥
गुरोः समीपमगमन् सिंहा विजयशोभिनः ॥
वरं वृणुत भद्रं वो गुरुस्तानित्यभाषत ॥१९९॥

---

१. तिपतु–ख० ।
२. मदोद्धता:–ख० ।

त ऊचुस्ते दयास्मासु भवच्चरणसेवनम् ॥
इदं वरद्वयं देयमलमन्यैर्वरैर्गुरो ॥२००॥

शिष्यैरुपेतो बहुभिर्यवनान् विनिपात्य सः ॥
जगाम जङ्गले देशे निवासमकरोच्चिरम् ॥२०१॥

पुत्रौ निवेशितौ कुड्ये श्रुत्वा तत्र शुशोच सः ॥
वैरनिर्यातनायालं द्वारकादासमस्मरन् ॥२०२॥

अवरङ्गजेबनृपतिः समरं
सुचिरस्य दक्षिणादि दिश्यतनोत् ॥
विलिलेख तत्र किल पत्रमयं
परिभाषणं च यवनस्य गिरा ॥२०३॥

भक्तिं गुरोर्बहु बहादुरशाहनामा
चक्रे ततो गुरुरगात् तमिदं जगाद ॥
त्वां सार्वभौममधुना कलयामि सौम्य
क्रूरस्य तस्य विगमो मनसामथेष्टः ॥२०४॥

ततोऽवरङ्गजेबस्य मृतिपत्रमुपागमत् ॥
सार्वभौमत्वमगमद् बहादुरशाहनामकः ॥२०५॥

इन्द्रप्रस्थे चिरं तस्थौ सार्वभौमेन सेवितः ॥
मथुरामथ तेनैव सममेष समागमत् ॥२०६॥

वर्षं स्थितस्तमामन्त्र्य दक्षिणां दिशमागमत् ॥
गुरुर्नागपुरप्रान्ते द्वारकादाससंनिधौ ॥२०७॥

स वैष्णवः सार्धशतद्वयीसमा-
वयाः समासादितमन्त्रसाधनः ॥
अभूत् समग्रेण जनेन वन्दितो
गुरुस्तु तस्यासन आस्त निर्भयः ॥२०८॥

अन्तस्सितेन तेनेदं श्रुत्वा वीरा विसर्जिताः ।
चत्वारस्तं समुद्धर्तुं वक्तुं किञ्चिन्न तेऽशकन् ॥२०९॥

गुरोर्गुरुत्वं विज्ञाय स्वयमेव विनिर्गतः ।
पप्रच्छ कस्त्वं भवसि द्वारकादासवैष्णवः ॥२१०॥

अहं नानकसाहीयस्त्वं पुनः कोऽसि सन्मते ।
इत्युक्ते तेन तेनोक्तमहं नानकवन्दकः ॥२११॥

यदि नानकसाहस्य वन्दकस्त्वं तदा मम ।
शिष्यो भवेति तेनोक्तः शिष्यतां स उपागतः ॥२१२॥

केशान् दधार शस्त्राणि गुरुदत्तानि वन्दकः ।
सिंहस्य तस्य शस्त्राणि सिंहा द्रोहादचूचुरन् ॥२१३॥

मूलमुत्पाटयिष्यामि सिंहानामिति सोऽवदत् ।
ऊचे गुरुः कुरु दयां सिंहेषु न रुषं व्रज २१४॥

पञ्च बाणान् गुरुरदात् तथापि तमभाषत ।
सिंहान्न स्थापयिष्यामि महामत्सरिणः खलान् ॥२१५॥

गोविन्दसिंहो निजगाद दौष्ट्यं
कर्तासि चेत् पञ्जरबन्ध एव ।
विशीर्णमांसो मरणं गमिष्य-
स्यवेहि मे वन्दकवाचमेताम् ॥२१६॥

गुरुस्तदाभाषत कान्हसिंहं
विनोदसिंहं रणदुर्निवारम् ।
यातं युवामस्य सहायभूतौ
देशानयं जेष्यति शत्रुहन्ता ॥२१७॥

वन्दकः सिंहसैन्येन वाहीकानगमच्छली ।
म्लेच्छांस्तद्रक्षिणो हत्वा तानकार्षीदथात्मसात् ॥२१८॥

पन्थाः प्रवर्तितः स्वीयो विवाहः कौतुकात् कृतः ।
पर्वतीयै रणे बद्धः पञ्जरे निधनं गतः ॥२१९॥

दक्षिणस्यामविचलं दिशि चक्रे गुरोः पुरम् ।
अदीव्यदक्षैस्तत्रस्थः समं म्लेच्छेन केनचित् ॥२२०॥

प्रत्यहं चेदमवदद् वैरनिर्यातनं पितुः ।
न करोति सुतो यस्तु तस्यास्तु ष्ठीवनं मुखे ॥२२१॥

श्रुत्वा चिरेण यवनो जननीमपृच्छत्
तातः कथं मम मृतो वद सत्यमेव ।
गोविन्दसिंहशरताडित एव मृत्युं
तातो गतस्तव तथेति तदाभ्यधायि ॥२२२॥

अन्येद्युरक्षैर्दीव्यन् स श्रुत्वा त्रिस्तां गिरं पुनः ।
असिधेनुकया कुक्षौ तीक्ष्णया त्रिस्तमभ्यहन् ॥२२३॥

असिपुत्रीं करात् तस्य हृत्वा तमनयद् गुरुः ।
नृसिंहेनाभियुक्तस्य हिरण्यकशिपोर्दशाम् ॥२२४॥

गुरोर्व्रणः शल्यवैद्यैः स्यूतश्चाप्युपरोहितः ।
नातिपाति जनः किन्तु विधेर्विलसितं क्वचित् ॥२२५॥

ददौ गोविन्दसिंहाय शिल्पी कश्चन कार्मुके ।
तदाकर्षणतस्तस्य व्रणः पुनरभिद्यत ॥२२६॥

परलोकाय गन्तास्मि पूर्णोऽहं दश वर्ष्मसु ।
गोविन्दसिंह इत्यूचे परब्रह्मैकताङ्गतः ॥२२७॥

नन्दलालस्तदापृच्छत् कोऽस्माकमधुना गुरुः ।
कं नमेम च पश्येम कस्मै वार्तां वदेम च ॥२२८॥

ऊचे गुरुस्तु युष्माकं ग्रन्थ एव गुरुर्मतः ।
तं नमेत च पश्येत तस्मै वार्तां वदेत च ॥२२९॥

सप्तखारीमितं चारु चन्दनं च समानय ।
आलिप्य भूमिं सतिलैः कुशैरास्तरणं कुरु ॥२३०॥

स्नातो गुरुस्तीर्थजलैः प्रसन्नैः
शस्त्राणि सर्वाणि ततो निबध्य ।
शतं तथाष्टौ च्छुरिका दधानः
प्राणानमुञ्चत् कुशसंस्तरस्थः ॥२३१॥

आरोप्य चन्दनमयीं चितां दग्धो विधानतः ।
शिष्यान् विषण्णानागत्य यवनीपतिरुक्तवान् ॥२३२॥

को युष्माकं मृतो यस्मै सिंहाः पश्चात्तपन्त्यमी ।
गोविन्दसिंहसंसिद्ध इति तैः प्रतिभाषितम् ॥२३३॥

पञ्चविंशत्यश्ववारैः सह जात्यधुनैव सः ।
शस्त्रधारीह पारूट इति तेनोदितं पुनः ॥२३४॥

अस्ति सञ्चयनं कर्तुं चिन्वन्तस्तस्य बन्धवः ।
दाहस्थानेन शस्त्राणि न चास्थीन्युपलेभिरे ॥२३५॥

विजयते विधिशङ्करसेवितः
सकलमङ्गलमूलमनुक्षणम् ।
कलयतां हृदि वाचि दृशोः सतां
स्मितमुखाम्बुरुहः कमलापतिः ॥२३६॥

एषा कथा निगदिता जगदीश्वरस्य
भक्त्या तपोभिरपि शक्तिमताममीषाम् ।
तां ये निशम्य सुधियो मुदमाप्नुवन्ति
तेषां हरिर्हरति सर्वशुभेतराणि ॥२३७॥

श्रीनानकस्य चरितं भरितं जगतीतले ।
कात्स्न्येंन कथयेत् तस्मात् सङ्क्षेपादिदमीरितम् ॥२३८॥

सर्वेषां श्रवणसुखावहा कथेयं
श्रोतव्या सुतसुकृतार्थदानदक्षा ।
ये भक्तिं विदधति नानकेन केन
ते श्रुत्वा सुखमखिलं सदा लभन्ताम् ॥२३९॥

अध्यात्मवादरसिकैरुपसेवनीया
नाना-कथा श्रवणतत्परमानसैश्च ।
जिज्ञासुभिः कलियुगे किल विष्णुभक्ता-
नैषा परैश्च गतमत्सरतामुपेतैः ॥२४०॥

मूलाज्ञानतमिस्रं तापत्रितयं निराकुर्वन् ।
सेव्यः सुजनचकोरैर्नानकचन्द्रोदयो जयति ॥२४१॥

कथिता कविदेवराजनाम्ना
विमलकथा सुधिया च नानकीया ।
तदनु तदनुजात्मजेन तुष्टया
परितः शोधितखण्डिता व्यधायि ॥२४२॥

इति श्रीशाण्डिल्यवंशावतंसत्रिपाठिरघुपतिशर्मतनूजदेवराजशर्मनिर्मिते
नानकचन्द्रोदयेऽङ्गदादिकथायामेकविंशः प्रस्तावः ।

समाप्तश्चायं ग्रन्थः ।

शुभं भूयात् लेखकपाठकयोः ।

श्लोकानुक्रमणी

अ

अकारयत्संस्तरमात्मभृत्यै १६।६५
अकुतोभयोऽपि हरिराम २०।१३४
अकृष्टपच्यं भवतीह ६।१२६
अक्लीबवादिनो धीराः १४।३२३
अक्षय्यं सुकृतं ददाति १२।४६
अखण्डखण्डपरशोः २।६६
अखण्डचैतन्यमिदं समग्रं ७।३१
अखण्डितं राज्यमदाद् २१।६
अगमद्यावनी सेना २१।१६४
अगम्यामगम्यं स्त्रियं वा १४।२८६
अग्निर्यथा जाड्यरुजं १६।८६
अग्नीषोममयो नाडीं १०।१२२
अग्नीषोमावनिनियतनौ १०।६०
अग्न्यर्कतप्तेऽयुतयोजने १४।२८३
अगृणान्नानकः स्मित्वा ६।८५
अङ्के तस्याः समागत्य २१।७७
अङ्गदं कुहकं त्यक्त्वा २०।६
अङ्गदं चन्द्रकेतुं च १५।१५८
अङ्गदः षड्रसि स्थितः २।८६
अङ्गदस्तु परिहीणमाश्रमं १।६६
अङ्गदो द्विविदो मैन्दो १५।१३३
अङ्गिरा पार्वतीशस्य १५।३७
अचलवटाले भावी १६।४०
अचेतनं चेतनसम्प्रयुक्तं १२।१५
अजगर इव कश्चित् १७।७८
अजगरमवलोकयाञ्चकार २०।१३८
अजगरमिव तद्धनुर्द्रढीयः १५।८४
अजपयापि विमुक्तजनस्य १३।१०
अजपाजपतश्चित्ते ११।७५
अजातपक्षाः शिशवो ६।१२७
अजितः पपात पदयोः १८।७२
अजितः प्रणम्य तमिदं १७।११३
अजितस्य मते स्थितः ५।१५१
अजितेन डिण्डिमरवेण ५।१३२
अजितेन तत्र शतशो० ५।१०७
अजितेन हितेन हस्तिनोऽश्वान् ५।१५५
अजितो मूलचन्द्रश्च ५।१३६
अज्ञानजातस्य भवामयस्य १।६६
अज्ञानादेष संसारः १२।५२
अटको घटकश्चैव ६।६९
अतलं वितलं चैव १४।२५५
अतिथिर्विमुखो न १४।३३०
अतिथीन् गृहागतान्यः १४।३०२
अतिप्रवीणोऽखिललेखकानां ४।१०६
अतिवाहितवानयं जनः १६।१६१
अतिसूक्ष्मतरं वस्त्रम् १८।१४२
अतीतानागतज्ञानात् १९।२१६
अतो विशेषो मम नाभि० १८।१३१
अत्रान्तरे कौशिकमागतम् १५।७६
अत्रान्तरे श्रमविकासि० ९।४९
अत्रैव किं मरिष्यामीति १६।१०
अथ कालमुपागतं गृहा० ४।३७
अथ तमहमवादिषं ३।१६
अथ देवराजकविना २०।५
अथ नानक उक्तवान् ७।११६
अथ नानकस्य निरधारि ५।१६
अथ पाटलिपुत्रस्थं २१।११६
अथ प्रतस्थे स च बालसिन्धुः २।६२
अथ मङ्गलनाथमुक्तवान् १२।२४

अथ मूलचन्द्र उपगम्य	५।१०८
अथ म्लेच्छस्य सेनायां	२१।१८०
अथ लालेन गदितं	१७।६९
अथ होवाच गोरक्षः	१२।२८
अथागतः कीर्तिपुरस्य	२१।६५
अथागमन्मन्त्रविद०	६।८०
अथाचचक्षे विनयेन	२।१२१
अथादरादादरमाननामा	१८।१६३
अथाययमूचे यवना	१०।४१
अथारावाज्यभागौ च	५।११६
अथावदत् कोऽपि	३०।१४३
अथावदन्नानक एतदेवं	४।१४
अथैकदा नानकपारिकाङ्क्षी	१।६८
अथोर्मिनाथो यतिनम्	१२।१४५
अदृष्टपूर्वं स मणिं	८।१४५
अदृष्टपूर्वागत रागरोषो	१७।१९
अदृष्ट्वा रक्षिणोऽपृच्छत्	२१।१२८
अद्भुतानि कुसुमानि	५।८२
अद्य श्वो वा रतिर्भावी	१६।१४४
अद्वैते स्थैर्यमायाते	१४।४७
अधःशिराणां जलवाहिनीनां	१०।१०४
अधरक ! सुखितोऽसीत्या०	८।१४६
अधरकस्य पदे पत नानक	८।१६२
अधरकेण तदोक्तमयं	८।१५४
अधस्ततः शोणितफेनजन्मा	१०।१०३
अधिगतः शिविकां स	५।४६
अधिगत्य यतीशस्य	१९।१५२
अधीत्य यच्छकटमपूरि पुस्तकैः	१६।१६७
अधुना त्वं समाधत्स्व	७।१०६
अधोमुखं पङ्कजवन्	१०।१०२
अध्यात्मवादबहुलाः	७।१४३
अध्यात्मवादरसिकैः	२१।२४०
अध्यारोपापवादौ श्रुतिषु	१।८२
अनन्तमिव कौण्डिन्यस्तं	७।५६
अनन्यभक्त्या भवमोचनस्य	१।८६
अनन्यभावेन स चिन्तनीयो	१६।१००
अनर्गलौदार्यगुणः प्रसह्य	५।१४५
अनाग्रहस्तस्य निजे शरीरे	४।२६
अनादिवासनावेशात्	१८।६३
अनाद्यविद्याकृतजीवभावो	१०।४८
अनापदित्यनेद्वेद	१४।२८४
अनिच्छतापि तद्वाक्यं	१८।१५४
अनिच्छतोरपि तयो०	५।१४७
अनित्यमेतत्कलयस्व नित्यं	१८।१८७
अनिर्वाच्यानादिः	१।४७
अनीतिरेषा यवनस्य	६।९५
अनुक्त एव क्षितिपाल०	५।३८
अनुक्तपूर्वं किमिदं ब्रवीषि ?	१५।१११
अनुद्धतत्त्वं वैराग्यं	१७।८३
अनुनेतुमतोऽनुगम्यते	२०।१३२
अनुवदति तदुक्ति मर्दने	८।१४१
अनुशोचति नानकं	६।६६
अनूपे वने निर्जने गच्छतां	८।१३६
अनेकजन्मनां वार्ता	७।१३०
अनेकजन्मसंसिद्धस्ततो	११।१०९
अनेकजन्मार्जितपुण्य०	६।१४१
अनेकवर्णोज्वलसन्नशोभा	२।१३
अनेकधूर्वाहकनीयमान०	५।६०
अनेन मिथ्यावादेन	९।३४
अनेन वेषेण विशेष सौम्य	१६।९५
अन्तः सन्तापबहुलः	१८।१४१
अन्तर्बहिर्वसति को ? नुदति क्रियासु	११।८
अन्तर्प्राणिगणा वदन्ति०	१।७०
अन्तर्हितो मेघनाद	१५।१३९
अन्तस्स्मितेन तेनेदं	२१।२०६
अन्तेवासिन्युपाध्यायः	६।८
अन्त्येनैके प्रतिव्यक्ति	१२।१३
अन्धं तदैनमनुमाय	६।६६
अन्धावटे कुसूले	१४।३०१
अन्नं पुष्पत्वमापन्नं	२१।३२

अन्यं पुनः सैन्यपतिं	२१।२१	अमात्यवश्यो राजेव	१।८७
अन्यतो यतिपतिः सशरीरो	१६।२३६	अमी अशुध्याः स्वकलास्तु	१८।४६
अन्यस्याभिमुखं यातुः	२१।१७२	अमृतं मांसमश्नाति	१७।१३३
अन्यादृशमिवालक्ष्य	१६।११०	अमृतसरसि बन्धो	२०।३८
अन्यूनो नानकात् त्वं हि	१६।२००	अमुं मुहुर्मोहवशाद्धवन्तो	४।६०
अन्येद्युरक्षैर्दीव्यन्	२१।२२३	अमुं सभाग्रामवरङ्गजेबो	२१।४५
अन्येद्युरागत्य गुरोः पुरोऽसौ	१८।६४	अमूर्तिगः पूर्णमूर्ति०	२।७०
अन्येद्युरारामुपेत्य	२१।२८	अयं किमग्निः प्रकटोऽग्नि	१।३२
अन्येद्युरालोकि ततः समुद्रे	१६।५४	अयं किमर्थं भवतानुयुक्तः	१८।६२
अन्येद्युरुत्थितः प्रातर्गुरुः	२०।१०३	अयं च बलिगान्धारो	१६।१५४
अन्येद्युस्तानि भुञ्जानो	८।६०	अयवनस्य कुतः क्रियते	१८।१३७
अन्वितं व्यतिरिक्तं च	१३।९०	अयाचितं दीयमानं	१७।१३२
अपक्रान्तस्ततस्तूष्णीं	१०।८०	अयाचितव्रतधरो	८।८७
अपकृष्टोऽवमन्येत	१४।२६७	अयि मायया किमपराद्ध०	१।७७
अपराध्यति जन्मना	१८।६५	अयुतयोजनमुक्तमहर्पते	१४।२५०
अपरोक्षब्रह्मणो वदन्ति	१।८६	अयोध्यावासिनः सर्वे	१५।१०९
अपानमाकुञ्च्य निरुध्य	१२।१५९	अरत्नीनां शतान्यष्टौ	१४।१०६
अपृच्छत्तयोर्नामनी	३।६७	अरावादिनित्यं किल	१०।३२
अपृच्छन्नृपो नानकं	८।१११	अरिष्टदीप्तास्तनयस्य	२।४४
अप्रतिग्रहशीलो यः	१४।३३३	अरुणः सारथिस्तस्य	१४।२३१
अब्रूत कालो भवतो व्यलीक०	४।४०	अरुणा नृमणाङ्गिरसा	१४।१५२
अब्रूत दूतवदना जगती	२१।१०६	अरुणोदा नदी याति	१४।११०
अब्रूत नानकः पूर्वम्	१६।१३०	अर्जुनो ब्रूत गोविन्द	२०।४५
अब्रूत नानकयतिः	१९।१०६	अर्थं यशः साधुकुटुम्ब०	६।१२५
अबोधोरुकपाटस्योद्घाटनी	१६।१७६	अर्थादयस्ते सुखयन्ति	६।१३८
अभक्षयाव वायुमेव	६।२१	अर्थेन हि वियुक्तस्य	३।२२
अभयं तव केवलं पदं	१६।१५७	अर्धं प्रव्रजितेभ्य०	६।८८
अभिनन्दितुमागताद्	१५।१४५	अर्धं विपाद्य यवना	१९।२३७
अभिनवघननीलकायकान्तिः	१३।३१	अलम्मतं प्रतिष्ठाप्य	२०।११७
अभूत् सुरत्राणपुरे	३।११५	अलम्मतस्य शाखैका	२०।११२
अभूतत्पुरा यो जनकस्य	१५।४७	अलम्मतेन गदितं	२०।१११
अभ्यधायि जलालेन	१९।६१	अलम्मतो गुरुं नत्वा	२०।१०५
अभ्यागतानामातिथ्ये	२०।१६	अलम्मतोऽब्रवीदेतदिदं	२०।११५
अभ्यासवैराग्यमहो०	७।११९	अलौकिकं सौरभमुद्गिरन्तो	२।४३
अमरदास उवाच	२०।२५	अलौकिके वस्तुनि वस्तुविद्भिः	१।६२

अल्पापि वीणा महती- ७।६८
अल्पैरहोभिर्महती ३।११८
अवग्रहे वृष्टिरियं १।११२
अवरङ्गजेब उग्रो २१।८
अवरङ्गजेबनृपतिः २१।५७
अवरङ्गजेबनृपतिर्निशम्य २१।१४७
अवरङ्गजेबनृपतिः समरं २१।२०३
अवरङ्गजेबनृपतेः २१।१०७
अवरूढः शिविकायाः १९।९३
अवरुह्य हयात् खड्गे २०।८२
अवरोधमिवोत्तमं मृगीणां ३।११
अवलम्ब्य दण्डमथ २।९८
अवलोक्य नानकमिदं १०।८३
अवसितसकलार्को १९।२२६
अवस्थात्रितये पश्यन् १६।३६
अवादिषं तं चरणौ ८।६
अवादिषं शीघ्रमितस्तपस्विनो १६।५७
अविन्दतस्तामसुतम् १५।६६
अविरोधमनुद्धतं च १७।१०४
अवोचत्कनीफाः कुतः ११।४९
अव्यक्तादीन्हेतुमाहुः १३।१३५
अव्याहतगतिर्योगी १०।२
अव्याहताज्ञो जगदीश एव १२।१७६
अव्याहता स्वैरगतिः १२।१६४
अंशस्य ते भगवतो न गुरोः १५।३६
अशोकवनिकायां सा १५।१२५
अश्वं ययाचे नृपतिस्तदीयं २१।५४
अश्ववारसहस्राभ्यां २१।१३७
अश्वारूढैरत्युदात्त १८।१०
अश्विनीकृत्तिकायाम्वा १४।२१०
अश्वैराभरणैर्वस्त्रै १५।१३०
अष्टाङ्गयोगाद्दशतामुपैति १६।१३६
अष्टाङ्गुलाद्विशन्नन्त- १०।१२१
अष्टादशसहस्राणि १४।१२०
अष्टादशसहस्राणि १५।१५२
अष्टादशसहस्राणि सैन्ये २१।१७०
अष्टादशानां धरणीपतीनां ९।४१
अष्टैश्वर्यविचित्रशक्ति १२।१६२
असङ्गताग्रे पितृमातृ २।६२
असम्मतं नानकवर्मणस्तत् ४।६५
असंशयं तर्जनताडनादि ३।८७
असंसृष्टो दुःखैर्मृति ११।८१
असागरोत्थं किल रत्न० ७।७९
असितरोमशमस्फुट० ९।१११
असिपत्रवनं प्रोक्तम् १४।२७४
असिपुत्री करात् तस्य २१।२२४
असीमं च सुखं मेऽभूद् १६।१४३
असूर्यंपश्यानां कुसुम १७।१५९
अस्ति कश्चिज्जलालाख्यो १९।४
अस्ति साधुर्न विख्यातो १७।९
अस्थीनि मांसपेश्यश्च १०।८५
अस्थ्नां शतत्रयं षष्ट्यां १०।९९
अस्मार्षं त्वामद्य मध्याह्नकाले १०।५४
अस्माकं ज्ञानदृष्टिर्या १८।१०९
अस्माभिः प्रणतो न किञ्चित् १३।६
अस्माभिर्यदनुष्ठेयं १७।१५५
अस्माभिरुज्झिता १३।५९
अस्मिन्कलौ मन्दमती- ७।८३
अस्या दास्याः क्षमेथास्त्व० ५।१५४
अस्वीकुर्वन्तमेनं तु २०।४४
अहं कल्याणनामास्मि १५।२०
अहं गमिष्यामि तदीय ७।७
अहं गमिष्यामि यदेश १६।४
अहं न जानामि सदा ४।५६
अहं निराकारविदेव साधो १।८९
अहं प्रिये नानक भोः ७।९४
अहं विपद्ये प्रथमोर्मि- ७।११३
अहमस्मि मर्दन इति ६।१२५

अहमस्मि यं ब्रवीषि त्वम् १५।४६
अहं नृशंसोऽस्मि च पूर्वजस्य १९।२४५
अहमस्मीश्वराधीनो २१।६२
अहं देह इति त्यक्त- ११।३६
अहञ्च यतिराजश्च १६।१८८
अहं नानकसाहीयः २१।२११
अहमिति यतिभर्तु० १६।१८६
अहमहमिति धावमान एव १६।१६४
अहन्ताममते त्यक्त्वा १८।१८४
अहोरात्रे प्रणमता १९।५२
अहं हि कारागृहरक्षकाणां १८।३८
अहंमतिर्जनस्यास्य १७।४३
अहं पुनर्नानकमेतदाख्या- ४।२२
अहमवदमथ प्रथा ४।५२
अहो महाभूतनिबद्ध ६।८५

आ

आकर्णिता यतिवरस्य २०।३
आकर्ण्येति कथां रम्याम् १५।५७
आकलय्य करुणास्तु १७।८५
आकस्मिके सर्वजगत् २।४२
आकारयत्सप्तपदीं सिषेच ५।१२२
आकारितस्त्वं ६।७६
आकारितो नरपते ८।७०
आकाशपक्षिण इमे तव मानुषस्य १३।५७
आकाशादि गुणानेव १०।६१
आकुञ्चितेषु चिकुरेषु ८।५७
आकृष्णसारमिदमुक्त० ९।३७
आक्रुश्यमानः परिभाष्यमानो ७।२०
अखिलमिति यतिर्मुकुन्दभक्त्या १९।१७०
आखेटार्थं गुरुरथगतो २०।६२
आखेटार्थं देवदूतः ९।९१
आगच्छतस्तानवलोक्य ६।६२
आगच्छामि शनैरहं १२।३६
आगतं योगिनो दृष्ट्वा २०।१०६
आगत्य तेनेदमवादि १०।११
आगत्य भर्तृहरिरेतदवोचदेतं ११।२
आगत्य मर्दनमिदं ७।८६
आगत्य स जगाद १२।३
आगमज्ञानको योगी ६।४४
आगरां हरिगोविन्दो २०।६०
आगृह्य सोम्ययवनो यवनेतरो वा १८।१७२
आग्नेयगोलानलमुत्सृजन्तः ५।८६
आग्नेययन्त्रैः पृतना २१।१४
आचख्यौ स शमो दमः १२।६
आचष्ट योगी शृणु १०।४२
आच्छादयन् बृहति १८।१२९
आजगाम ततो योगी १४।७६
आजन्य यात्राशिविरान् ५।८३
आजीविष्यन्पान्थाः ५।१४
आजुहाव ततः क्रोधात् १८।३३
आज्ञप्ता बाबरेण १८।१३
आज्ञप्तो धर्मसिंहेन ६।१२७
आज्ञां गृहीत्वा हनुमा. ७।५६
आज्ञां विना तृणमपि १९।५०
आज्ञापयद्वारवधूकदम्बं ५।५६
आज्ञापयसि चेद्भोज्यं ९।१३६
आज्ञापयस्व किमपीति ६।७९
आज्ञेयमेव मम साधुजनानशेषान् १६।१५६
आडम्बरैरलमलं गमकैर्विरक्ते १८।१८१
आताम्रपल्लवनवाङ्कुर० ८।५६
आतिथ्यं विधिवदुपेत्य ११।१६
आतिथ्यमद्भुतमकारि ३।५६
आतिथ्यमेष कः कर्तुं १६।८६
आतिथ्येन सुतोषितो १५।६१
आत्मा प्रतीतः खलु वेदवाक्यैः १२।७
आत्मा सोहमुदीरयत्यविरतं १०।१२३
आत्मास्ति बुद्ध्यादिजडप्रकाशकः १४।१६

आत्मैव भूरितपसे हरिणा १३।४८
आदत्तां वलये म्लेच्छो गुरुः २१।१८७
आदरमान उवाच यतीशं १८।१८५
आदरमानेनोक्तं तव दूरे १८।१८२
आदरमानोऽगादीत् १८।१६८
आदरमानोऽपृच्छन्नानक १८।१७४
आदर्शयन्नङ्गुलिभिर्वरं ५।१०२
आदाय चेतांसि ययौ जनानां ५।१७३
आदाय तद्धनुरक्षस्मित १५।९३
आदाय भोज्यमगमद् २१।३०
आदाय मर्दनो बिभ्य० ७।२६
आदेश ओंकारकृतः १२।३३
आदेशः क्रियते कस्मै ? १२।१३५
आदेशपूर्वमिदमाह स १२।३१
आदेशो नानकेत्यूचे ११।५८
आदौ चन्द्रः सिते पक्षे १०।११६
आदौ प्रणम्य सदयं १।१२
आद्यः पन्थाः कुलिङ्गानां ये १४।२३४
आनन्दजेनाश्रुलवेन १६।६५
आनन्दथुर्गम महानधुना ५।२०
आनन्दबोधमधिगम्य मम १४।२१
आनन्दस्ते तावकी चैव १३।१४०
आनायमानीय महान्तः ६।३४
आनीतं भज सुजनेन ७।१३३
आनीतं भोज्यमेतच्छुचि ९।१४०
आनीयमानमजितेन विशिष्य १८।७५
आपद्धर्मधिया बुधा० ३।२८
आपन्नसत्त्वा दयितासि ६।५३
आपन्नसत्त्वा परमस्य २।३५
आपातरम्ये स्फुरिते १।४८
आपातालाद् आ च ११।८६
आपादादिब्रह्मरन्ध्रावधीह १२।१६०
आपृच्छय तं गतः पश्चात् १७।१०५
आपृच्छय मां तत्र जगाम १६।६६
आपेदिरे सपदि पल्लव ६।५०
आबद्धतोरणमुदीतचतुष्क ५।१११
आब्रह्मप्राणिपर्यन्त० १।१८
आमन्त्र्यमातिथ्यममुष्य २१।३३
आमो मधुरुहो मेघपृष्ठः १४।१७२
आम्रातकाम्रपनसैर्लकुचैः १।२१
आयव्ययं शोधयितुं ४।१५
आयव्ययविचारो मूल० ४।४६
आयव्ययौ शोधयितुं ४।१६
आयातः स तु खिद्धिमस्य १५।५५
आयातोऽभिजनादगम्य १७।२३
आयान्तमेतममलं २०।१५६
आयामि मङ्गलदजङ्गलतः प्रदेशात् १।४२
आयासलभ्यैः क्षणसौख्य० ८।५१
आयाहि प्रहर प्रतीच्छ १८।१५
आयाहि बाल ! सफलीकुरु जन्म १२।७२
आयाहि मर्दन ! जवात् ८।१३१
आयाहि सहजाद त्वं ! १६।८७
आयुः परार्द्धद्वितयम् ११।१०३
आर्याणां धर्महन्ता स २१।११४
आरब्धाभिजनैर्वनायुजनितैः ५।७६
आरामस्तस्य रम्यो ८।६८
आरामे स्थापितं २१।२६
आरुह्य पोतं जलधौ जलालः १६।३१
आरूढः कलभानिवातिबलिनः १८।५
आरूढः सितमतितुङ्गम० ६।१४२
आरूढेषु नगं नरेषु बहुषु १२।१६
आरोग्यं लघुता तनोः १२।१६१
आरोप्य चन्दनमयीं २१।२३२
आरोप्य तं स्वस्य पदेऽङ्गदोऽगाद् २०।१५
आर्त्विज्यमुत्तममुपेत्य ५।१०
आर्यम्लेच्छोपास्यदेवे ६।८६
आर्यैर्यथारुचितवशेन १८।६२
आलिङ्ग्य स स्वागतपूर्वमेनं १९।६४

आलोक्य मां प्रेमविशेष ८।८
आवयोर्नैव विच्छेदः १५।३५
आवां तत्र गतौ कराल० ८।१२६
आवां स्थितिं पृच्छति ६।१२
आवामाकर्ण्य गोविन्द १४।६०
आवामागत्य तैरुक्तं १७।५०
आवाभ्यां सह तत्राथ ११।२८
आविद्यकैर्भवति हन्त १८।११४
आवृते प्रतिपदं रणाङ्गणे १८।१६
आव्रजेत्क इतरो हि सुमेरौ ? १२।४१
आशासु गन्तुमनसा ५।५
आशा हि परमं दुःखम् ११।६१
आशैशवान् मृगयते भगवन् २।४५
आश्चर्यं तत्पण्डितानां ३।४
आश्वासयामास तु ६।६४
आश्वास्य तां स ७।१०४
आश्वास्यमानापि श्रुतै० ७।६७
आश्वासयेन्निह भवन्त १६।६०
आसनार्घादिभिः ३।७५
आसानिबोधेन विधूतपाप्मा ११।६२
आसीन उज्ज्वलरुचौ वररत्न १५।६
आस्ते कियद्दूरमितः स्वसा ते १०।५०
आस्तामन्यद्वासुदेवस्य १३।१०२
आस्था परब्रह्मविदां न १४।६०
आस्थाम पार्श्वे जनकस्य ६।३१
आ स्वच्छबोधवलवस्त्रवृतः १६।२०७
आहूतोऽपि न सोऽगच्छत् ७।१४५
आहूतो मिथिलेशदूतनिवहैः १५।८७
आहूय तं ब्रूहि दिगन्तरेषु २१।१०१
आहूय बन्धून् गणकान् २।५१
आहूयमाभिदधतुः ४।४६
आहूय सादरममुं स तु २०।४३
आहूय सूनुमगणादजितो० ५।६६
आहूय स्वान्तिकं देवो १४।८०
आहूयते हि दूरस्थो न तु १३।१५
आह्नमेतन्मूलफलं ६।११४
आह्वायमेतं प्रणिधाय २१।१०३

इ

इडायां संस्थितश्चन्द्रः १०।११५
इडा वामे स्थिता भागे १०।११०
इतः परं कीर्तिपुरं यियासा- २१।५६
इतः परं वरमवशिष्टम् १४।६
इति गोरक्षनाथेन १२।११७
इति तस्य सुतावर्षौ १४।१६४
इति तेन तपस्विना स पृष्टः १।४०
इति नानकस्य वचनं निशामयम् १८।५६
इति नानकस्य वचनानि ३।११२
इति नानकेन गदितो १०।२६
इति निशम्य तु मर्दन उक्तवान् १४।२७०
इति पत्रमुपादाय ३।६४
इति प्रार्थयमानेऽस्मिन् १७।१४७
इति मया गदिते गतविभ्रमो ४।६३
इति मर्दनमाख्याय १०।४६
इति मर्दनविज्ञप्तः १०।२०
इति मे वचनस्यार्थं १९।८६
इति मे वाचमाकर्ण्य ३।२७
इति शीलसेनवचसाम् १५।२१
इति श्रुत्वा गतस्तूष्णीं १७।४५
इति श्रुत्वा शेषमात्रो १८।१२४
इति संलपतां तेषां ६।१०१
इति स्तुतिं यति ऋषभस्य १४।२
इतो नर्तयन्तो वराश्वान् ५।७०
इत्थं जातविवाहमङ्गलविधिः ५।१२५
इत्थं दिनानि कतिचित्० ५।१४६
इत्थं प्रसद्य वदतः १४।७५
इत्थं भर्तृहरेर्वाणीम् ११।८२
इत्थं विषीदन्तममुं ८।४६
इत्थं व्यूढः कृतः साधुसंगाम १८।१०३
इत्थं स शिष्यमनुशिष्य १।६७

इत्यङ्गदस्तस्य वचो० १।१११
इत्याकर्ण्य मम प्रश्नानानुपूर्व्या १९।७७
इत्यालोच्य सुरत्राण- ७।१०८
इत्युक्तवन्तं मृतमेनम् १५।१२८
इत्युक्त्वा सप्तमुद्रा ७।६३
इत्युक्त्वा हयमारोप्य १६।२४६
इत्युपालम्भमुखरे १०।३०
इत्येवमुक्तो घटकाभिधानो ८।१४४
इत्येवमुक्तो जयराम० ३।१०४
इत्येवमुक्तो यतिना १५।४५
इदं जलाली निजगाद योगिन् १९।६७
इदं तदीयो गुरुराबभाषे १९।३८
इदं पद यदि रुचितं १४।८७
इदं मया शास्त्रगुरु० २।७६
इदं यदि स्यादपराधकोटौ १६।५५
इदं वचो योगिपतेर्निशम्य १८।८६
इदं वदत्सु शिष्येषु २०।८
इदं वपुः काञ्चनगर्भं० ८।३०
इदं श्रुत्वा सैन्धवः १६।१२
इदं सर्वं द्वैत जातमद्वितीयं १४।२८
इदममृतमतीव तुष्टिहेतुः १२।७५
इन्द्रप्रस्थस्य गमने २१।७२
इन्द्रप्रस्थे चिरं तस्थौ २१।२०६
इन्द्रप्रस्थे राजसिंहासनस्थो १८।२८
इन्द्रसेनो नन्दलालः ५।२७
इन्द्रसेनमवलोक्य ६।३०
इन्द्रियाणि प्रधानाः स्यु. १२।१२६
इममर्जुनमागतं वधान २०।४०
इमा बाह्या आन्तरी १४।३५
इमे त्रयस्तथोत्तुङ्गा १४।१०१
इयं नवविधा भक्तिः १३।२६
इयं विशालास्तरणं धरित्री १७।१११
इयं हीमापेक्षणतो १९।२०
इरावती नाम च चन्द्रभागा १।२
इरावत्यथो चन्द्रभागा ६।६०
इरावत्यास्तटे तस्य निर्हत्यालंकृतां
तनुम् २०।४९
इलावृतस्य ग्रावाणाम् १४।१०४
इलावृते चन्द्रधरः १४।१३३
इशोस्तु वा त्वं कथमस्य १२।१८
इह वसेति वदन्तमुदारधीः १५।४१
इह स्थितो नानक ३।१०३
इह स्वकीयावनुगो विहाय १३।११४

ई

ईशं ववन्दे शिरसा १६।१६
ईशितारमवलोकितुकामा १३।६५
ईशो जातिगुणक्रिया १८।४५
ईशो भेदत्रयातीतः १६।८८
ईशो वदजपतपोनियमैः १२।९०
ईश्वरा रामकृष्णाद्या १७।४४
ईश्वरो धगरो भर्तृ हरिः १२।१९६

उ

उक्तं नानकयोगिना जडमते ! १२।१४१
उक्तं नानकयोगिना १२।१८२
उक्तः कुलविलासी च १२।२०५
उक्तः सहस्रस्रोतश्च १४।१८१
उक्ता तेनेत्यवितथगिरा ७।४०
उक्ता पराजिता पश्चा १४।१८२
उक्तो रमणकौमन्दहरिमा १४।१४५
उक्त्वा तथेति तमनु० ७।१२७
उक्त्वादेशमसावुवाच १२।४४
उक्त्वेति राये विरते ३।६२
उच्चस्थाच्छीतकिरणात् २।७१
उच्चस्थो नो गुरुरयं तेनोक्तं २१।१६०
उच्चावचं पुरुषरत्न ११।१३३
उज्झित्वा विषयरसम् ११।१३
उड्डीनं तमनुड्डीना १०।६५
उड्डीनास्ते सिद्धा १६।४४
उड्डीनो हनुमानिव १५।५२

उड्डीय तस्मादचलादयाय १०।७२
उतावतीर्णोसि महाप्रभावो २।१२०
उत्कण्ठामस्य विज्ञाय १०।५
उत्कलांश्च कलिङ्गांश्च ८।६५
उत्केत्ययासर्पदसौ २१।१३
उत्क्रान्तिकालेप्यभिलष्य ६।१३६
उत्तरानुत्तरधियो निशम्य ११।२३
उत्तरेषु कुरुषु स्थितो हरिः १४।१३६
उत्थापनमारोपणमाकर्षणम् १५।८५
उत्थाय नानकयतिस्तु ततः सचेताः १६।२३०
उत्थाय शेषः प्रणनाम १६।१२०
उत्थाय स जगामैव ८।८१
उत्पादयन् महामोहम् १२।८७
उत्प्लुत्य पादांसि पयो० ६।४
उत्फुल्लकल्पतरुकानन १५।३
उत्फुल्लपङ्कजदृशं ४।८१
उदयास्तमयौ चैव १४।२२३
उदयोऽपि च मध्याह्नः १४।२१८
उदरम्भरयः पलैः प्रजानां १८।२४
उदारता कोपमहो परस्य ४।५०
उदासिभिः श्रेष्ठतमैर्हस्त्य २१।२५
उदासीनः समस्तेषु १४।५७
उदासीनः साधकश्च १७।६८
उदासीनो लोके नियतमय १२।६३
